प्रमेय-पारिजातः

म. म. गिरिधरशर्मा चतुर्वेदी

अखिलभारतीय-संस्कृत-विद्यापीठम्

समर्पणपत्रम्

भारतीयसंस्कृतेः, विश्वशान्तेः, भारतीयजनतायाश्च चिरसञ्चितानाम् आशानाम्, उज्ज्वलस्य च भविष्यस्य केन्द्रविन्दुभूतस्य भारतप्रधानमन्त्रिणः, अखिल-भारतीयसंस्कृतविद्यापीठशासननिकायस्य चाध्यक्षस्य

श्रद्धेयस्य श्रीलालबहादुरशास्त्रिणः

करकमलयोः सादरं समर्पयति

बलीरामभगतः
योजनामन्त्री भारतसर्वकारस्य

प्रधानमन्त्रिनिवासः
दिल्ली, ७ अगस्त, १९६५



श्रद्धेयाः श्रीलालबहादुरशास्त्रिणः
अखिलभारतीयसंस्कृतसाहित्यसम्मेलनाध्यक्षाः

भूमिका

सर्वतन्त्रापरतन्त्रैः, महामहोपाध्यायेत्यादिविविधविरुदावलीविराजमानैः, सुरगवीनिरन्तरसमुपासनसफलीकृतजनिभिः, अध्युपपञ्चाशग्रन्थनिर्माणनदीष्णैः, दार्शनिकधुर्यैः, स्वनामधन्यैः श्रीगिरिधरशर्मचतुर्वेदमहामहोपाध्यायैः प्रणीतः 'प्रमेयपारिजात'नामा ग्रन्थतल्लजः सम्प्रति प्रकाशमियर्तीति महतः प्रमोदस्यास्पदम् । अवैदिकमतनिरसनसनातनवैदिकधर्मस्थापनादिषु तथा तदा तदा तत्तत्संस्कृतमहाविद्यालयानां निर्वाहधुरायां च व्यापृतैरपि चतुर्वेदमहाभागैर्यदा कदाचिल्लब्धेऽवसर एव भागशो व्यलेख्ययं ग्रन्थः । अस्य केचनांशाः संस्कृतरत्नाकरनाम्नि मासिकपत्रे प्रकट्यक्रियन्त अप्रकटितानां । केषांचिदंशानामनुपलब्धचराणामपि दैववशाल्लाभेन परिपूर्णस्यात्मतत्त्वनिरूपणभागस्य प्रकाशनमधुना सम्पद्यते । आत्मतत्त्वनिरूपणभाग आमूलचूडं मयाऽवालोकि । यद्यपि 'सर्वदर्शनसंग्रहा'दिष्वात्मतत्त्वं तत्तन्मतानुसारि न्यरूप्यत, तथापि तत्तद्दार्शनिकदर्शितपथेन बहून्विषयान्संगृह्य सुमनोमनोरञ्जिन्या शैल्या सन्दर्भोऽस्य ग्रन्थस्य वैशेषिकोंऽशः । ग्रन्थकर्तृभिस्तत्र तत्र तत्र तत्तत्प्रकरणे स्फुटीकरिष्यते' इत्युक्त्या सर्वाङ्गसाकल्येन निर्मित्सितस्यास्य ग्रन्थरत्नस्य वाचकभाग्यवैकल्यमेवापरिपूर्तिहेतुरिति तर्कये । असमग्रोऽप्ययं ग्रन्थ आत्मतत्त्वनिरूपणमांसलोऽर्धेन्दुरिव तरुणेन्दुशिखामणेः पण्डितानां प्रमोदमावक्ष्यति व्युत्पित्सूनां च व्युत्पत्तिमाधास्यतीत्यत्र नास्ति संशयकणिकापि ।

विश्वविख्यातवैदुषीकाणां दिगन्तविश्रान्तयशसां श्रीचतुर्वेदमहाभागानां परिचायनं सुधाम्भोधेः सलिलैः सौहित्यकरणस्यानुकरोति। परिणतेऽपि वयसि, जराजीर्णेऽपि शरीरे सुरभारतीसेवोत्साह एतेषामितरेषामादर्शायते।

ग्रन्थस्यास्याल्पभूमिकालेखनावसरदानेनात्मानमेव गौरवितं मन्ये । सार्वत्रिकं प्रचारं लभतामयं ग्रन्थो भगवतो भवानीवल्लभस्य प्रसादादित्याशासे ।

इति विदुषामनुचरः--

रामचन्द्रशास्त्री

१७-७-६५ काशीहिन्दूविश्वविद्यालयीयसंस्कृतमहाविद्यालयाध्यक्षः

सम्पादकीयम्

भारतीयानि दर्शनानि तावदस्मद्देशोद्भवानां महर्षिणां वर्षाणां सहस्रैः कृतेभ्यः साधनाऽनुभूतिमननचिन्तननिदिध्यासनेभ्यः समुद्भूतानि लोकोत्तराणि स्रोतांसि सन्ति । यैरियं भारतीया संस्कृतिः समनुप्राणिताऽस्ति । दार्शनिक्या सम्पूर्णतयैवास्माकीनो देशः कदाचिज् जगद्गुरुताया गौरवमवक्षत् । अनेन दार्शनिकेन विवेचनेनैवास्माकं राष्ट्रं भौतिकवैभवापेक्षया आध्यात्मिकताया प्राधान्यमाधत्त । यद्यपि विश्वस्मिन् दर्शनानामनेकाः शाखा अङ्कुरिताः, पुष्पिताः, फलिताश्च, परमेकत्र स्थले समागतानां तासां प्रगतिरवरुध्यते । आचार्यः श्रीमैक्समूलरस्त्वेतावदप्यलेखीत् यत् पाश्चात्यदर्शनानां गतिर्यत्र समाप्यते, ततोऽग्रे भारतीयदर्शनानां प्रारम्भो भवति । भारतीयं दर्शनं स्वतः सम्पूर्णमिति ।

भारतीयानां साधकानामयं विशेषोऽस्ति, यद् अमीभिरेतद् गम्भीरतरं तत्त्वज्ञानमात्मसात्कृत्य सरलतरायां वाण्यां प्रकाशतां नीतम् । अस्यैवायं प्रभावो यदद्यापि अस्मद्राष्ट्रे ऽशिक्षिततरोऽप्याधुनिकचाकचक्यतः परस्तात् सुदूरस्थे ग्रामे निवसन् कृषकः श्रमिको वा, ग्रामवासिनी साधारणतरा जलहारिण्यपि वा संसारं प्रत्यनास्थया काञ्चिदाध्यात्मिकीं चमत्कृतिमात्मनि दर्शयति । दर्शनानां मौलिकानि तत्त्वान्यस्मद्देशे प्रतिकणमोतप्रोतानि सन्ति, राष्ट्रस्य चैतानि सर्वस्वमिव संवृत्तानि ।

तत्त्वज्ञानस्यास्या धाराया विकासे शतश आचार्यैः स्वजीवनमतियापितम् । भूयसीनां धाराणामाकारेणायं प्रवाहः प्रासरत् अनेके सम्प्रदायाः, नैकानि च मतानि तच्चिन्तनमवलम्ब्य प्रावर्तन्त । भारतस्योच्चतरे साहित्ये चिन्तनमिदं भावपक्षमपूपुषत् । बह्वीः शताब्दीर्यावच्चेदमेव केवलं वदुष्यस्य मानदण्डतया स्थितम्, एतन्माध्यमेनैव चाचार्यैः स्ववैदुष्यस्य

प्रभावं स्थापयितुं प्रयतितम् । परिणामतः कञ्चित् स्तरमागत्येदं तथा स्थूलतामुपगतम्, यथा दर्शनक्षेत्रे तर्केणैव विजयः प्राप्तः स्यात् । एकः सम्प्रदायः सम्प्रदायान्तरस्य मूलमुच्छेत्तुं सर्वथा प्रायतत । तत्त्वं जिज्ञासमानानां पुरस्तादेतस्य तर्कस्य वितण्डावादः पर्वतीभूयातिष्ठत् । अस्मिन् पाण्डित्यप्रदर्शनप्रयत्ने दर्शनमात्मपक्षापेक्षया शरीरपक्षं प्रति भृशमावर्जितम् ।

बहुभिर्मनीषिभिर्दार्शनिके तत्त्वज्ञाने समागतमिममाडम्बरं निवारयितुं दर्शनानां समन्वयस्यापि दिशि भूयः प्रयतितम् । तैः साधितं यथा वस्तुतो दर्शनानां लक्ष्यमेकमेवास्तीति । केवलञ्च तस्य महतो लक्ष्यस्योपलब्ध्यै ये महत्त्वशालिनः प्रयासा अन्वष्ठीयन्त, ते प्रयासा एव वस्तुतो विभिन्नानां दर्शनानां स्वरूपेण अस्तित्वं बिभ्राणा दरीदृश्यन्ते । एकमेव गन्तव्यं स्थानं प्रति गच्छन्त्या गन्त्र्या मध्येमार्गं भूयांसि विश्रमस्थानानीवेमानि दर्शनानि मिथोभिन्नानि कथ्यन्ते । यतस्तेषां प्राप्तव्यमेकमेवास्ति, तानि चान्योन्यपूरकाणि सन्ति, तेषाञ्च सम्मिलितं स्वरूपमेव सम्पूर्णं भारतीयदर्शनं विद्यते ।

अतः खल्वियं समन्वयात्मिका दृष्टिरेवास्मान् भारतीयदर्शनस्य मूलभूतं सत्यं यावत्प्रापयितुं शक्नोति । दर्शनशास्त्रस्य विश्रुता विद्वांसो महामहोपाध्यायाः श्रीगिरिधरशर्मचतुर्वेदमहाभागा दर्शनेष्वित्थंभूताया समन्वयात्मिकाया विचारधाराया महान्तः प्रतिपादकाः पोषकाश्च सन्ति । प्रस्तुते ग्रन्थेऽपि तैर्विभिन्नेषु प्रमेयेषु सर्वेषां दर्शनानां कांश्चिन् महत्त्वशालिनः सिद्धान्तान् सङ्कलय्य स्ववैदुष्यस्य प्रकाशेन ते चमत्कारविशेषं लम्भिताः । दर्शनस्य परिभाषा, दर्शनानां गणना, नानादर्शनानुकूलञ्चात्मतत्त्वस्य मार्मिकं विवेचनं प्रस्तुत्यैकत्रैव स्थले सर्वेषां दर्शनानां तत्त्वमाकलय्य जगदत्यन्तमुपकृतम् । विषयस्य प्रौढ्या सह भाषायाः प्राञ्जलतया ग्रन्थोऽतिशायिप्रभावपूर्णतां नीतः, अनेन महिमशालिनावदानेन संस्कृतजगत् तेषामधमर्णमेव स्थास्यति ।

इदमखिलभारतीयसंस्कृविद्यापीठस्य प्रकाशनमालाया द्वितीयं पुष्पं वरीवर्ति । प्रथमपुष्पतया वयं महामहोपाध्यायैर्लिखितस्य पुराणपारिजातस्य प्रकाशनमनेनैव सह विदध्महे । अस्य प्रकाशनार्थमपि भारतप्रशासनस्य शिक्षामन्त्रालयेन विशिष्याऽऽर्थिकानुदानं प्रादीयत । तदर्थं शिक्षामन्त्रालयः, केन्द्रीयसंस्कृतमण्डलसचिवो डाक्तरश्रीरामकरणशर्मा चास्माकं हार्दिकधन्यवादानां पात्रतामादधाते । अस्य ग्रन्थस्य भूमिकालेखनेन हिन्दूविश्वविद्यालयीय-संस्कृतमहाविद्यालयस्य प्राचार्येण श्रीरामचन्द्रशास्त्रिणाऽस्य शोभाऽभिवर्धिता । ततो विद्यापीठं तं महाभागं प्रत्यपि कृतज्ञतां प्रकाशयति । महामहोपाध्यायपादानां सुपुत्रेणाचार्यश्रीशिवदत्तशर्मचतुर्वेदेनायं सम्पादितः, एम० ए० इत्युपाधिधारिणा श्रीईश्वरप्रसादचतुर्वेदेन चास्य मुद्रणभारो निर्व्यूढः, अतोऽहमस्मिन् प्रसङ्गे तयोः सस्नेहं स्मरणमात्मनः कर्त्तव्यं मन्ये ।

शासननिकायस्याध्यक्षैर्भारतप्रधानमन्त्रिभिः श्रद्धेयैः श्रीलालबहादुरशास्त्रिभिरस्य समर्पणस्य स्वीकृत्यास्माकमुत्साहः प्रवर्धितः, तदर्थं वयं हृदयेन तान् प्रति कृतज्ञाः स्मः ।

डा० मण्डनमिश्रः

व्यासपूर्णिमा २०२२ वि०

अनुक्रमणिका

क्रमसंख्या	विषयाः	पृष्ठाङ्काः
१.	दर्शनशब्दः	१
२.	दर्शनगणना	५
३.	न्यायस्य विद्यात्वम्	८
४.	श्रुतिषु दश वादाः	१५
५.	चार्वाकदर्शनम्	१७
६.	बौद्धदर्शनम्	१८
७.	जैनदर्शनम् ...	१९
८.	वैशेषिकदर्शनम्	२१
९	न्यायदर्शनम्	२२
१०	सांख्यदर्शनम्	२२
११.	पूर्वमीमांसादर्शनम्	२३
१२.	उत्तरमीमांसादर्शनम्	२३
१३.	आत्मनिरूपणम्	२५
१४.	आत्मावस्थाविशेषाः	३०
१५.	आत्मतत्त्वे बौद्धदर्शनम्	३५
१६.	आत्मतत्त्वे जैनदर्शनम	४९
१७.	आत्मतत्त्वे वैशेषिकदर्शनम्	८४
१८.	आत्मतत्त्वे सांख्यदर्शनम्	१०१
१९.	आत्मतत्त्वे वेदान्तदर्शनम्	११६

श्रीः

प्रमेयपारिजातः

सर्वात्मभूतः सकलार्थविद्भिर्मुनीन्द्रवृन्दैर्बहुधाभिगीतः ।
आम्नायवेद्यः पुरुषः पुराणः स मे धियो मोहमपाकरोतु ॥१॥
सकलदर्शनदर्शनलालसापरवशेन पदाब्जयुगं गुरोः ।
सुचिरमाश्रितमस्त्ववलम्बनं किमपि साहसमद्य चिकीर्षतः ॥२॥
आशास्य वचसां देव्याः कटाक्षं करुणाप्लुतम् ।
क्रियते दर्शनप्रोक्तप्रमेयार्थोपसंग्रहः ॥

दर्शनशब्दः

इह खलु त्रिविधदुःखात्यन्तनिवृत्तये प्रमेयान् प्रमापयितुं प्रवृत्तानि दर्शनशास्त्राणीति सर्वजनीनप्रसिद्धौ कस्तावद्दर्शनशब्दार्थ इति जिज्ञास्यते। तत्र दृशिरयं यदि चाक्षुषज्ञानार्थस्तर्हि चाक्षुषप्रत्यक्षे वा तत्करणे चक्षुषीन्द्रिये वा दर्शनशब्दस्य वृत्तिः प्राप्नोति। दृशेः प्रत्यक्षज्ञानार्थकत्वेऽपि च प्रत्यक्षे वा तत्करणेष्विन्द्रियेषु वा शब्दस्यास्य वृत्तिः स्यान्नतु वाङ्मयापरपर्यायेषु शास्त्रेषु। यदि तु ज्ञानसामान्यार्थ एवात्र दृशिः करणप्रत्ययान्तश्चास्थीयेत, तर्त्तर्हि ज्ञानसाधनभूतेष्विन्द्रियलिङ्गादिषु सर्वेष्वपि च शास्त्रेषु तुल्यमयं दर्शनशब्दः प्रवर्तेत, न तु प्रतिनियतविषयः स्यात्। अथ प्रकरणापेक्षः प्रवर्तत एव तत्र तत्र, इह तु वाङ्मयप्रकरणादेव शाब्दज्ञानकरणेषु शास्त्रेष्वयमुपसंहृतो द्रष्टव्य इति चेत्तथापि तुल्यमयं सर्वेष्वेव शास्त्रेषु

दर्शनशब्दः प्रयुज्येतैव । न त्वेवमेतदुपलभामहे, वेदवेदाङ्गपुराणायुर्वेदसाहित्यादिषु बहुत्र दर्शनशब्दस्याभियुक्तैरप्रयुक्तत्वात् । अत एव च षोढा भिद्यते दर्शनशास्त्रमित्यपि प्राचां चिरन्तनः प्रवादः संगतार्थो भवति । सर्वत्रापि शास्त्रेषु दर्शनशब्दप्रयोगे तु षट्त्वं तत्र सर्वथावस्थापयितुमशक्यमापद्येत । चतुर्दश हि विद्याः परिगण्यन्तेऽभियुक्तैः—

अङ्गानि वेदाश्चत्वारो मीमांसा न्याय एव च ।
पुराणं धर्मशास्त्रं च विद्यास्त्वेताश्चतुर्दश ॥

इति कथं ताः सर्वा अपि षट्सु दर्शनेष्वन्तर्भाव्येरन् । तस्मात्प्रकृतस्यास्य दर्शनशब्दस्यात्मादितत्त्वनिरूपकेष्वेव शास्त्रेषु विशिष्य प्रवृत्तिरवश्यमास्थेया । सा चेयं योगरूढ्यैवेति केचिदभिप्रयन्ति । ज्ञानसामान्यार्थाद् दृशेर्निष्पन्नोऽयं दर्शनशब्दः प्रकरणाच्छाब्दज्ञानकरण उपसंहृतस्तत्रापि सर्वानर्थप्रहाणहेतुतया सर्वप्रधानस्यात्मादितत्त्वज्ञानस्य साधनभूतेषु वेदान्तादिशास्त्रेषु चिरन्तनव्यवहाररूढ इति तेषामाशयः । अन्ये त्वनेकार्थत्वाद् धातूनां मतापरपर्यायोऽयं दर्शनशब्द इत्याहुः । 'तेषां दर्शनमिति' 'तेषां मतमिति' चानन्यार्थावेतौ शब्दौ प्रयुक्तावभि † युक्तैः । आर्हतदर्शने च ज्ञानात्प्रागभाविनिश्रद्धाने निरूढो दर्शन † शब्दः । यो हि यथा यमर्थं श्रद्दधाति, नूनं तथैतन्मनुते, तथैव तं तमर्थं जानातीति सुप्रसिद्धोऽयमर्थोऽनुभवशीलानाम् । तथा च भिन्नं भिन्नं श्रद्धानमनुरुध्य भिन्नभिन्नतयैव तत्तदर्थजातं

† 'अस्त्यात्मेत्येकं दर्शनम्' 'नास्त्यात्मेत्यपरम्' वात्स्यायनभाष्ये । तस्मादनतिशङ्कनीयमिदमौपनिषदं दर्शनम्, 'तस्मादप्यसमंजसं सांख्यानां दर्शनम्' इत्यादि

† 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इत्यादौ ज्ञानात्पृथग्दर्शनपरिगणनमालोच्यम् ।

शाङ्करे चालोच्यम् । प्रतिपादयत्स्वेषु सांख्यादिशास्त्रेषु समुचित एवायं दर्शनशब्दप्रयोग इति द्वितीयः पन्थाः ।

वयन्तु पश्यामः—'आत्मा वा अरे द्रष्टव्यः' इति हि भगवती श्रुतिरात्मनः साक्षात्कारापरपर्यायं दर्शनमनुविदधाति । ''श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति च दर्शनस्य हेतूनप्यवगमयति । तामेव च श्रुतिमुपबृंहयन्ती—

''श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः ।
मत्वा च सततं ध्येय एते दर्शनहेतवः'' ॥

इतीयं स्मृतिरपि श्रुत्युपपत्तिध्यानानां दर्शनहेतुतामन्वाह । तत्र यद्यपि श्रुतिरपि दर्शनहेतुः, प्राधान्यं च दर्शनहेतुष्वेतस्याः, श्रुतिमन्तरा केवलाभिरुपपत्तिभिरात्मादितत्त्वज्ञानस्य 'तर्काप्रतिष्ठानादि' त्यादिसूत्रैरशक्यत्वप्रतिपादनात् । अथापि तु प्राथमकल्पिक एव ज्ञाने श्रुतेः प्राधान्यमभ्युपगच्छन्त्याचार्याः । साक्षात्कारापरपर्याये दर्शने तु श्रुतिमवलम्ब्य प्रवर्तमानयोरुपपत्तिनिदिध्यासनयोरेव प्राधान्यमातिष्ठन्ते । तदेतदुक्तं शङ्करभगवत्पादैः—''दृष्टसाम्येन चादृष्टमर्थं समर्थयन्ती युक्तिरनुभवस्य संनिकृष्यते, विप्रकृष्यते तु श्रुतिरैतिह्यमात्रेण स्वार्थाभिधानात् । अनुभवावसानं च ब्रह्मविज्ञानमविद्याया निवर्तकं मोक्षसाधनं च दृष्टफलतयेष्यत'' इति । 'तर्काप्रतिष्ठाना' दित्यादिभिस्तु निरवलम्ब एव नास्तिकानां तर्क आक्षिप्तो न तु श्रुत्यवलम्बेन प्रवर्तमानोऽपि । तच्चाप्येतच्छ्रुतेः प्रामाण्यमभिमन्यमानानामेव शिरोधार्यं स्यान्न तु बौद्धादिदर्शनानामपीत्यन्यदेतत् । सर्वथापि त्वात्मादिसाक्षात्कार उपपत्तेः प्राधान्यमनुमतमेव सर्वेषामपि । तदित्थमुपपत्तेर्दर्शनहेतुत्वसिद्धावुपपत्तिप्रधानानामेषां सांख्यादिशास्त्राणामर्थागतमेव दर्शनहेतुत्वमिति दर्शनहेतुत्वाद्दर्शनव्यपदेश एषां न्यायसिद्धः । यस्य तु धर्मादि-

प्रमेयस्य नैव साक्षात्कार उपदिष्टः, शब्दैकसमधिगम्यत्वं त्वेवावधारितम्, तस्यैतस्य प्रमितिसाधनानि धर्मशास्त्रादीनि पारोक्ष्येणैवार्थख्यापकानि दर्शनाहेतुत्वान्नैव दर्शनशब्दव्यपदेश्यानीति सामान्येन विद्याशब्देनैवाभिधीयन्ते । ततश्च विद्या च दर्शनं चेति विभिन्नमिदं प्रस्थानद्वितयमिति संसिद्धम् । अत एव यथा षट्सु दर्शनेषु पुरस्तादुपदर्शिताश्चतुर्दश विद्या नान्तर्भवन्ति, तथैव तासु चतुर्दशसु विद्यास्वपीमानि दर्शनानि नान्तर्भवन्तीति निभृतमेतदालोच्यम् । यत्तु मीमांसायां वेदान्तस्य, न्याये वैशेषिकस्य, धर्मशास्त्रे सांख्ययोगयोश्चान्तर्भावमुपकल्प्य दर्शनानां विद्यात्वमनुजानन्ति तदेतन्नातिमनोरममाग्रहग्रहिलतया क्लिष्टं च । यथा त्वेतयोर्विद्यासूदाहृतयोर्न्यायमीमांसयोरपि नास्त्येव दर्शनत्वं तदेतदनुपदमेव दर्शयिष्यामः । ता इमाश्चतुर्दशापि विद्याः प्रायेण परोक्षतयैव तंतमर्थं(१) मनुशासति, न तु साक्षात्कारपर्यन्तं तत्तदर्थजातमवगमयितुमुत्सहन्ते । उपपत्ति-पुरःसरमात्मादितत्त्वनिरूपणपराणि तु शास्त्राणि साक्षात्कारपर्यन्तावगमायैव यतन्त इति दर्शनहेतुत्वाद्दर्शनानि तानि । तदित्थमुपपत्तिपूर्वकमात्मादितत्त्वनिरूपणप्रवणत्वमेव दर्शनत्वमिति निरूढमिदं लक्षणं द्रष्टव्यम् । अन्यस्य दुर्वचत्वादिति विभाव्यतां भावुकैः । यद्यपि च सर्वदर्शनसंग्रहादौ मीमांसायाः पाणिनीयस्य शब्दशास्त्रस्य रसेश्वरादेश्च दृश्यते दर्शनत्वाभिमानेनैव मतोपन्यासः, न च तत्र तत्रात्मादितत्त्वनिरूपणं प्रकृतम्—शब्दशास्त्रस्य शब्दव्युत्पत्तिप्रदर्शनाय, मीमांसायाः

१ आत्मादितत्त्वमपि श्रुत्यादिभिः पारोक्ष्येणैवावबोध्यते, साक्षात्कारस्तु तस्योपपत्तिनिदिध्यासनाभ्यामेवेति प्रतिपादितं प्राक् । पुराणान्यपि सर्गाद्यर्थं परोक्षतयैव बोधयन्ति । अन्येषां तु शब्दशाब्दबोधोपयुक्तानामङ्गानां कैव कथाऽर्थ-साक्षात्कार इत्यालोच्यम् ।

श्रुतिवाक्यार्थव्यवस्थापनाय रसेश्वरस्य च पारदादिगुणख्यापनायैव विशिष्य प्रवृत्तिदर्शनात् । ये ऽपि तु केचित्तत्र तत्रावलोक्यन्ते दार्शनिकविषयविचारांशास्तेऽपि प्रायेण प्रसङ्गागता दर्शनान्तरानुवादादिरूपा एवेति न तत्परत्वं तेषां शास्त्राणामवधारयितुं शक्यम् । यत्किञ्चित्प्रमेयैकदेशपरिग्रहणमात्राद्वा दर्शनत्वे सर्वत्रैव तदिदमव्याहतं प्रसज्येत । तस्मात्तेषां दर्शनत्वे विरुध्यते निरूढिरियमिति सत्यम् । अथापि तु दर्शनहेतुत्वरूपदृढतरतर्कानुगृहीतामधिकतमशिष्टसंप्रदायप्रसिद्धिमवलम्ब्य दर्शनत्वाभाव एव तेषामनुसन्धेय इति न दोषः । शब्दशास्त्रादिष्वपि हि दर्शनशब्दप्रयोगेऽभ्युपगम्यमाने विनिगमनाविरहात् सर्वेष्वेव शास्त्रेषु दर्शनव्यपदेशो दुर्निवार एव । इतरव्यावृत्तस्य तत्रानुगतस्य च तर्कानुगृहीतस्य लक्षणस्यासंभवात् । न च शब्दशास्त्रादिष्वेषु शिष्टानां दर्शनव्यपदेशो दृष्टचरः । तस्मात्सर्वदर्शनसंग्रहादौ तत्तन्मतोपन्यासः कुतुकायैवेत्याकलनीयम् । आस्तां वा ज्ञानसामान्यार्थतया सर्वस्मिन्नपि वाङ्मये दर्शनव्यपदेश एकेषाम्, भवतु चेन्द्रियलिङ्गादिष्वप्ययं परेषाम्, येषान्तु परिच्छिन्नोऽयं दर्शनपदप्रयोगस्तेषामुक्तविधैव शरणमिति कृतं बहुना प्रपञ्चेन ।

दर्शनगणना

तानि च दर्शनानि षडिति चिरन्तनप्रसिद्धिः । कानि तु तानीति जिज्ञासायां दृश्यतेऽनेकधा विप्रतिपत्तिः । एकदेशिनान्तु तामुपेक्ष्य यत्प्राधान्येन प्रसिध्यति तद्विवेचयिष्यामः । तत्रेत्थमिदानीन्तना विशिष्टप्रज्ञा आतिष्ठन्ते—कापिलं सांख्यम्, पातञ्जलो योगः, काणादं वैशेषिकम्, गौतमीयो न्यायः, जैमिनीया पूर्वमीमांसा, वैयासिक्युत्तरमीमांसा वेदान्तापरपर्यायेति षडिमानि दर्शनानीति । श्रुतिविरुद्धानि नास्तिकानां दर्शनानि त्वितः पृथग्भूतान्येवानुसन्धेयानि, औपासनिकानां च दर्शना-

न्युत्तरमीमांसायामेवान्तर्भवन्तीति न न्यूनता। तदेतत्प्रेक्षावद्भ्यो न रोचते। योगस्य न्यायस्य पूर्वमीमांसायाश्च पृथग् दर्शनत्वस्य विचारासहत्वात्। तथा हि-योगशास्त्रप्रवर्तकस्य भगवतः पतञ्जलेस्तावच्चित्तवृत्तिनिरोधोपायानुपदर्शयितुं विशिष्य प्रवृत्तिर्नत्वात्मादितत्त्वचिख्यापयिषया। 'अथ योगानुशासनम्' 'योगश्चित्तवृत्तिनिरोधः' इतिसूत्राभ्यां चित्तवृत्तिनिरोधस्यैव तत्र शास्त्रेऽधिकृतत्वबोधनात्। चित्तवृत्तिनिरोधश्चायं क्रियाविशेषरूप इति क्रियोपदेशार्थमिदं शास्त्रं स्यात्, न त्वेवात्मादितत्त्वनिरूपणमुद्देश्यतयोपादत्ते। उपपत्तिपुरःसरमात्मादितत्त्वनिरूपणप्रवणत्वमेव तु दर्शनत्वमित्यवोचाम। यदप्येतद्योगशास्त्रे दृश्यते क्वचन दार्शनिकतत्त्वनिरूपणं तदपि प्रसङ्गागतं प्रधानप्रतिपाद्योपयोगितयैवोपनिबद्धमिति न तन्मात्रेण तत्प्रवणत्वमस्य समास्थातुं सुशकम्। तदेतदाहुर्दार्शनिकमूर्धन्यास्तत्रभवन्तो वाचस्पतिमिश्रा भामत्याम् "एतेनयोगः प्रत्युक्त" इति सूत्रं विवृण्वानाः—"नानेन योग शास्त्रस्य हैरण्यगर्भपातञ्जलादेः सर्वथा प्रामाण्यं निराक्रियते, किन्तु जगदुपादानस्वतन्त्रप्रधानतद्विकारमहदहङ्कारपञ्चतन्मात्रगोचरं प्रामाण्यं नास्तीत्युच्यते। न चैतावतैषामप्रामाण्यं भवितुमर्हति, यत्पराणि हि तानि तत्राप्रामाण्येऽप्रामाण्यमश्नुवीरन्। न चैतानि प्रधानादिसद्भावपराणि, किन्तु योगस्वरूपतत्साधनतदवान्तर फलविभूतितत्परमफलकैवल्यव्युत्पादनपराणि। तच्च किंचिन्नीमित्तीकृत्य व्युत्पाद्यमिति प्रधानं सविकारं निमित्तीकृतम्, न तु तद्विवक्षितम्' इत्यादिना। अनेन हि स्पष्टमेव योगस्य तत्त्वनिरूपणप्रवणत्वं निराकृतमेव। तथैव तत्र शङ्करभगवत्पादैरपि किमिति सांख्यात्पृथग्योगनिराकरणं प्रस्तुतमित्यशंक्य योगोक्तयमनियमासनादीनां श्रुतावप्युपलम्भाद्योगस्य शिष्टतमैरप्यङ्गीकृतत्वात्, तत्प्रतिपादितचित्तवृत्तिनिरोधोपायेषु कस्यापि विप्रतिपत्त्यभावाच्च तत्प्रामाण्ये सुदृढे तत्रैव शास्त्रे प्रसङ्गप्रतिपादितानां प्रधानकारणत्वादीनामपि स्थालीपुलाकन्यायेन प्रामाण्यं मा प्रसाङ्क्षीदिति

भूयोऽपि तन्निराकरणोद्योग इत्येवं समाहितम्। तेन च स्फुटं योगस्यात्मादितत्त्वनिरूपणेऽप्राधान्यं ख्यापितमेव। तस्मात्सर्वदर्शनानामुत्तराङ्गभूतमिदं निदिध्यासनसाधनसमर्थकं योगशास्त्रं न त्वेव दर्शनेष्वन्तर्भूतमित्यवश्यमनुमन्तव्यम्। यद्यपि चोपपत्तेरिव निदिध्यासनस्याप्यस्ति दर्शनहेतुत्वमिति तत्प्रतिपादकेऽपि शास्त्रे दर्शनव्यपदेशो न्याय्यः, अथापि तु परस्परमुपपत्तिमवलम्ब्य विप्रतिपन्नानां षण्णां दर्शनानां प्रस्तावे न तस्य पृथक् परिगणनमुचितम्, तस्य विभिन्नविप्रतिपत्तिसमर्थकत्वानुपलब्धेः। तद्यदि भवेदपि योगस्य दर्शनत्वमभिप्रेतम्, अथापि सांख्योत्तराङ्गतैवास्य भवेन्नतु पृथग् दर्शनत्वम्। सोऽयमपि शिष्टसमादृतः पन्थाः। तथा हि सांख्यभाष्यकृद्विज्ञानभिक्षुरपि—

"सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः"

इत्यादिवचनान्यवलम्ब्योपपत्त्या सांख्यापृथक्त्वमेव योगस्य समर्थितवान्। नास्ति च पृथग्दर्शनत्वप्रयोजिका सांख्येन सह योगस्य पदार्थनिरूपणे कापि विप्रतिपत्तिः। केवलन्तु सांख्येनोपेक्षितः पुरुषविशेष ईश्वरश्चेतः प्रणिधानार्थमुपयुक्तो योगे विशिष्याभ्युपगतः। तामिमां क्षुद्रामपि विप्रतिपत्तिं यदि गणयेम, अथापि शाखाभेद एव सोऽयं स्यान्न तु दर्शनभेद इति विविच्यतां सुधीभिः। तस्मात्सांख्यस्यैव योगस्य नास्ति पृथग् दर्शनत्वम्, अपि त्वदर्शनत्वम्—सांख्येन सहैकदर्शनत्वं वेति सिद्धमेतत्। अथ विनिगमनाविरहाद्विपरीतमेव किं न स्यात्, अस्तु योगस्य दर्शनत्वम्, अस्तु च सांख्यस्य तदनुवादकत्वेन तच्छाखात्वमिति यदि कश्चिदाक्षिपेत्—तदेतदविचारात्। उपक्रमात्प्रभृत्यासमाप्तेः पदार्थनिरूपणपरस्य सांख्यस्य दर्शनताया वज्रलेपायमानत्वात्। योगस्य त्वन्यपरस्य प्रसङ्गात्तदर्थानुवादकत्वमेव युक्तमिति स्फुटमुपक्रमोपसंहारविदां परिशीलितदर्शनानाम्।

न्यायस्य विद्यात्वम्

अथैवमेव गौतमोपज्ञस्य तर्कशास्त्रापरपर्यायस्य न्यायस्यापि नास्त्येव दर्शनत्वं विचारसहम्, आन्वीक्षिक्यपरपर्यायायास्तर्कविद्याया एव तत्र प्राधान्येनाधिकृतत्वात् । स्फुटं ह्येतदुररीकृतं प्रथम एव सूत्रे भाष्यकृता भगवता वात्स्यायनेन । अत एव च सूत्रकृतापि भगवता गौतनेनादिमे सूत्रे न किल दर्शनानां मुख्यप्रतिपाद्याः पदार्था निरूपणीयतया प्रतिज्ञाता अपित्वान्वीक्षिक्यां विद्यायां प्राधान्येनोपयुक्ताः प्रमाणप्रमेयसंशयादय एव पदार्थास्तत्राधिकृताः । प्रमाणादयोऽपि हि दर्शनेषु प्रसङ्गात्प्रतिपाद्यन्त इति सत्यम्, न तु तत्र ते भवन्ति प्राधान्येनाधिकृताः, यस्य कस्यचन प्रमेयस्यैकदेशानामप्येकदेशतामेव तत्र ते भजन्ते । न हि जगत्तत्त्वनिरूपण-प्रस्तावे प्रथममेव प्रमाणसंशयदृष्टान्तवादजल्पवितण्डादीन् कश्चिदनुन्मत्तः पदार्थेषु परिगणयेत् । एवं हि जागतानां पदार्थानामानन्त्यादानन्त्यप्रसङ्गात् ।

प्रमेयाण्येव हि गौतमपरिगणितान्यधिक्रियन्ते दर्शनान्तरेषु । अन्ये तु पदार्थास्त-दङ्गतयैव भवन्ति प्रतिपाद्याः । तस्मात्तर्कविद्यायामेवोपयुज्यमाना इमे गौतमपरि-गणिताः षोडश पदार्थाः । यद्यपि च दर्शनान्तरेषु प्रमाणसंशयादय इवेहाप्यान्वी-क्षिक्यां सपरिकरं भगवता गौतमेन निरूपितानि प्रमेयाणीति समान इवायं दर्शनान्तरैरस्य निरूपणक्रमस्तथापि खलु प्राधान्याप्राधान्यकृतः सुमहान् विशेषोऽनुसन्धेयः । दर्शनेषु तावत्प्रधानं प्रमेयनिरूपणम्–तन्निरूपणाङ्गभूतं तु क्वचित्संशय-तर्कादिनिरूपणम् । इह तु किलान्वीक्षिक्यां प्रधानं प्रमाणसंशयतर्कादिनिरूपणमेव, तत्त्विदं प्रमाणतर्कादिनिरूपणं नतरां निरालम्बं सुविज्ञानाय कल्पत इत्यालम्बन-तयात्र गृहीतानि प्रमेयाणि । तत्र यद्यपि यत्किञ्चिदेव प्रमेयमवलम्ब्य शक्यते तर्कः प्रवर्तयितुम्, अथापि ननु मुनीनामध्यात्ममेवाभिनिवेशादध्यात्मविद्योपयुक्तान्येव

प्रमेयाण्यवलम्बितानि भगवता गौतमेन । तदेतदाह तत्रभवान् भाष्यकारः–"तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमार्थं यथाविधं वेदितव्यम्–इह त्वध्यात्मविद्यायामात्मादि-तत्त्वज्ञानम्, निःश्रेयसाधिगमोऽपवर्गप्राप्तिः" इति । अयमत्राशयः—यदेव खल्वा-लम्ब्यतर्कः प्रवर्त्येत, तस्यैव पदार्थस्य तत्त्वज्ञानान्निःश्रेयसस्य तज्जन्यपरमफलस्य प्राप्तिरवश्यं संपद्येत । इह त्वध्यात्मविद्यैव तर्कालम्बनभूतेति तत्तत्त्वज्ञानान्निः–श्रेयसाधिगमो मोक्षप्राप्तिरेव विवक्षितेति । तस्मात्सत्यप्यात्मादितत्त्वनिरूपणे सपरिकरे तत्परत्वाभावान्नास्य तर्कशास्त्रस्य दर्शनत्वमपि तु तर्कप्रतिपादनपरतया तर्कविद्यात्वमेवेति कृतं प्रपञ्चेन । सा त्वियं तर्कविद्या सर्वेषामपि दर्शनानां पूर्वाङ्गभूतेत्यन्यदेतत् ।

अथ यद्येवमतत्परत्वेऽप्यात्मादितत्त्वनिरूपणमात्रेण दर्शनत्वं न्यायस्याभ्युपगम्ये-तापि, अथापि तु काणादेन वैशेषिकशास्त्रेणैकदर्शनत्वमेवास्य भवेन्न तु पार्थक्यम् । कणादाभ्युपगतानामेव तत्त्वानां गौतमेन विशिष्य तर्कपुरःसरं समर्थितत्वात् । न ह्यात्मादितत्त्वेष्वालोक्यते कणादेन गौतमस्य मनागपि विप्रतिपत्तिर्यया पृथग् दर्शनत्वमनुमन्येमहि । यास्त्विमाः कणादगौतमयोः पदार्थसंख्याविप्रतिपत्तिः, प्रमाण-संख्याविप्रतिपत्तिः, पीलुपिठरपाकादिविप्रतिपत्तिश्चेति तिस्रो विप्रतिपत्तय आधुनि-कैरुद्भाव्यन्ते ता अविचारितरमणीयाः । गौतमेन ह्यान्वीक्षिक्यां विद्यायामुपयुक्ताः षोडष पदार्थाः संगृहीताः, कणादेन तु जागताः सर्वेऽपि षट्सु संगृहीता इति विभिन्नविषयकत्वेन पदार्थसंख्याविप्रतिपत्तेः प्रागेव निरस्तत्वात् । समान एव हि विषये विप्रतिपत्तिः प्रसरेत् । न हि मनुष्याः पञ्च, पशवः सप्तेति विभिन्न संख्याभिधायिनावपि पुरुषौ विप्रतिपन्नतया केनापि व्यवह्रियेते प्रज्ञाचणेन । समाहितश्चान्वीक्षिकीमेवाभ्युपगम्य षोडशपदार्थवादो भाष्यकारेणेति तदनालोचन-

विजृम्भितमेवेदं नव्यानाम् । अन्ततश्चार्वाचीना अपि नैयायिकाः षोडष पदार्थान् षट्षु पदार्थेष्वेव महताडम्बरेणान्तर्भाव्य विप्रतिपत्तिमभ्युपगम्यापि संप्रतिपत्तिमेव साधयन्तीति न ततोऽपि सिद्धयति दर्शनपार्थक्यम् । वस्तुतत्त्वालोचने त्वन्तर्भाव-कथापीयमबोधविजृम्भणमिति प्रकरणभेदाभ्युपगम एव न्याय्यः । इदन्तावदन्तर्भाव-मभ्युपयन्तः प्रष्टव्याः–यथा गौतमोक्ताः षोडशपदार्थाः षट्सु कणादोक्तेषु भवद्भिरन्तर्भाव्यन्ते–तथैव ननु कणादाभ्युपगताः सामान्यसमवायादयो गौतमीयेषु कुत्रान्तर्भाव्यन्ते ? इति । न चैतावता गौतमीये तेषामनभ्युपगमसिद्धौ विप्रतिपत्तिरेव सुष्ठु साधितेति सांप्रतं वक्तुम्–"न घटाभावसामान्यनित्यत्वात्" इत्यादिषु सूत्रेषु स्फुटं तत्तेषां पदार्थानामुल्लेखदर्शनेनानभ्युपगमासिद्धेः । वैशेषिकसाधारण्यां च निरूपणप्रक्रियायां तत्तत्पदार्थाभ्युपगमस्य बलाद्गले पतितत्वात् । तत्त्वतस्त्विदमप्य-त्यल्पमुक्तम् । पृथिव्यादीनां संख्यादिद्रव्यगुणानां कर्मणां चेत्यादिबहुतराणामेव पदार्थानां गौतमीयेषु षोडशसु पदार्थेष्वन्तर्भावासिद्धेः । 'आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्' इति तत्परिगणितेषु द्वादशसु प्रमेयेष्व-र्थपदेन सर्वेऽपि पदार्थाः संगृहीता भविष्यन्तीति तु साहसमात्रम् । स्वयमर्थान् परिगणयता सूत्रकृतैव 'गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः' इति सूत्रेणार्थपदस्येन्द्रियार्थभूतगन्धादिमात्रपरत्वाभ्युपगमात् । यद्यपि त्वभियुक्ततमा अपि बहुशःपदार्थानत्रान्तर्भावयितुं बहुतरं क्लिश्यन्ति व्याचक्षते च सूत्रम् "गन्धर-सरूपस्पर्शशब्दाः, पृथिव्यादयः–पृथिव्यप्तेजांसि, गुणाश्च–संख्यासंयोगस्नेहादयः, आश्रिततत्वेनोपचारात् कर्मसामान्यादयश्च तदर्थाः (इन्द्रियार्थाः)" इति (तात्पर्य-टीकायाम्) तथापि त एते व्याख्यातार एवैतेन स्वीयमप्रतिहतं पाण्डित्यं प्रख्या-पयन्तु नाम यथेष्टम् । न तु सूत्राक्षरस्वारस्येन नापि वार्थपरीक्षाप्रकरणैकवाक्यतया सोऽयमर्थः सिध्यतीति स्फुटमेव तद्ग्रन्थपरिशीलिनाम् । एतावतापि चेन्द्रियार्थमा-

त्रस्यैवात्र परिगणनस्याप्रत्याख्येयतयाऽतीन्द्रियाणामाकाशकालादिद्रव्याणां, गुरुत्वा-दिगुणानां, परमाणुकर्मणां, परमाणूनामेव चात्रान्तर्भावो नैव सर्वथा शक्यः समर्थ-यितुम्–तेषामिन्द्रियार्थत्वाभावात् । कथं चैतावत्पदार्थानभ्युपगमे दर्शनमिदं गौतमस्य वैकल्यदोषात्परिमोच्येत ? तस्माज्जगत्तत्त्वनिरूपणोपयुक्ताः पदार्थाः साकल्येन नैव भगवता गौतमेन परिगणिताः, अपि तु कणादोक्तांस्तानेव यथावस्थि-तमभ्युपगम्य तदवलम्बनमात्रेण न्यायः प्रवर्तितः, गौतमोक्तास्तु पादार्थास्तर्कविद्यो-पयुक्ता एवेत्यकामेनाप्यवश्यमभ्युपगन्तव्यम् । सपरिकरात्मतत्त्वविज्ञानस्यैव सर्वानर्थ-प्रहाणहेतुतया तस्यैव सर्वोत्कर्षविशिष्टं प्रमेयत्वमभिधातुमिव प्रमेयेष्वपि भगवता गौतमेनैकादशभिः परिकरैः सहात्मैवोद्दिष्टोऽन्ये तु पदार्था दर्शनेषु निरूप्यमाणा अप्युपेक्षिता एव । उक्तं चैतत्तत्रभवता वात्स्यायनेन प्रमेयसूत्रं विवृण्वता–'अस्त्य-न्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमेयम्, तद्भेदाच्चापरिसंख्येयम्–अस्य तु तत्त्वज्ञानान्निःश्रेयसाधिगम इतीदमेवादृतं सूत्रकृता' इति । अनेन च स्फुटमेव द्रव्यादीनां सर्वेषामत्रान्तर्भावः सूचितः । निश्रेःयससाधनज्ञानस्य प्रधान-विषयतयैव चामीषामात्मादीनामत्र प्राधान्येनोल्लेखो न त्वितरानभ्युपगमादिति विप्रतिपत्त्यभावोऽपि चाख्यात एवेति कृतमतिशयितया प्रसक्तानुप्रसक्त्या । तदित्थं पदार्थसंख्याविप्रपतिपत्तिर्नास्त्येव गौतमकणाददर्शनयोरितिप्रदर्शितमेतत् । पीलुपिठर-पाकादिविप्रतिपत्तिस्तु सूत्राक्षरासंस्पृष्टेति पाकप्रकरण एव विशिष्य विवेचयि-ष्यामः । यापि चेयं प्रमाणसंख्यायां दर्शनयोरनयोर्विप्रतिपत्तिरुद्भाव्यते–गौतमीये प्रमाणचतुष्टयस्य काणादे तु प्रमाणद्वयस्यैवाभ्युपगमर्शनात्, सोऽयमपि नाममात्रे विवादो न तु वस्तुनि । न खलु भगवान् कणाद उपमानस्य शब्दस्य वा प्रामाण्यं नाभ्यनुजानाति, नापि तत्र प्रामाण्यस्वरूपे काचिदवान्तरीभूतापि विप्रति-पत्तिः । केवलन्तु तयोरनुमानविशेषतैव कणादेनाभ्युपगम्यते-गौतमेन तु स्वातन्त्र्येण

प्रमाणसंख्यायां ते प्रवेश्येते इति सैषा विप्रतिपत्तिरापाततः प्रतीतापि न पारमार्थिकी ।
विद्यमानापि चैषा एकदेशविप्रतिपत्तिः शाखाभेदमेव प्रयोजयेन्न तु दर्शनभेदम् ।
तस्मात्पृथग्दर्शनत्वप्रयोजिका न्यायवैशेषिकयोर्विप्रतिपत्तिर्न सिध्यतीति सिद्धमेतत् ।
तदित्थं गौतमीयस्य न्यायस्यापि नास्त्येव दर्शनत्वम्–सति वा वैशेषिकेणैकदर्शनत्व-
मेवेत्यतिरोहितमेतत् । अत एव वेदान्तदर्शने सकलदर्शननिराकरणप्रस्तावेऽपि नैव
गौतमदर्शनं पृथङ् निराकृतं शङ्करभगवत्पादैः । प्रमाणतयैव तु तत्र तत्र गौतम-
वचनमुपन्यस्तम्, तर्कविद्याप्रतिपादकगौतमशास्त्रनिराकरणस्याप्राप्तकालत्वात् ।
विद्यास्वपि च तर्कापरपर्यायस्यास्य न्यायस्य परिगणनं दर्शनत्वाभावादेव संगच्छत
इति पूर्वोक्तं नैव विस्मर्तव्यम् ।

अथ सपरिकरात्मतत्त्वनिरूपणप्रवणत्वे दर्शनलक्षणेऽभ्युपेते पूर्वमीमांसायास्तु
नास्ति दर्शनत्वकथापि । कर्मकाण्डनिरूपणपराणि हि ब्राह्मणवाक्यानि सा व्यवस्था-
पयति, न त्वात्मादितत्त्वनिरूपणं स्पृशत्यपि । वाक्यार्थविवेचनमात्रपरस्य च
मीमांसाशास्त्रस्यापि दर्शनत्वे पदविवेचनपराणां व्याकरणादीनामपि तद्दुर्निवारमेव
प्रसज्जेतेति सर्वथा दर्शनव्यावहारसाङ्कर्यप्रसङ्गः । प्रसङ्गागतयत्किञ्चित्तत्त्वनिरू-
पणमात्रेण तु नास्ति दर्शनत्वमित्यसकृदवोचाम । अथैवमुपनिषद्वाक्यार्थव्यवस्थापनाय
प्रवृत्ताया उत्तरमीमांसाया अपि न स्यादेव दर्शनत्वम्, वाक्यार्थनिरूपकत्वाविशेषा-
दिति चेन्नैवम्, उत्तरमोमांसा ह्युपनिषद्वाक्यार्थं व्यवस्थापयन्त्येवोपपत्त्याप्यात्मादि-
तत्त्वनिरूपणं विषयीकरोति । आत्मादितत्त्वनिरूपणायैव तस्या उपनिषद्वाक्यार्थ
व्यवस्थापने प्रवृत्तिः, उपनिपन्मात्रसमधिगम्यमात्ममादितत्त्वमिति तयाभिमननात् ।
उपनिषद्भिश्च यथा किलात्मसाक्षात्कार उपदिश्यते, नैवं कर्मनिरूपणपरेण ब्राह्मणेन
धर्मस्य साक्षात्कारः, धर्मस्योत्पाद्यत्वेनासाक्षात्करणीयत्वादित्युक्तमधस्तात् । ततश्चा-

पनिषद्वाक्यार्थमीमांसायाः साक्षात्काराख्यदर्शनहेतुत्वाद्दर्शनत्वं संभवेदेव, पूर्वमीमां
सायास्तु दर्शनाहेतुत्वादेव नैव संभवतीति सुकरमेतत्प्रतिपत्तुम् । आस्तां वा
उत्तरमीमांसाया दर्शनत्वं च मीमांसात्वं चेत्युभयमपि, उपनिषद्वाक्यार्थनिरूपणांशे
मीमांसात्वम्, उपपत्त्यात्मादितत्त्वनिरूपणांशे च दर्शनत्वमित्यंशभेदेनोभयोरप्य-
विरोधात् । मीमांसांश एव चानया पूर्वमीमांसा निराक्रियते न तु दर्शनांशे, पूर्व-
मीमांसायां दर्शनांशाप्रतिपादनादिति सर्वं समञ्जसम् । तस्मात्पूर्वमीमांसेयं विद्यैव
भवितुमर्हति न दर्शनम् । उत्तरमीमांसातु विद्या च दर्शनं चेत्युभयमपीत्याकल-
यन्तु सुधियः ।

तदित्थं योगन्यायमीमांसानां त्रयाणां निराकृते दर्शनत्वे सांख्यवैशेषिकवेदान्ता-
ख्यानि त्रीण्येव वैदिकदर्शनानीति संसिद्धम् । दर्शनानां षट्संख्या पूरणन्तु
लौकायतिक–वैनाशिक–स्याद्वादाख्यैस्त्रिभिः श्रुतिविप्रतिपन्नैर्दर्शनैरेव । न च श्रुति-
विप्रतिपन्नानामात्मादितत्त्वनिरूपणमप्रामाणिकमिति नोचितं तेषां दर्शनत्वमिति
सांप्रतं वक्तुम् । यतः श्रुत्यनुकूलेष्वपि दर्शनेषु कस्यचिदेकस्यैव मुख्यं प्रामाण्यं
भवेन्न तु परस्परं विप्रतिपन्नानां सर्वेषामपि भवितुमर्हति प्रामाण्यम्, वस्तुनि
विकल्पासंभवादित्यन्येषामदर्शनत्वमेवापद्येत । तस्मादात्मादितत्त्वनिरूपणमात्रादेव
दर्शनत्वं सर्वत्रैवाप्रतिहतमनुसन्धेयम् । सम्यग्दर्शनत्वं तु कस्येति दुर्निर्धारमिदम् ।
सर्वेषामेव स्वस्वदर्शने सम्यग्दर्शनत्वाभिमानात् । वस्तुतस्तु तदेतत्तृतीये रहस्य-
स्कन्धे निपुणतरमुपपादयिष्यामः । तदित्थमात्मादितत्त्वनिरूपकाणि षडिमानि
दर्शनानि संसिद्धानि क्रमेण–लौकायतिकम्, वैनाशिकम्, स्याद्वादः, वैशेषिकम्,
सांख्यम्, वेदान्तश्चेति । लौकायतिकं चार्वाकमित्यनर्थान्तरम्, वैनाशिकं सौगतं
बौद्धमिति च, स्याद्वादो जैनमार्हतं च नातिरिच्यते, वैशेषिकं काणादमौलूक्यमिति

समानोऽर्थः, प्राधानिकं प्राकृतिकं सांख्यं चैकमेव, शारीरकमुत्तरमीमांसा वेदान्तो ब्रह्मदर्शनमिति पर्यायशब्दाः । तेष्वेषु षट्सु दर्शनेष्वाद्यानि त्रीणि श्रुतेः प्रामाण्यं नाभ्युपगच्छन्तोति स्वस्वतीर्थंकरवचनानि युक्तिविशेषाँश्चावलम्ब्य स्वं स्वमर्थमातिष्ठन्ते । उत्तराणि तु त्रीणि श्रुतेः प्रमाण्यमभ्युपयन्त्यपि युक्तिविशेषपुरःसरं श्रुतेरर्थमन्यथान्यथैव व्याचक्षाणा विवदन्ते । अन्यानि तु भवेयुर्यदि कानिचन दर्शनानि, तर्ह्यत्रैव तानि यथायथमन्तर्भाव्यानीति सर्वं सुस्थम् ।

अथ परे त्वन्यथाप्याहुः । अस्ति किल क्रमानुष्ठेयानां कर्मोपासनाज्ञानानां प्रतिपादकं श्रुतेरपरभागभूतानां ब्राह्मणानां काण्डत्रयम् । तत्रेदमाद्यं सामान्येन ब्राह्मणशब्देनैवापरे त्वारण्यकोपनिषच्छब्दाभ्यां व्यवह्रिते द्रष्टव्ये । तेषामेषां सुविविच्यार्थव्यवस्थापनाय तदुक्तार्थानामुपपत्त्यादिभिरुपबृंहणाय च प्रवर्तत इदंमीमांसात्रयम्—कर्ममीमांसा, भक्तिमीमांसा, ब्रह्ममीमांसा चेति । तत्र वेदानां सर्वोत्तमभागभूता अत एव च वेदान्तपदवेद्या या इमा उपनिषदस्तत्तदर्थविवेचकत्वेन कर्मादुत्तरमुपयुज्यमानतया चेयं ब्रह्ममीमांसैवोत्तरीमांसा च वेदान्त इति च व्यपदिष्टा द्रष्टव्या । तस्या एव च मतपार्थक्यात्पृथक्पृथगर्थव्यवस्थापकास्तदंशप्रतिपाद्यैकैकार्थव्यवस्थापका वा शास्त्रविशेषाः केचन दर्शनानीति सर्वैर्व्यवह्रियन्ते । केषांचित् तद्विरुद्धार्थव्यवस्थापकत्वोपगमेपि च तत्प्रतिपाद्यार्थनिरूपकत्वमविशिष्टमिति तेषामपि दर्शनत्वे नास्ति विवादः । तत्त्वतस्तु नास्ति विरोधकथापि, एकैकांशप्राधान्याभ्युपगममात्रादेव भासते विरोधः । षट्त्वप्रवादोऽपि चैषां दर्शनानां प्रमेयषट्त्वनिबन्धनः । भवन्ति किल पञ्च कोशास्तुरीय आत्मा चेति षडिमे विवेच्याः । तेष्वेवैकैकस्य प्राधान्यविवक्षया दर्शनेष्वपि संभवति षट्त्वमिति रहस्यप्रकरणे स्फुटं निरूप्येत । तदित्थमत्र कल्प उपपन्नं षट्त्वम् । भक्तिमीमांसामपि त्वेकेऽत्रैवान्तर्भावयन्ति, आरण्यकोपनिषदां विषयविभागस्य दुष्करत्वेन तन्मीमांसयोरप्येकान्ततः

पार्थक्यस्यानौचित्यात् । तथा च तन्मत औपासनिकान्यपि सन्ति कानिचन दर्शनानीति षट्त्वमिदं नकान्ततो निरुच्य शक्यमवस्थापयितुम् । नास्ति च दर्शनानां षट्त्वएव विशिष्य किमपि मानमभियुक्ताभ्युपेतमिति त आशेरते । तयानया विधया संभवत्येवाधिक्यमपि दर्शनानाम्, भवेदेवच प्रकारान्तरेण ततोऽप्याधिक्यम् ।

—:०:—

श्रुतिषु दशवादाः

सोऽयं विश्वोत्पत्तिविचारः ऋग्वेदकालादारभ्य अद्यापि प्रक्रान्तो वर्तते । तदिहापि संक्षेपेण निरूप्यते । ऋग्वेदस्य दशममण्डले नासदीयसूक्ते दशवादानां विचारः प्रदर्शितः । जगन्मूलकारणविषये श्रुतिष्वपि मतभेदा प्रथिताः । ते च दशधेति श्रुतिषु व्याख्याताः । इयं विश्वोत्पत्ति जिज्ञासा तैत्तिरीय ब्राह्मणे आम्नाता ।

"किं स्विदवनं क उ स वृक्ष आसीद् यतो द्यावा पृथिवी निष्टतक्षुः ।
मनीषिणो ! मनसा पृच्छते दु तत् यदध्यतिष्ठद् भुवनानि धारयन् ।"
(तैत्तिरीय ब्राह्मण २।८।९)

तत्रैवोत्तरमाह—

"ब्रह्मवनं ब्रह्म स वृक्ष आसीद यतो द्यावा पृथिवीनिष्टतक्षुः ।
मनीषिणो! मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानिधारयन् ।।"
(तैत्तरीयब्राह्मण २।८।९)

एवञ्च विशेष जिज्ञासायां ऋग्वेदस्यदशमेमण्डले नासदीय सूक्ते आम्नायते—

"नासदासीन्नोसदासीत्तदानीं नासीद्रजो नव्योमापरोयत् ।
किमावरीवः कुह कस्य शर्मन् अम्भः किमासीत् गहनं गभीरम् ।।

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः ।
को अद्धावेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः ॥
आवर्वाग् देवा अस्य विसर्जने ना को वेद यत् आबभूव ।
इयं विसृष्टिर्यत् आबभूव यदि वादधे यदिवा न ॥
यो अस्याध्यक्षः परमे व्योमन् सो अङ्गवेद यदि वा न वेद ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्नपरः किञ्चनास ॥

एवमुपरि आम्नातासु ऋक्षु—

१—सदसद्वादः
२—रजोवादः
३—व्योमवादः
४—आवरणवादः
५—अम्भोवादः
६—अमृतमृत्युवादः
७—अहोरात्रवादः
८—दैववादः
९—सदेहवादः
१०—सिद्धान्तवादश्च निरूपितः । एतेषां वादानां संक्षेपतो विशेषतश्च परिचयो विद्यावाचस्पति श्री मधुसूदनमहाभागानां 'दशवादरहस्यम्' 'सदसद्वादः' 'रजोवादः' 'व्योमवादः', आवरणवादः', 'अम्भोवादः', अमृतमृत्युवादः', 'अहोरात्रवादः', 'दैववादः', 'संशयतदुच्छेदवादः', 'सिद्धान्तवादश्च' इति ग्रन्थेभ्यो अवगन्तव्यः । एतेषांमध्य एव "आनीदवातं स्वधया तदेकंतस्माद्धान्यं न परं किञ्चनास"—

इत्यादिना जगन्मूलतत्त्वविषये सिद्धान्तोऽपि प्रदर्शितः । आस्तामेतस्य सर्वस्य प्रपञ्चःविद्यावाचस्पतीनां ग्रन्थेभ्य एवावगन्तव्यः ।

मध्ययुगे एषां दर्शनानां विशेषो विकासः समजनि । एवञ्च व्यापक विश्वोत्पत्तिविचारं परित्यज्य केवलं जीवात्मविचार एव दर्शनानां विषेशक्षेत्रतां गतः । तदनुरोधेन दर्शनानामष्टादशधा भेदः समजनि । तदित्थं दर्शनानां प्रभेदः नास्तिकास्तिकदृष्टिमवलम्ब्य । तत्रास्तिकदर्शनेषु कर्मतन्त्राणि, ज्ञानतन्त्राणि, भक्तितन्त्राणि च दर्शनानि प्रथितानि प्रसिद्धि गतानि ।

तदथोऽति संक्षेपतो निरूप्यते—

चार्वाकः

नास्तिकदर्शनानि—तेषां नास्ति ईश्वरः, नास्तिवेदप्रामाण्यम् इत्यातिष्ठमानाः केवल युक्तिमुपष्टम्भमानाः नास्तिकाः । तेषु प्रथमः "चार्वाकः" । तन्मते नापि कश्चन् सर्वज्ञ ईश्वरः, न जीवः, न धर्माधर्मौ, न च तत्फलं, न च परलोकः, नापि मोक्षः । तथा च तन्मतम्—

"एतावानेव लोकोऽयं यावानिन्द्रियगोचरः ।
भद्रे ! वृकपदं पश्य यद्वदन्ति बहुश्रुताः ॥"

पृथिव्यप्तेजोवायवः चत्वारि भूतानि, प्रत्यक्षमेवैकं प्रमाणम्, पृथिव्यादिभूत संघात एव शरीरं, मद्याङ्गे मदशक्तिरिव चैतन्यं जीवात्मा तत्र जायते । शरीर नाश एव मोक्ष इति ।

—:०:—

"बौद्धाः"

बौद्धानां दर्शने बुद्धो देवता । दुःख-समुदय-मार्ग-निरोधरूपाणि आर्यसत्य-संज्ञानि चत्वारि संज्ञानि । प्रत्यक्षमनुमानं चेति द्वे प्रमाणे । सर्वक्षणिकत्व-सर्वनैरात्म्यवासनामोक्षमार्गः । वासनावलेशसमुच्छेदे प्रदीपस्येव ज्ञानसन्तान-स्योच्छेदो मोक्षः । ते चैते चतुर्धा विभिद्यन्ते । भगवता बुद्धेन जगद्विषये सूत्रचतुष्टयं वाचितम्—

१—क्षणिकम् क्षणिकम्

२—स्वलक्षणम् स्वलक्षणम्

३—दुःखम् दुःखम्

४—शून्यम् शून्यम्

तत्रादिमे सूत्रत्रये न कस्यापि विप्रतिपत्तिरासीत् । चतुर्थे तु विप्रतिपद्य तच्छिष्याश्चतुर्विधत्वं गताः

१—माध्यमिकाः —

तत्रैतद्यदि सर्वथा शून्यं तर्हि कथं भासते इत्यविचार्यैव—
"अन्तःशून्यं बहिः शून्यम्" इति माध्यमिका प्रतिपन्नाः ।

२—विज्ञानवादिनः —

द्वितीयास्तु विज्ञानवादिनः । बहिस्तु शून्यमस्ति, परमन्तःकरणमेव विचित्रभेदं सर्वविधमुपदर्शयति । एते विज्ञानास्तित्ववादेन वैज्ञानिका उच्यन्ते ।

३—सौत्रान्तिकाः —

यदि बहिर्नास्ति तर्हि अन्तःकरणमपि कथं तद्दर्शयेत् । बाह्यसंयोगं विनान्तः-करणस्य वैचित्र्यादर्शनात् । तस्मादन्तःकरणवृत्तिविहित एव बाह्योऽर्थोऽप्यनुमेय इति ये प्रतिपन्नास्ते सौत्रान्तिकपदेनोच्यन्ते, सूत्रास्यान्ते समीपे गमनात् ।

४—वैभाषिकाः —

यदि बाह्योऽर्थः कस्यापि न स्यात् तर्हि तत्रानुमानमपि कथं प्रसरेत् । अनुमितेः प्रत्यक्षमुखेनैव प्रवर्तमानत्वात् । तस्माद वैराग्यभावनायैव गुरुभिरिदमुप-दिष्टमिति ये प्रतिपन्नास्ते गुरोर्विरुद्धार्थभाषित्वात् वैभाषिकपदतां गता इति चतुर्विधानि प्राधान्येन बौद्धमतानि ।

—:०:—

'जैनदर्शनम्'

जैनास्तु द्विधा विभिद्यन्ते—

१—दिगम्बराः

२—श्वेताम्बराश्च

एतेषामर्हन् देवता ।

तत्वानि तु

१—जीवः

२—अजीवः

३—पुण्यम्

४—पापम्

५—आश्रवः

६—संवरः

७—बन्धः

८—निर्जरा

९—मोक्षः इति नव ।

१—प्रत्यक्षं परोक्षं चेति प्रमाणद्वयम् ।

नित्यानित्याद्यनेकान्तवादः सम्यग्दर्शनज्ञान-चारित्राणि मोक्षमार्गः ।

सकलकर्मक्षये नित्यज्ञानानन्दमयो मोक्षः ।

दिगम्बराः—

ये निरावरणास्ते दिगम्बराः । तेषां सिद्धान्तः यत्—

"जीवस्यावरणं देहो देहस्यावरणं कुतः ।
तस्यापि तदपेक्षा चेत्तस्यापीत्यनवस्थितिः" ।

श्वेताम्बराः —

ये तु श्वेतं वस्त्रं धारयन्ति ते भवन्ति श्वेताम्बराः । सांसारिकाचरणे स्वच्छत्वमिमे बहिरपि दर्शयन्ति इति श्वेताम्बरा उच्यन्ते ।

तानीमानि त्रीणि वेदस्य प्रामाण्यं न स्वीकुर्वन्तीति नास्तिकदर्शनान्यप्युच्यन्ते । अन्यानि तु वेदप्रामाण्यमभ्यु पेतानि—

१—वैशेषिकम्

२—न्यायः

३—सांख्यम्

४—योगः

५—पूर्वमीमांसा

६—उत्तरमीमासा चेति

षड् दर्शनानि प्रसिद्धानि । वस्तुतस्तु षडप्येतानि त्रिष्वेवान्तर्भवन्तीति । व्याख्यातपूर्वम् ।

—:०:—

"वैशेषिकम्"

कणादमहर्षिणा प्रोक्तमिदं दर्शनम् । अत्र

१—द्रव्य—

२—गुण—

३—कर्म—

४—सामान्य—

५—विशेष

६—समवायाख्यानि षट् तत्त्वानि ।

१—प्रत्यक्षम्

२—अनुमानम्

३—आगमश्चेति प्रमाणत्रयम् । आत्मनः—श्रवण—मनन, निदिध्यासनैः साक्षात्कारो मोक्षमार्गः ।

१—बुद्धिः

२—सुखम्

३—दुःखम्

४—इच्छा

५—द्वेषः

६—प्रयत्नः

७—धर्मः

८—अधर्मः

९—संस्कारः

एतेषां नव संख्याकानां विशेषगुणानामत्यन्तोच्छेदो मोक्षः ।

न्यायः

१—अथ न्यायः । प्रमाणम् प्रमेयम्, संशयः, प्रयोजनम्, दृष्टान्तः—सिद्धान्तः अवयवा- तर्कः, निर्णयः, वादः,—जल्पः,—वितण्डा—हेत्वाभासाः—छलम्—जातिः—निग्रहस्थानानीति षोडशतत्त्वानि । वस्तुतस्तु एतानि वैशेषिक प्रक्रियायामेवान्त र्भवन्तीति उपोद्घाते निरूपितम् ।

१—प्रत्यक्षम्

२—अनुमानम्

३—उपमानम्

४—आगमश्चेति चत्वारि प्रमाणानि । आत्मा, शरीरं, इन्द्रियाणि, अर्थाः बुद्धिः,—मनः,—प्रवृत्तिः—दोषाः—प्रेत्यभावः,फलम्, दुःखम्, अपवर्ग इत्येतानि प्रमेय तत्वानि । ज्ञानं मोक्षमार्गः, षडिन्द्रियाणि, षड्बुद्धयः, सुखम्, दुःखम्, शरीरञ्चेति एकविंशतिभेदभिन्नस्य दुःखस्यात्यन्तोच्छेदो मोक्षः ।

सांख्यम्

३—**सांख्यम्**—साख्यदर्शनमधुना १ सेश्वरसांख्यं २ निरीश्वरसांख्यं चेति द्विधा व्यवह्रियते । तत्र सेश्वरसांख्ये प्रकृतिः, महान्, अहङ्कारः, शब्दस्पर्श-रूपरसगन्धाख्यानि पञ्चतन्मात्राणि, श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि पञ्च-ज्ञानेन्द्रियाणि, वाक्पाणि-पादपायूपस्थाख्यानि पञ्चकर्मेन्द्रियाणि, आकाशवायु तेजोजलपृथिवीति पञ्चभूतानि चेति, पंचविंशतितत्त्वानि । प्रत्यक्षम्, आनुमानम्, आगमश्चेति प्रमाणत्रयम्, नित्यैकान्तवादः, पञ्चविंशतितत्त्वज्ञानं मोक्षमार्गः । प्रकृति-पुरुष विवेकदर्शनात् निवृत्तायां प्रकृतौ पुरुषस्य स्वरूपावस्थानं मोक्षः । तदिदं सांख्यं चतुर्धा भिद्यते—

१—**आर्षसाङ्ख्यम्**—महर्षिणा कपिलेन भाषितमार्ष साङ्ख्यम् ।

२—**योगसाङ्ख्यम्**—पतञ्जलिना प्रोक्तं योगसांख्यम्, अत्रहि समाधिभाव-नार्थमीश्वरोऽभ्युपगतः ।

३—**राजसांख्यम्**—

४—**पुराणसाङ्ख्यम्**—पुराणेषु यत्सांख्यं विवृतं तत्पुराणसांख्यम् । अत्रहि स्वतन्त्रा प्रकृतिर्नाभ्युपगम्यते अपितु ईश्वरपरतयैव । ईश्वर एव सर्वनियामक इति प्रतिपादितम् ।

पूर्वमीमांसादर्शनम्

५—**पूर्वमीमांसादर्शनम्**—महर्षिजैमिनिना प्रोक्तमिदं जैमिनीयं दर्शनम् । अत्रदर्शने कश्चन सर्वज्ञो देवो नास्ति । किन्तु नित्यवेदवाक्येभ्य एव तत्त्वनिश्चयः । १ प्रत्यक्षम्, २ अनुमानम्, ३ उपमानम्, ४ आगमः, ५ अर्थापत्तिः, ६ आभाव-श्चेति षट्प्रमाणानि । वेदविहितानुष्ठानं मोक्षमार्गः । नित्यनिरतिशयसुखाविर्भावश्च मोक्षः स च वेदोक्तः ।

उत्तरमीमांसा

६—**उत्तरमीमांसा** (वेदान्तदर्शनम्)—ज्ञानेनैव मोक्षः प्राप्यते ।

तदिदं वेदान्तदर्शनमष्टधा विभिद्यते—

१—द्वैतशारीरकम्, २—शुद्धाद्वैत शारीरकम्, ३—द्वैताद्वैतशारीरकम्, ४—विशिष्टाद्वैतशारीरकम्, ५—शुद्धाद्वैतशारीरकम्, ६—निर्विशेषाद्वैतशारीरकम्, ७—चैतन्या-द्वैतशारीरकम्, ८—एकात्मवादशारीरकञ्चेति ।

अथान्ये केचन नास्तिक-प्राकृतिक-प्रपन्नाचार्योपासक-साम्प्रदायिक-तार्किक भेदेन-दर्शनानां षड्विभागं कल्पयन्ति । तानि चैतानि दर्शनानि प्रत्येकं षड्धा तदेवं षट्त्रिंशद्दर्शनानि जायन्ते । तद्यथा—

१—**नास्तिक दर्शनानि**—१-चार्वाकाः, २-माध्यमिकाः, ३-वैज्ञानिकाः, ५-सौत्रान्तिकाः, ५-वैभाषिकाः, ६-स्याद्वादिकाश्चेति नास्तिकदर्शनानि षट् ।

२—**प्राकृतिक दर्शनानि**—१-सांख्यप्रवचनाः, २-शैवाः, ३-पाशुपताः, ४-कारुकाः, ५-कापालिकाः, वैशेषिकाः इति प्राकृतिकदर्शनानि षट् ।

३—**प्रपन्नाचार्यदर्शनानि**—१-निर्विशेषाद्वैतं, २-विशिष्टाद्वैतं, ३-द्वैतं, ४-शुद्धाद्वैतं, ५-द्वैताद्वैतम्, चैतन्याद्वैतमिति प्रपन्नाचार्यदर्शनानि षट् ।

४—**उपासकदर्शनानि**—१-सौराः, २-शाक्ताः, ३-शैवाः, ४-वैष्णवाः, ५-गाणपत्याः, ६-स्मार्त्ताश्चेति उपासकदर्शनानि षट् ।

५—**साम्प्रदायिकदर्शनानि**—१-ऊर्ध्वाम्नायः, २-पूर्वाम्नायः, ३-दक्षिणाम्नायः, ४-पश्चिमाम्नायः, ५-उत्तराम्नायः, ६-अधराम्नायश्चेति षट् साम्प्रदायिकदर्शनानि ।

६—**तार्किकदर्शनानि**—१-शाब्दिकाः, २-मीमांसकाः, ३-नैयायिकाः, ४-आलङ्कारिकाः, ५-पौराणिकाः, ६-ऐतिहासिकाश्चेति तार्किकदर्शनानि षट् ।

इति दर्शनानां विस्तरस्य गणनामात्रमिह कृतम् ।

वयं त्विहात्मादि तत्त्वानां प्राधान्येन प्रतिपादकान्येव तत्त्वानि पूर्वोक्तानि-दर्शनान्याश्रित्य तत्प्रमेयोपनिबन्धे प्रवर्तामहे ।

"आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्"

इति गौतमोक्तेषु द्वादशसु प्रमेयेषु सर्वप्रमेयमूर्धन्यः सर्वविधविचारास्पदमात्मैव तावत्प्रथमोपस्थिततया प्रस्तूयते—

आत्मनिरूपणम् ।

आत्मशब्दोऽयं यद्यपि लोके बह्वर्थ इव प्रतिभासते,—मृदात्मको घट इत्यादावुपादानकारणस्य, प्रस्तरात्मिका प्रतिमेत्यादौ स्वरूपस्य, ममात्मा भद्रसेन इत्यादौ प्रियसहायादेरन्यत्रान्यत्रान्यस्य चान्यस्यात्म-शब्दवाच्यत्वावगमात् । तथापि तु नास्य शब्दस्यास्ति यथानेकार्थत्वं तथेदं तृतीये रहस्यस्कन्ध एव स्फुटं निरूप्येत् । इह तु विचारविषयीभूतोऽयमहमिति प्रतीतिविषयश्चेतनत्वेन प्रतिपन्नः सकलजगद्व्यवहारनिर्वाहक आत्मा । तमेतमात्मानमधिकृत्यैतावत्प्राधान्येन विवेच्यम्,—प्रसङ्गागताश्चान्येऽप्यर्थाः—

कोऽयमात्मा किमाकारः किंगुणः कति भेदवान् ।
नित्योऽनित्योऽथवा सोऽयमवस्थाश्चास्य का इति ॥

तत्र तावदाहुर्बृहस्पतिमतानुयायिनो—

लौकायतिकाः चार्वाकाः

प्रत्यक्षमक्ष्णा गृह्यमाणादस्माच्छरीराद् व्यतिरिक्तो नास्ति कोऽप्यात्मा नामालौकिकः । इदं शरीरमेव ह्यहंकारास्पदमात्मपदवाच्यं भवितुमर्हति, वाच्यवाचकभावविज्ञानस्य लोकव्यवहाराधीनत्वात्, लोके च शरीरस्यैवाहंकारास्पदत्वेन—अहं स्थूलः, अहं कृशः, अहं गौरः, अहं ग्रामं गच्छामि, गृहे तिष्ठामीत्यादिसर्वजनीनानुभवशतेषु सुप्रद्धित्वात् । ममेदं शरीरमित्यादयो भेदव्यहारास्तु मम शिरो, मम कर इत्यादिव्यष्टिव्यवहारसादृश्येन समष्टावपि प्रवृत्ता राहोः शिरः, शिलापुत्र

कस्य शरीरमित्यादिवदौपचारिका एव भवितुमर्हन्तीति न तावन्मात्रेणातिरक्तात्म-
कल्पना युक्ता । येऽपि हि शरीरात्पृथग्भूतं जीवमहंप्रत्ययविषयत्वेनातिष्ठन्ते-तैरप्य-
वश्यं 'मम जीवो दुःखतयोद्विग्नो भ्राम्यतीवे' त्यादिलौकिकव्यवहारेष्वहमास्पदस्य
जीवेनौपचारिक एव भेदोऽवश्यमभ्युपगन्तव्य इति वरं शरीरस्यैवाहंपदवाच्यता-
भ्युपगमः । न चैवं पार्थिवत्वाद्यविशेषादस्मदादिशरीरस्य घटादेश्च सर्वानुभव-
विषयीभूतं वैलक्षण्यं सुतरामपलप्येतेति भ्रमितव्यम् । शरीरेषु चैन्यस्यैवेतरविशेषक-
त्वात् । कुत इदं चैतन्यमितिचेत्संयोगवैलक्षण्यादेवेति ब्रूमः । यथा हि गुड़पिष्टादिषु
प्रत्येकमनुपलभ्यमानापि मदशक्तिस्तत्समष्टिभूतायां सुरायामुपलभ्यते यथा वा चक्र-
युगाक्षोपस्थादिषु प्रत्येकमनुपलभ्यमानापि वहनशक्तिस्तत्समष्टि भूते रथे स्फुटं
विद्योतते,-तथैव किल पृथिव्यादिभूतचतुष्टये प्रत्येकमनुपलभ्यमानापि ज्ञानापर-
पर्याया चैतन्यशक्तिर्भूतचतुष्टयविलक्षणसंयोगविशिष्टेऽस्मिन् शरीरे समुद्भवतीति
किं चित्रम् ? चक्रादिवियोगे रथवहनस्येव प्राणवाय्वादिसंयोगविशेषापगमे विज्ञान-
स्य विनिवृत्तौ शरीरं मृतमिति व्यपदिशन्ति लोकाः । अत एव च 'जीव प्राणधारणे'
'मृङ् प्राणत्यागे' इति जीवमृधात्वोरर्थं व्याचक्षाणाः प्राणवायुसंयोगानुवृत्तिमेव
जीवनं तद्वियोगमेव च मरणमभ्युपगच्छन्तः शाब्दिकाचार्या अपि नूनं नास्मत्तः
प्रतिकूलाः । तथा चैतावतैव चेष्टमाने शरीरेऽस्ति कश्चनात्मपदवाच्यो जीवः, मृते
तु सोऽपसृतोऽनुमातव्य इत्यादिकल्पना अपदार्थविलम्बनाः साहसैकफला एवेति ।
यत्तु चैतन्यस्य संयोगविशिष्टसकलशरीरपर्याप्तत्वेऽङ्गुल्यादियत्किञ्चिद-
वयववियोगेऽपि चैतन्यं विनश्येत्, प्रत्यवयवपर्याप्तत्वे तु शिरःप्रभृतिमर्मविनाशेऽ
प्यन्यचेतनसद्भावान्न विनश्येत्-बहूनां चेतनानां सर्वथानुकूल्यस्यासंभवप्रायतया च
सर्वदोपलभ्यमानमङ्गानामानुकूल्यं नोपपद्येत, नोपपद्येत चैक्यव्यवहार इत्याद्याशङ्कन्ते-
तदेतत्प्रतारणमात्रम् । यथा हि यत्किञ्चिद्बहुतरावयववियोगेऽपि रथस्य वहनशक्तिर्न

प्रतिहन्यते, प्रतिहन्यते तु प्रतिनियतचक्राद्यवयवापगमे, तथैव निर्विशेषमत्रापि यत्कि-
ञ्चिदवयवापगमे चैतन्याविनिवृत्तावपि प्रतिनियतावयवापगमे विनिवृत्तेस्तुल्यन्यायेनो-
पपन्नत्वात् । इदमत्राकूतम्-तत्तासां शक्तीनां समुदायव्यापित्वेऽपि केचिदवयवास्तत्त-
त्समुदायानां तत्तच्छक्त्यावेशे भवन्ति स्थायिभावभूताः, अपरेत्ववयवास्तत्समुदायनिष्ठा
तत्तच्छक्त्यावेशे भवन्ति व्यभिचारिभूताः । तत्रैषां स्थायिभावभूतानामवयवानाम-
पगमे विनश्यति शक्तिः, व्यभिचारिभूतानां त्ववयवानामपगमेऽपि सा तदवस्थैवा-
वतिष्ठत इति न कोऽप्यत्र दोषः । प्रत्युतातिरक्तात्मवादिनामेव दोषोऽयं दुरुद्धरः
प्रसज्जेत । सर्वथा हि शरीरभिन्नस्यात्मनः कोऽयं प्रतिनियतैः शरीरावयवैः
सम्बन्धो ? यत्तदपगमेऽयमपसरति, अन्यावयवापगमे तु नापसरतीति दुर्निर्वाच्य-
मिदम् । एवमेव 'चैतन्यं शरीरगुणश्चेद्रूपादिशारीरगुणान्तरवदुपलभ्येत प्रत्यक्षम् ।
न त्वसावन्येनोपलभ्यते प्रत्यक्षेणेति न शरीरगुणो भवितुमर्हति ।

किं च 'नासतो विद्यते भावो नाभावो विद्यते सतः' इति न्यायेन प्रत्येकं
भूतेष्व परिदृष्टचरस्य चैतन्यस्य संयुक्तेष्वपि नास्ति संभवः, इत्यादयः प्रतक्षिपा
अपि मदशक्त्यादिदृष्टान्तेनैव तूलोत्क्षेपमुत्क्षेप्याः । रूपादिसुरागुणोपलम्भेऽपि
मदशक्तेः प्रत्यक्षमक्षणानुपलम्भात । अवयवेषु गुडादिष्वसत्या अपि तस्याः समुदाये
प्रादुर्भावस्य सर्वानुभावसिद्धत्वाच्चेति । यदि तु कश्चन 'नासतो विद्यते भाव' इति
न्यायमत्यन्तमनुरुन्धानो गुडपिष्टादिष्वपि सौक्ष्म्येण वर्तमानाया एव मदशक्तेः सति
संयोगविशेष आविर्भावमात्रं ब्रूयात्, सोऽयमत्रापि प्रत्येकं भूतेष्वपि सौक्ष्म्येण
चैतन्यमुपकल्पयतु किं नाश्छिन्नम् । अनुपलब्धिस्तु संयोगस्येव व्यञ्जकताभ्युपगमा-
दप्युपपद्येतैव, गुडादिषु प्रत्येकं मदशक्तेरनुपलब्धिवदेवेति । ननु ज्ञानापरपर्यायं
चैतन्यमिदं विशेषगुणो नाम, शक्तिस्तु सामान्यगुण इति नायमेकान्ततो दृष्टान्तोपरोधः
सर्वत्र युक्त इति चेन्मैवं वोचः । सामान्यविशेषगुणादिपरिभाषायाः स्वसंकेतमात्रक-

लिपत्वात् । यथा हि यदुपलभामहे—तथैव तदभ्युपगच्छामो न तु कस्यापि परिभाषामात्रं वयमनुरुन्ध्महे । उभलभामहे तु मदशक्तिचैतन्यशक्योरुत्पत्त्यादिषु सादृश्यमिति तदेवोदाहरामः । ननु शक्तिनाम्ना कंचिदप्रत्यक्षमर्थविशेषमभ्युपयता भवता संज्ञान्तरेण नन्वात्मैवाभ्युपगत इति सोऽयं नाममात्रे विवादो न वस्तुनोत्यापतितमिति चेत्तदेतदम्मदभिप्रायानवबोधात् । न खलु कंचिदपूर्वमर्थं वयं शक्तिनाम्नाभ्युपगच्छामः, यथा तु सुरायां चैतन्याभिभवानुकूला समुपलभ्यते काचन क्रिया, तथैव निर्विशेषं शरीरेष्वपि समुपलभ्यते काचन विलक्षणा क्रियेति सैव ज्ञानपदेन शक्तिपदेन वेति यथाकथंचिद् व्यपदेश्या । सा चेयं संयोगजन्येत्युक्तमेतदस्माभिः । तस्माच्छरीराकारपरिणते भूतचतुष्टये चैतन्यं समुद्भवति प्राणवाय्वादिसंयोगविशेषापगमे तु तत्रैव तद्विनश्यतीति तदाश्रयः शरीरमेवेदमात्मपदवाच्यमिति संसिद्धम् ।

अथ शरीराणामवयवोपचयापचयैरुत्पादविनाशशालितायाः प्रत्यक्षं प्रतिपन्नतया तस्यैव च दर्शनादिकर्तृत्वाभ्युपगमेन बाल्ये विलोकितस्य तारुण्ये स्मरणं नोपपद्येत । बाल्यशरीरस्य तारुण्यशरीरस्य च भिन्नत्वेनानुभवितुः स्मर्तुश्च भिन्नत्वात् । स्मरणानुभवयोश्च सामानाधिकरण्येनैव कार्यकारणभावकल्पनाया आवश्यकत्वात्, अन्यथान्यदृष्टस्यान्येन स्मरणापत्तेः । तस्माद् भिन्नेष्वपि शरीरेष्वभिन्नः शरीरातिरिक्तोऽहंकाराभिनेय आत्मा कश्चिदवश्यमास्थेय इति यदाक्षिपन्ति—तदेतदपि नैव मनोरमं प्रत्यक्षपक्षपातिनाम् । अवयवानामुपचितापचितत्वेऽपि शरीरभेदस्यासिद्धेः । प्रत्युत तदेवेदं शरीरमित्यादि प्रत्यभिज्ञाप्रामाण्येन तत्रैकत्वस्यैव प्रसिद्धेः । अथ भिन्नैः परिमाणादिभिः स्फुटं भिन्नत्वेन प्रतिभासमानं बालशरीरं तरुणशरीरं वृद्धशरीरं च कथमेकमभ्युपगच्छसीति चेदहो भ्रान्तिः । उपचितापचितावयवातिरिक्तं किं तत्र भेदसाधकमिति भवानेव तावन्निर्वक्तु । अन्यौ हि वृद्धिह्रासौ,

अन्यच्च भिन्नत्वम् । न खलु वृद्धिह्रासाभ्यमेव वस्त्वन्यत्वमुपयाति, अपि तु परिणामेनैव । परिणामो हि तत्त्वात् प्रच्युतिः, स त्वत्र नास्ति परिणामः, न हि दुग्धस्य दधित्वमिव शरीरस्याशरीरत्वमत्र केनचित्प्रतिपद्यते । ननु च प्रतिपन्नमेव लघोर्दीर्घत्वमिति कुतो न परिणामः ? मैवम्, शरीरत्वव्याप्ययोरेव लघुत्वदीर्घत्वयोः परिणामेऽपि शरीरत्वस्य निष्प्रत्यूहमनुवृत्तत्वेनात्मान्तरासिद्धेः । अथ तर्हि परिणामाभावे केयं वृद्धिर्नामेति चेदभिनवोत्पन्नावयवान्तरैः संयोग इत्येव ब्रूमहे । एवमपचयोऽपि संयुक्तानामस्थायिभूतानां केषाञ्चिदवयवानां वियोग एवेति नोभयत्रापि शरीरपरिणामाभ्युपगमावसरः । शरीरभेदमभिसन्धित्सता तु भवता पूर्वस्य लघोः शरीरस्य विनाशः, विशालस्य च शरीरान्तरस्य प्रादुर्भाव इत्यभ्युपेयम्; तथा च मध्ये कस्मिँश्चित् क्षणे निःशरीरोऽपि भवतामात्मावतिष्ठेत । ततश्च शरीरान्तरप्राप्त्यभिमुखात्प्रमीतादस्मिन् को विशेष इत्यभिधातव्यम् । निर्विशेषे च बालस्य संबन्धिनां मृत इव तरुणेऽपि सम्बन्धविनिवृत्तौ सर्वोऽप्ययं लोकव्यवहारोऽस्तमुपेयात् । तस्माद् व्यवहारमनुरुन्धानेन भवतापि नास्त्येव शरीरभेद इत्यवश्यमभ्युपगन्तव्यम् । इत्थं च वृथैव तवात्मान्तरकल्पनमिति विचार्यतां मनः प्रणिधाय । अपि च सत्यप्यतिरिक्त आत्मनि न सोऽयमात्मा परस्य लौकिकप्रत्यक्षगोचर इत्यस्त्यभ्युपगमो भवताम् । तथा च 'स एवायं देवदत्त' इति परस्योत्पद्यमाना प्रत्यक्षसहकृता प्रत्यभिज्ञा शरीरमेव विषयीकुर्याद्—गत्यन्तराभावात् । इत्थं च प्रत्यभिज्ञाप्रामाण्येन शरीरस्यैक्याभ्युपगमोऽवश्यमापतितः । ततश्च परप्रत्यभिज्ञानविषयताया इव 'स एवाहं पश्यामि स्पृशामि च' त्यादिस्वप्रत्यभिज्ञानविषयताया अपि शरीर एवाभ्युपगमे नास्ति किमपि बाधकं नाम । तस्माच्छरीरातिरिक्तात्मवादोऽयमपदार्थकल्पनामात्रम् । शरीरपर्याय एव त्वयमात्मशब्द इति सुप्रतिपन्नमेतत् । अत एव चानशनव्याध्यादिभिः शरीरदौर्बल्ये ज्ञानदौर्बल्यम्, विविधौष-

धसेवनादिभिः शरीरसुस्थतायान्तु ज्ञानप्रदीप्तिरिति शरीरान्वयव्यतिरेकानुविधायित्वं चैतन्यापरपर्यायस्य ज्ञानस्य सम्यगुपपद्यते । संघातचैतन्यादेव च पादे कण्टकविद्धे करयोस्तदपनयनार्थी प्रवृत्तिरित्यादि परस्परमङ्गानामानुकूल्यमपि न कथञ्चिदपि विरुध्यत इति विवेचयन्तु समीक्षादक्षाः ।

तदित्थं शरीरस्यैवात्मत्वे आकारोऽस्य प्रतिशरीरं भिन्नः प्रत्यक्षसिद्ध एव । गुणा अप्यस्य केचन रूपादयः परस्यापीन्द्रियग्राह्याः, केचित्तु ज्ञानेच्छादयः स्वसंवेदनस्यैव विषयाः । सोऽयं गुणानां भेदः स्वाभाविक इति नात्र पर्यनुयोगावसरः । अस्य चोत्पादविनाशयोः प्रत्यक्षं दृश्यमानतया सुप्रतिपन्नमनित्यत्वम् । इदंचानित्यत्वं ध्वंसाप्रतियोगिरूपनित्यत्वाभाव एव न तु सर्वथा क्षणिकत्वम् । आविनाशं शरीर नित्यताया इष्टत्वात् । यद्धि यदोपलभ्यते तदा तदभ्युपगन्तव्यमिति नः सिद्धान्तः । यदा हि विनाशमुपलभामहे तदा अनित्यत्वमुपगच्छामः, यदा चानुवृत्तिमुपलभामहे तदा स्थिरत्वमुपगच्छाम इत्यनुमानाभासैर्न वृथा विडम्ब्यामहे ।

अथावस्थाविशेषाः

ननु यदि शरीर एव चैतन्यमभ्युपगच्छसि, तर्हि विद्यमाने प्रत्यक्षेणोपलभ्यमानेऽपि शरीरे कथं सुषुप्तौ चैतन्यानभिव्यक्तिः, कथं च संभवेन्मूर्च्छा ? को वा स्वप्नस्य द्रष्टेति ? सर्वमिदमव्यवस्थितमापद्येत । मा मैवम् । यथा हि प्रज्वलत्यपि प्रचुरतरेन्धनप्रदीपितवन्हौ मण्यादिसमवधानेन दाहकत्वशक्तिस्तस्याभिभूयत इति न जायते दाहः, एवमेव सत्यपि संयोगविशिष्टे शरीरे निद्रावातकफादिदोषविशेषहेतोश्चैतन्यशक्तिरस्याभिभूयत इति सैषानुद्भूतचैतन्या शरीरावस्था सुषुप्तिमूर्च्छादिपदैर्यथायोग्यं व्यपदिष्टा भवति । स्वप्नावस्था तु दोषविशेषजन्यं भ्रममात्रम् ।

यथा हि वाताद्यभिभूतो यत्किञ्चित्प्रलपति, यथा तथा वा विचेष्टते, यथा च पित्तोपहतनयनः पीतमेव शङ्खादिसर्वं पश्यति तथैव दोषविशेषहेतोः पूर्वदृष्टश्रुतानुमिताद्यर्थान् प्रत्यक्षानिव प्रतिपद्यत इति स्फुटमायुर्वेदविदाम् । तथा च न सावस्था वास्तविकीति तत्कृता कुतो वस्तुकल्पना स्यात् । शक्त्यभिभवश्च पूर्वोक्तस्तत्तत्क्रियाप्रतिबन्धकमात्रमेवेति न शक्त्याख्यपदार्थकल्पानाप्याशङ्कनीयेति सर्वं समञ्जसम् ।

अथ कतिधायमात्मेति प्रस्तुते मनुष्यपशुपक्षिमृगसरीसृपादिविविधवैलक्षण्यविशिष्टानां शरीराणामानन्त्येन प्रसक्तमात्मनामनेकविधत्वमानन्त्यं च सम्यगेवेत्यभ्युपगम्यतेऽस्माभिः । जीवात्म–परमात्म–भेदेन द्विविधता त्वात्मनः कैश्चिदुत्प्रेक्ष्यमाणा न मनागप्यनुमन्यते । केनाप्यपरिदृष्टचरस्य सकलजगदीशितुः सर्वप्रवर्तकस्य परमात्मनः कल्पनायां प्रमाणानुपलब्धे. । यत्तावत्–जगतः कार्यतामनुमाय कार्यस्य कर्तृजन्यत्वनियमात्तत्कर्तृत्वेनेश्वरं नाम कञ्चिदपूर्वशक्तिविशिष्टमात्मानमनुमिन्वन्ति केचित्–तदेतन्न मनोरमम् । शतशो दृष्टव्यभिचारेण केवलेनानुमानेन सर्वथा परोक्षस्य पदार्थस्य कल्पनाया अन्याय्यत्वात् । प्रत्यक्षमेव किलैकं स्वतन्त्रं प्रमाणं तत्तदर्थसाधकमिति स्फुटीभविष्यत्यस्माकं बुद्धनिरूपणे । न च तत्प्रत्यक्षमीश्वरे नाम कस्मिँश्चिदपूर्व आत्मनि प्रसरतीति युक्तस्तदभाव एवाश्रयितुम् । किं च जगदिति नायमेकः पदार्थो व्यपदिष्टः तत्तेषामनुभूयमानानां पदार्थानां समष्टिरेव व्यपदिष्टा भवति जगच्छब्देन । तत्र च येषां पदार्थानामुत्पत्तिमत्त्वं दृष्टं तेषां हेतुरपि ननु दृष्ट एव । यथा घटपटादीनां मृत्तन्त्वादय उपादानानि, कुलालतन्तुवायादयश्च निमित्तानीति । इत्थं च विभिन्नपदार्थानां विभिन्नहेतुकत्वसंसिद्धौ नावशिष्यते मनागपि जगत्, यस्य हेतुत्वेन परमात्मायमङ्गीक्रियेत । ननु शरीराङ्कुरादीनां स्पष्टं परिदृष्टोत्पत्तीनामपि निमित्तकारणं प्रत्यक्षेण नोपलभामह इति तत्कारणत्वेनेश्वरमभ्युपगच्छाम इति चेद् हन्ताज्ञानविजृम्भितम् । सन्तमपि हेतुविशेषमनु-

पलभमानाया उपलब्धेरेव भवादृशामेष दोषो न तु वराकस्य हेतोस्तेन किमपि छिन्नम् । ननु शरणीकरणीयाः पदार्थविद्यानिष्णाता वैज्ञानिकप्रवराः, सर्वत्रैव ते हेतुफलभावमुपदिशेयुरिति । अङ्कुरस्य हि बीजमुपादानकारणम्, भूगर्भोष्णता-जलसेकादीनि च निमित्तकारणानि । शरीराणां शुक्रशोणिते उपादानकारणे, गर्भाशयाग्नि-भुक्तान्नादीनि निमित्तानीति किं नावगच्छसि ? ननु च भोः सत्यपि जडानां परस्परं निमित्तनिमित्तिभावे तत्प्रयोजकेन निमित्तोपादानादिसन्निधापयित्रा केनचिच्चेतनेनावश्यं भवितव्यम् । बुद्धिपूर्विका चेतनक्रियैव किलाचेतनानां प्रयोजिका भवितुमर्हति, अचेतनानां स्वयं प्रवृत्तेः सर्वथानुपपद्यमानत्वात् । तथा च शरीराङ्कुरादीनां विज्ञानसिद्धप्रतिनियतानेकविधनिमित्तादिसन्निधापयिताऽस्त्येव कश्चिच्चेतन ईश्वरपदाभिधेयः । किं चाचेतनानां प्रवृत्त्यभ्युपगमेऽपि बुद्धिपूर्वकप्रवृत्तेरसम्भवात् प्रतिनियतावयवविन्यासमिदं शरीरादि कथंकारमुत्पद्येतेति तदर्थमप्यपेक्ष्यते प्रयोजकश्चेतन ईश्वरपदाभिधेयः । किं चान्यत् सर्वैरपि मनुष्यैर्मनसाप्यचिन्तनीयानां सूर्यचन्द्रभूगोलतारकसमुद्रादीनां कस्तावद्भवतु निर्माता ? न हि कार्यं वस्त्वव्याप्नुवतः कारणत्वं घटेत, न चास्मदादयः परिच्छिन्नाः पृथिव्यादि व्याप्नुयुरिति सर्वव्यापकः सर्वशक्तिमान् कश्चिच्चेतन ईश्वरपदाभिधेयः सर्वथैवाभ्युपगन्तव्य इति चेत्तदेतत्सर्वमपदार्थकल्पनामात्रम् । बीजाङ्कुरशरीरादिषु बहुत्र तावदुपलभ्यन्त एव कर्षकः पिता चेत्यादयः प्रतिनियता उपादाननिमित्तदिसन्निधापयितारश्चेतनाः । अथापि कर्षकस्य पितुर्वा सत्यपि व्यापारे कदाचिद्बीजगर्भाद्यनुत्पत्तिदर्शनात्तत्रापरोऽपीश्वरः कारणत्वेन कल्पनीय इति चेद् ब्रूयुस्तदेतदविद्याविजृम्भितम् । उपादाननिमित्तादीनां दृष्टदोषवशादेव तत्तद् व्यापारासिद्धेः सुव्यवस्थितत्वात् । सतामपि दोषाणामनुपलम्भस्तु ते विज्ञानाभावकृतस्तच्छरणादेवापनेयः । अथारण्यकतर्वादीनां यूकादिशरीराणां चोत्पत्तये न दृश्यते कस्यापि

चेतनस्येच्छापूर्विका प्रवृत्तिरिति चेन्मा नाम भूत् । सर्वत्र चेतनप्रेरणापूर्विकैवाचेतनानां प्रवृत्तिरिति नियमस्याप्रयोजकत्वात् । अचेतनक्रियाप्रवाहेऽपि परस्परं प्रेर्यप्रेरकभावोपपत्तेः क्षतिविरहात् । पश्यामः किल सुरसरित्प्रवाले समुच्चलत्तुङ्गमालयैवोत्क्षिप्तानां तृणादीनां पुञ्जीभावम् । तथैव ननु स्वतोऽनवरतं गमनशीलस्य प्रकम्पनस्य क्रियया तरौ क्रिया, तरुक्रियया च पत्रफलादिनिपतनम्, निपतितविशीर्णस्य फलस्यान्तःस्थितानां बीजानामाघातादेव विकिरणम्, प्रबलतरासारहतानां च तेषां भूगर्भाग्निसंयोगः, ततश्च धाराधरवारिसिक्तेभ्य एभ्यस्तरूणामुत्पत्तिं को नाम निवारयतु । तथैव ह्यनिच्छतोऽपि पुरुषस्य शारीरोष्मणस्तत्र तत्र कारणान्तरेषु संसक्तस्य तत्तत्क्षुद्रजन्तुशरीरोत्पत्तिहेतुतां केन प्रतिबध्नीयाः । दिक्प्रदर्शनमेतत्—अनयैव दिशा सुनिपुणं यदि वैज्ञानिकीं दृशमवलम्ब्य परीक्ष्येत, तर्हि परस्परानुग्रहबलेन दृष्टादेव हेतोः सर्वेषामपि कार्याणामुत्पत्तिर्विज्ञायेतेति नैवात्रेश्वरकल्पनावसरः । यत्तु प्रतिनियतावयवविन्यासस्य जडहेतुकत्वमसंभवीति, तदेतदपि बालवञ्चनमात्रम् । यदेव हि यथा प्रकृत्या संपाद्यते—तदेतत्तथैवास्माभिः प्रतिनियतावयवसौष्ठवमाकल्प्यते, अन्यस्य कस्यापि प्रतिनियमस्य सर्वथा दुर्वचत्वादिति । सन्ति चैषामवयवानां प्रतिनियतत्वे हेतुविशेषा विज्ञानैकसमधिगम्या इति नात्र ते सर्वेऽपि शक्यन्ते प्रपञ्चयितुम् । तेषां च हेतुविशेषाणां कथञ्चिदपि वैषम्येऽवयवादीनां न्यूनातिरेकोऽपि दृष्टचर एव स्पष्टं लोके । यापीयं पृथिव्यादिनिर्माणाशक्यत्वविभीषिका सापि नैव विचारसहा । पृथिव्यादीनामुत्पत्तेरेव तावदसिद्धिग्रस्तत्वात् । केवलेनानुमानेनार्थासिद्धेः प्राङ्निरस्तत्वात् । अनुमानसंरम्भोऽपि चात्र तार्किकशिरोमणीनामुन्मथयिष्यते विशेषतो जैनैः । अभ्युपगतायामपि चोत्पत्तौ पृथिव्यादीनां, न तदर्थमीश्वरापेक्षा, परमाण्वादीनां तत्रोपादानकारणत्वात्, संयोगादिहेतुभूतानां गत्यादीनां च निमित्तत्वात् । पूर्वो

क्तयैव युक्त्या जड़क्रियाप्रवाहेणोपपत्तौ प्रयोजकतयापीश्वरः सर्वथा नापेक्ष्यत एव । तत्तेषां भूतानां गत्यादिस्वभाववैलक्षण्येन च सर्वं समञ्जसमित्यर्थप्रकरणे व्याख्यास्यामः । तस्मात्परैरभ्युपगम्यमानो विभुः सर्वशक्तिविशिष्टः कोऽपीश्वरो-नास्त्येव । शरीरात्मवादिनामस्माकं व्यापकस्य शरीरस्यानुपलब्धिग्रस्ततया सर्वथा विभोरात्मनोऽभ्युपगतेर्गगनकुसुमायमानत्वात् । ईश्वरादिशब्दास्तु प्रत्यक्षदृष्टैश्वर्य-विशिष्टान् नरपतिप्रभृतीन् प्रत्याययितुमर्हन्तीति न तेषां निर्विषयत्वशङ्कापि लब्धप-देत्यलं बहुना प्रपञ्चेन । तदित्थं लोकायतदर्शनमनुसृत्यात्मतत्त्वं विवेचितम् ।

—:०:—

आत्मतत्त्वे बौद्धदर्शनम्

———

अथ बुद्धबुद्धयनुसारिणां वैनाशिकानां मतेनात्मतत्त्वं दर्शयितुमुपक्रम्यते । तदिदं वैनाशिकानां दर्शनं यद्यपि माध्यमिक–योगाचार–सौत्रान्तिक–वैभाषिक–भेदाच्चतुःप्रस्थानम्, अथापि त एते एषां भेदा अर्थप्रकरण एव स्फुटं निरू-पणीयाः । विशेषतस्तत्रैव विभागचतुष्टयोपयोगात् । इह तु सर्वेषामैकमत्येनैवात्म-तत्त्वं निरूपयिष्यामः ।

तत्र तावदाहुर्वैनाशिकाः—यदिदमात्मनोऽसाधारणलक्षणत्वेन सर्वैरपि तैर्थिकैरैकमत्येनाभ्युपपन्नम्—तद्विज्ञानमेव वस्तुगत्यात्मपदवाच्यं भवितुमर्हति । सर्वेषामपि तदभ्युपगमस्यावश्यकत्वात् । न हि कश्चिदपि विज्ञानं नाम किञ्चदर्थं नाभ्युपगच्छति, तथा च निरस्तसमस्तविवादस्य तस्यैवात्मत्वाभ्युपगमो वरम्, तदाश्रयस्य कस्यचिदपूर्वस्यात्मनः प्रकल्पने तु विज्ञानमपि क्लृप्तम्, तदाश्रयोऽपि द्वितीयः कल्प्यत इत्यपदार्थकल्पनागौरवम् । न च कश्चिदप्यर्थ आत्मेत्यनुभूयते केनाप्यन्यत्र विज्ञानात् । नन्वहं जानामीति प्रतीत्या ज्ञानाश्रयत्वं स्वस्मिन्ननुसंदधत् सर्वोऽपि ज्ञानादतिरक्तं स्वं प्रत्येत्येवेति चेन्मैवम् । ज्ञानस्यैव तत्राश्रयत्वेनाश्रित-त्वेन च द्वेधा विभाव्यमानत्वात् । द्विविधं हि विज्ञानम्—आलयविज्ञानम्, प्रवृत्ति-विज्ञनं †चेति । आद्यमहंकारास्पदं विषयान्तरानाक्रान्तम्, द्वितीयन्तु नील-पीत-घट-पटादितत्तद्विषयोल्लेखि । तत्राद्यमात्मपदेन द्वितीयन्तु ज्ञानपदेनैव लोके व्यह्रियते, इत्येतावतैव भेदाद् आत्मनि विज्ञानमित्याश्रयाश्रयिभावनिबन्धना व्यवहाराः

† 'तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम् ।
ततस्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्' ।

प्रवर्तन्ते । जले तुङ्गतरङ्गमालाकलापवच्छुद्धे विज्ञाने नीलपीतादिवृत्तयः प्रादुर्भवन्ति च विनश्यन्ति चेत्यविद्यानिबन्धस्थैर्याभिमानवशंवदैर्लौकिकैरभिमननात्तथाव्यहारोपपत्तेः । वस्तुतस्तूभयोरपि विज्ञानयोः क्षणिकतया नैव संभवति पारमार्थिकाश्रयाश्रयिभावव्यवस्थेत्युपपादनीयमुपरिष्टात् । तत्रेदं प्रवृत्तिविज्ञानं बुद्धिव्यवहारास्पदमिति बुद्धिप्रकरण एव सम्यग् विविच्येत, तद्विषयाणां तदतिरेकानतिरेकौ चाप्यन्यत्रार्थप्रकरणादौ विवेचयिष्येते । इह त्वात्मव्यवहारभाज आलयविज्ञानस्यैव संबन्धेन किञ्चिद्वक्तव्यम् । अयमेव विज्ञानरूपः स्कन्धोऽत्र चित्तमित्यभिधीयते, तत्सहचराश्च रूप–वेदना–संज्ञा–संस्काराभिधाश्चत्वारः स्कन्धाश्चैत्तमिति । तत्र सविषयाणोन्द्रियाणि रूपस्कन्धः, तत्तेषु विषयेषूपजायमानः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः, शब्दोल्लेखिप्रत्ययप्रवाहः संज्ञास्कन्धः, रागद्वेषसदमानधर्माधर्मादयश्च संस्कारस्कन्ध इति तेषामेतेषां रूपविज्ञानवेदनासंज्ञासंस्कारात्मकानां चित्तचैत्ताभिधेयानां पञ्चानां समुदाय एवाध्यात्मिकः सर्वव्यवहारनिर्वाहकः । न ह्येते स्कन्धाः पृथक् पृथगुपलभ्यन्ते, सत्येव ह्येषां समुदाये चित्ताभिज्वलनात् । इदमेव च चित्ताभिज्वलनं वृत्यात्मकं ज्ञानमिति तैस्तैः शब्दैस्तत्र तत्र व्यवहृतं द्रष्टव्यम् । इयन्तु पञ्चस्कन्धी सौत्रान्तिक-वैभाषिकयोरेव मतेन सम्यगुपपादिता, योगाचारस्य तु विज्ञानमेवैकः स्कन्धः पारमार्थिकः, इतरत्तु सर्वमनाद्यविद्यानिबन्धनवासनाविजृम्भितमिति स्फुटं स्यादुपरिष्टात् प्रकरणान्तरे ।

अथेदं विज्ञानमर्थक्रियाकारित्वात्सदिति व्यपदेश्यम् । अर्थक्रियाकारित्वमेवात्र शास्त्रे सत्त्वम्, अन्यस्य दुर्वचत्वात् । यदेव हि किंचित्करोति तदेव सदित्युच्यते लोकैः । करोति चेदमात्मपदवाच्यं विज्ञानमेव सर्वमिति सत्त्वेऽस्य को विवादः । सत्त्वादेव तु क्षणिकमपीदं प्रत्येतव्यम्, यत्सत्तत् क्षणिकमिति व्याप्तेः सुदृढमत्र

शास्त्रेऽभ्युपगतत्वात् । दृष्टं हि जलधरदीपकलिकादिषु सत्त्वसामानाधिकरण्येन क्षणिकत्वम् । अर्थक्रियाकारिता च सत्त्वजीवातुभूता न क्षणिकतामन्तरा संभवतीति सैवेयमवगमयति क्षणिकतां सर्वभावेषु । तथा ह्यत्रैव तावत् परीक्ष्यतां मनाक्—यस्तावदयं नीलपीताद्युल्लेखो प्रवृत्तिविज्ञानविशेषो यो वा सुखदुःखादिवेदनाविशेषस्तस्य तु निर्विवादं क्षणिकत्वम्—सततमननुभवादिति तत्कारणभूतस्यात्मन आलयविज्ञानस्य कथं नाम नित्यत्वं स्यात् । सति कारणे कार्यावश्यंभावनियमात्, समर्थस्य क्षेपायोगात् । आलयविज्ञानस्य कारणभूतस्य नित्यत्वे हि प्रवृत्तिविज्ञानविशेषः, सुखदुःखादिवेदनाविशेषः, क्रियान्तरं वात्मकृतं सततमेव कुतो नानुवर्तत इति पृच्छामः ? सहकार्यन्तरमपि तदुत्पत्तावपेक्ष्यत इति सहकारिसमवधान एव तदुत्पत्तिरिति चेदालयविज्ञानमात्रं तर्हि न किमपि करोति, सहकारिभिः समुदितमेव त्वर्थक्रियाकारितायां प्रभवतीत्यायातम् । तथा चार्थक्रियाकारित्वलक्षणं सत्त्वमालयविज्ञानादात्मनो निवर्तते, समुदाये तु निविशते—इत्यात्मा न सत् (†) सहकारिणामस्य च समुदाय एव तु सदिति लब्धम् । समुदायस्तु सोऽयं न तावन्नित्यत्वेनाभ्युपगन्तुं शक्यः, पुनरपि तत्कार्याणां सुखदुःखवेदना–क्रियादीनां सततमनुवृत्तिप्रसङ्गात्—सति कारणे कार्यावश्यंभावनियमात् । ततश्च क्षणिकत्वमेवास्यार्थक्रियाकारिणः समुदायस्यैष्टव्यमिति विजितं यत्सत्तत्क्षणिकमिति व्याप्त्या । यत्तु नार्थक्रियाकारि, तदसदेवेति कः खपुष्पायमाणस्य तस्य नित्यानित्यत्वे विचिन्तयेत् । ननु च भो नात्मा नार्थक्रियाकारणमित्युच्यतेऽस्माभिर्न वा समुदाये समारोप्यते सत्त्वम्; सहकार्यन्तरसापेक्ष आत्मैव त्वस्माकं कारणमिति नात्मनोऽसत्त्वं प्रसक्तम्, उपपन्नं च सहकार्यपेक्षणात् कार्याणामपि कादाचित्कत्वमिति चेन्नैतदुपपन्नम् । इदं तावद्भवान् व्याचष्टाम्—सहकारिसमवहितोऽयमात्मा

†–अर्थक्रियाकारित्वमेव सत्त्वमिति पूर्वोक्तं स्मर्यताम् ।

स एव पूर्वावस्थातोऽनतिशयितः, उत कश्चनातिशयोऽत्र सहकारिभिराहितः । अनतिशयित इति चेत्पूर्वं न कारणमिदानीन्तु सहकारिसन्निधौ कारणमिति कथमयं भेदो घटेत; अकारणत्वकारणत्वयोः सामानाधिकरण्यायोगात् । अतिशयः सहकारिभिराहित इति चेदतिशयविशिष्ट एव तर्ह्यात्माऽर्थक्रियाकारणमिति स एव सन्, अतिशयशून्यस्याकारणत्वेनासत्त्वप्रसक्तेः । अतिशयविशिष्टश्चार्थक्रियाऽननुवर्तनात् क्षणिक एवेति सतः क्षणिकत्वसिद्धौ घट्टकुटयां प्रभातायितम् । इदमत्राकूतम्—यदेते सर्वेऽपि जागता भावाः कञ्चिदर्थं कांचन क्रियां वारभन्ते, तत् कस्मिँश्चित् क्षण एवारभन्ते, न तु सततमेकरूपाणि कार्याण्यारभन्त इत्यनुभवसिद्धोऽयमर्थः । न हि सततमाम्रफलान्यैकरूप्येण प्रसूयमान अम्रतरुः, सततं घटान्निर्मिमाणो वा दण्डो दृष्टचरः । ततश्च यदेषां यत्किञ्चिदर्थक्रियाकारि रूप तत् कस्मिँश्चन क्षण एव दृष्टम्, क्षणान्तरे त्वन्यदेवार्थक्रियादि विदधत्तद्रूपं दृश्यते । तस्यैवाम्रतरोः कदाचिन्निबिडच्छायया पान्थानुपचरतः कदाचिच्च मञ्जरीसौरभेण मधुकरान् वाचालयतो ऽन्यदा फलैरमृतोपमैर्बुभुक्षामुपशमयत उपलभ्यमानत्वात् । ताडने घटविधाने वान्यत्रान्यत्रापि च व्यासक्तस्यैकस्यैव दण्डस्य दर्शनात् । इत्थमेव मनुष्यादिष्वप्यूह्यम् । इत्थं च यान्येतानि भिन्नभिन्नान्यर्थक्रियादिकार्याणि नैषां कारणमेकमेव सद् भवेत्, तथा सति सततमेषां कार्याणामप्यैकरूप्येण सर्वेषां सर्वदोत्पत्तिप्रसङ्गात् । न हि तदेव वस्तु कदाचिदेषां कार्याणामकारणं कदाचिच्च कारणमिति विरुद्धधर्मद्वयमेकत्र समाविशेत् । सहकार्यन्तरसापेक्षमेषां कारणत्वम्—वसन्ततु सहकृत एव सहकारो मुकुलेषु, वर्षादिसहकृत एव च फलादिषु हेतुरिति चेत्, द्वयी तत्र गतिः । सहकारिभिरत्र कश्चिदतिशय आहित इति तत्तदतिशयविशिष्टस्तत्र तत्र कारणमिति वा स्यात्, सहकारिभिः समुदितत्वमापन्नोऽयमेव कारणमिति वा स्यात् । उभयथापि कारणत्वाकारणत्व-

रूपविरुद्धधर्माधिकरणत्वनिर्वाहाय तत्तदवस्थासु अतिशयविशिष्टत्वतद्रहितत्वादिरूपेण समुदितत्वासमुदितत्वादिरूपेण वा भेद एव वस्तुनः स्वीकार्य इति स्थिरैकवस्तुभङ्गे सुस्थितं क्षणिकत्वम् । समुदाये वा निवेशितं सत्त्वं प्रत्येकतो निवृत्तिमिति सतोऽर्थक्रियाकारिणः समुदायस्य स्थिरवस्तुभिन्नस्य भवेदेव क्षणिकत्वम् । अभेदे विरुद्धधर्माधिकरणत्वाद्यसिद्धेरिति । अतिशयमनादधतां समुदितत्वमपि चानापन्नानान्तु सहकारिणामकिञ्चित्करेण समवधानेन किं वा कल्पितेन ? न च विरुद्धधर्माधिकरणत्वसंगतिर्भेदमन्तरा सिद्धिमियर्तीति सुचिरमनुध्येयम् । तस्मादर्थक्रियाकारितेयं क्षणिकेष्वेवोपपद्यते, न तु स्थिरेषु । नचार्थक्रियाकारित्वमन्तरा सत्त्वे किमपि प्रमाणम्—अनुभूयमानत्वमात्रेण सत्त्वे शुक्तिरजतरज्जुभुजङ्गादावतिप्रसङ्गादिति यत्सत्तत् क्षणिकमिति सुदृढ़ायते व्याप्तिः । दिङ्मात्रमिदमुपदर्शितं क्षणिकत्ववादस्य, पुनरपि त्वर्थप्रकरणे वादमिमं स्फुटीकरिष्यामः । ततश्च सिद्धं सत्त्वेनात्मनोऽपि क्षणिकत्वं निर्विवादम् । इदमप्यत्र न विस्मर्तव्यम् विज्ञानमेवास्माकं नय आत्मपदवाच्यम्—तस्य चास्य क्षणिकत्वे नास्ति कस्यापि विवादः । सर्वैरपि तैर्थिकैर्विज्ञानस्यास्थिरत्वाभ्युपगमात् । ननु आस्तां प्रवृत्तिविज्ञानं सर्वेषां क्षणिकम्, आलयविज्ञानं तु कथं क्षणिकमिति, नैतत्पर्यनुयोज्यम् अवस्थावैलक्षण्यमात्रस्यास्योपदर्शितत्वात्—विज्ञानत्वस्य तूभयत्रापि साम्येन क्षणिकत्वाक्षतेः । किं चालयविज्ञानं तावन्नीलपीताद्यनुल्लेखीति तस्य नित्यत्वे प्रवृत्तिविज्ञानस्य समुदय एव कथं स्यादिति सर्वानुभवो विरुध्येत । तस्मात् क्षणिक एवात्मा ।

ननु च भोः यद्यात्मनः क्षणिकत्वमभ्युपैषि, बहवस्तर्हि दोषाः शिरसि तेऽहमहमिकया निपतेयुः । तथा हि—देवदत्तात्मनः प्रतिक्षणं निरन्वये विनाशे 'स एवायं देवदत्त' इति प्रत्यभिज्ञाविरोध एको दोषः, तथा च तदालम्बनाः सर्वेऽपि सांसारिकाः सम्बन्धव्यवहाराः समुच्छिद्येरन् । एवमनुभवस्मरणयोः सामानाधि-

करण्येनैव कार्यकारणभावकल्पनाया नितान्तमावश्यकत्वेन तत्तदर्थानुभवितुश्चोत्तरक्षण एव निरन्वयं प्रणष्टतया पूर्वानुभूतार्थस्मरणं सर्वथा विलयमापद्येत । अन्यद्धि भवन्मतेऽनुभवितृविज्ञानम्, अन्यच्च स्मर्तृविज्ञानम् । कथं चान्यानुभूतमर्थमन्यो विज्ञानक्षणः स्मरेत् ? तथा चैवमपि सर्व एव व्यवहाराः समुच्छिन्नप्रायाः । स्मृतिमूलिका हि संसारिणां सर्वापि प्रायेण प्रवृत्तिः । कश्चिद्धि पुरुषो मृदा घटम् तन्तुभिः पटं वा निष्पाद्यमानमभिवीक्ष्य तयोः कार्यकारणभावं तदात्वे गृह्णाति, तमेव च स्मृत्वा कालान्तरे स्वयमपि घटं पटं वा चिकीर्षुर्मृदि तन्तुषु वा प्रवर्तत इति स्पष्टं स्मृतिमूलत्वं प्रवृत्तीनाम् । तथा च क्षणिकत्व आत्मनोऽभ्युपेते पूर्वानुभवितुरभावेन स्मृतेरनुदये प्रवृत्तिरेव प्राणिनां नोदयमासादयेदिति प्राप्तं सर्वं जाड्यम् । अथैवमेव कृतिफलयोरपि सामानाधिकरण्यमेव लोके दृष्टम् । य एव करोति स एव तत्फलं भुङ्क्त इति । न हि देवदत्तेन कृते चौर्ये यज्ञदत्तः केनापि संयतो दृष्टः । भवन्मते तु कर्तुस्तत्क्षण एव विनाशेन फलं सर्वदान्य एव प्राप्नोतीति देवदत्तकृतमपि यज्ञदत्तः कुतो नाप्नुयात् ? तथा च कृतप्रणाशाकृताभ्यागमप्रसङ्गोऽयं तृतीयो दोषः । एवमपि च प्रवृत्तेरभाव एव प्रसक्तः, फलप्राप्तेरसंभवात् । तदेवंविधदोषशतसंकुलस्य सर्वथोपपत्तिशून्यस्यास्य क्षणिकतावादस्य दूरतः परिहार एव वरमिति चेन्मैवं मंस्थाः ।

क्षणिकानामपि विज्ञानानां पूर्वस्मात् पूर्वस्मादपरापरोत्पत्तिलक्षणस्य सन्तानस्यैकत्वेन, क्रमेणोत्पद्यमानानां विज्ञानानां सादृश्येन, क्षणिकेष्वपि भावेषु स्थिरत्वबुद्ध्यापादकानाद्यविद्याविजृम्भितेन च एकत्वप्रत्यभिज्ञोपपत्तेः सुवचत्वात् । यथा हि आसायमाप्रातरेका सैवेयं दीपशिखेत्युदेति लौकिकानां बुद्धिः, न च वस्तुत ऐक्यं तस्या व्यवस्थापयितुमीशते केऽपि परीक्षकाः, स्नेहस्याप्रक्षयप्रसङ्गात् । स्नेहो ह्यनुक्षणं दीपशिखारूपेण परिणम्य बहिर्गृहकोटरादिषु विलीनतामायातीति

परीक्षकाणां बुद्धिः । तथैवासायमाप्रातरेकेनैव जलधरपटलेनाभिवृष्टमिति प्रत्ययन्ते लौकिकाः, न च जलधरपटलस्यैव जलात्मना परिणमतः पतनं विद्वांसो ऽनुमन्येरन्नेतत्परीक्षकाः । एवमेव निर्विशेषं सर्वेष्वपि भावेष्वेतत्प्रत्येतव्यम् । परिणमन्तोऽप्यात्मादयः सर्वेऽपि भावाः सादृश्येनाविद्यया चैकत्वेनैव प्रतिभासन्त इति । अथाप्रामाण्यं तर्हि प्रत्यभिज्ञायाः प्रसक्तमिति चेदस्त्येव परमार्थतोऽप्रामाण्यम् । व्यवहारिकन्तु प्रामाण्यं न शक्यत एव वारयितुम्, व्यवहारस्याविद्ययैव प्रवर्तितत्वात् । अविद्यायां च जीवन्त्यां प्रत्यभिज्ञापि जीवतु वर्षशतम् । तथा च तन्मूलकाः सर्व उपपद्यन्त एव व्यवहाराः ।

एवमेव स्मृतेरपि नानुपपत्तिः, संस्कारजन्यं हि ज्ञानं स्मृतिर्नाम । स च संस्कारो यद्यप्यनुभवसामानाधिकरण्येन तस्मिन्नेव क्षण उत्पद्यत इति सत्यम्, अथापि वासनाभूतस्य तस्य क्रमिकेषु स्वजन्यापरापरविज्ञानेषु संक्रमणात्सर्वेऽपि विज्ञानक्षणाः संस्कारवन्त इति शक्नुवन्ति स्वस्वसन्तानगतविज्ञानैः पूर्वानुभूतमर्थं स्मर्तुम् । यथा हि मधुराम्रबीजे पृथिव्यामुप्ते तज्जन्याङ्कुरकाण्डस्कन्धशाखापल्लवमुकुलफलादिसन्तानानुक्रमेणाम्रफले जाते तदेव माधुर्यमनुभूयते, यथा वा लाक्षारसासिक्तकार्पासबीजानां रक्तिमाऽङ्कुरादिष्वप्रस्फुटन्त्यपि तज्जन्ये कार्पासे समुद्भवति, तथैव निर्विशेषमत्रापि यद्विज्ञानक्षणार्थं वासनाधीयते, तत्रैव स्मरणाद्धि समुत्पादयत्यवान्तरेषु तु क्षणेष्वनभिव्यक्तैवास्त इति न काप्यनुपपत्तिः ।

अथैवं सति येयं वासना पूर्वस्माद्विज्ञानक्षणादपरमुपसंक्रान्ता—सा सती वा स्यादसती वा । आद्ये तस्याः स्थैर्यमापतितमनेकेषु क्षणेष्वनुवर्तनादिति यत्सत्तत् क्षणिकमिति व्याप्तिर्व्यभिचरेत् । अन्त्ये (असत्त्वे) त्ववस्तुभूता सा कथं स्मरणं व्यवस्थापयेत् । स्मरणात्मिकामर्थक्रियां जनयन्त्या हि तस्याः कथं नाम सत्त्वं न

स्यात् । तस्मान्न युज्यते वासनासंक्रम इति चेदहो भ्रान्तिः, न वयं तस्या एव वासनायाः परस्मिन्नुपसंक्रमेण स्थैर्यं कथमप्यापादयामः, अपि तु पूर्वपूर्वविज्ञान-स्थितया संस्कारापरपर्यायया वासनया परस्मिन्नपि विज्ञानक्षणे स्वसदृशी काचन वासना समुत्पाद्यते—ययोत्तरकालिकं स्मरणमुपपद्यत इत्येव ब्रूमहे । यथैव हि क्षणिकविज्ञानेभ्यो विज्ञानान्तराणां, तथैव तन्निष्ठवासनाभ्योऽपि वासनान्तराणा-मुत्पत्तिः, वासनाविशिष्टविज्ञानेभ्यो वासनाविशिष्टविज्ञानानामेवोत्पत्तिरिति यावत् । तथा च वासनानामपि क्षणिकतैवेति न काप्यनुपपत्तिः । यत्तु केचिद्—एवं सत्यनन्तानां वासनानामुत्पादविनाशयोः प्रतिक्षणं प्रकल्पने परमगौरवापत्तिरिति दोषमुद्भावयन्ति तदेतदविवेकात् । सन्नेव हि तत्तत्पदार्थानां धर्मोऽस्माभिः परीक्ष्यते, न तु स्वयं प्रकल्प्यते, येन गौरवं दोषमादध्यात् । आस्तां गौरवं लाघवं वा, यथैव तु ये पदार्था उपलभ्यन्ते तथैव ते परीक्षकेण व्यवस्थापनीयाः, न तु लाघवानुरोधिनान्यथनीयाः । को हि नाम वराकः परीक्षकः पदार्थधर्माणां लाघवगौरवविचाराधिकारे । लाघवगौरवयोर्हि स्वप्रकल्पितेषु वागाडम्बरमात्रसारेषु लक्षणेष्वेवास्तां विचारो न तु पदार्थधर्मपरीक्षायामस्य कोऽप्युपयोग इति यत्कि-ञ्चिदेतत् ।

अथैवं वासनोपसंक्रमेऽभ्युपेते मातृविज्ञानगता वासना स्वजन्यपुत्रविज्ञान-मुपसंक्राम्येत्, एवं गुरोर्वासनापि शिष्यमुपसंक्रामेदिति मातृगुर्वाद्यनुभूतमर्थं पुत्र-शिष्यादयोऽपि स्मरेयुरिति चेत्तदतिनिःसारम् । एकसन्तानगतत्वस्योपादानोपादेय-भावस्य वा वासनोपसंक्रमणे नियामकत्वात् । पूर्वपूर्वविज्ञानक्षणा हि स्वाधिष्ठित-सन्तानगतस्यापरापरस्य विज्ञानस्योपादानानि भवन्तीति तेषामेवोपादेयेषु विज्ञानेषु वासनाप्युपसंक्राम्यति, न तु भिन्ने सन्ताने, उपादानोपादेयभावविरहादिति ।

ननु कोऽयं सन्तानपदार्थ इति चेत्क्रमिकाणामुपादानोपादेयभावमापन्नानां विज्ञान-क्षणानां परम्परैवेति गृहाण ।

ननु न भो उत्पत्तिक्षणादुत्तरक्षण एव निरन्वयं विनश्यतां विज्ञानक्षणाना-मितरोपादानत्वमेव तावदसंभाव्यम् । गृहीतसत्ताकं हि वस्तु क्रियया विक्रियमा-णमन्यस्योपादानं दृष्टम्, यथा मृत्कपालं घटस्य, तन्तवो वा पटस्य । न त्वगृही-तसत्ताकं विनाशमापन्नं वा कस्याप्युपादानं भवितुमर्हति । तथा च यदि पूर्वमुत्पद्य परस्योत्पादनार्थं क्रियामुपाददते विज्ञानानि, तर्हि क्षणद्वयसम्बन्धात् क्षणिकत्व-प्रतिज्ञा व्याहन्येत । अथोत्पत्तिक्षण एव परस्योत्पादनायापि पार्यन्ते तर्हि स्वयमसतां तेषां कथं क्रियान्तराश्रयत्वं नाम शक्यसंभवं भवेत् । उत्पत्तेः प्राक् पदार्थानामसत्त्वात् । उत्पत्तिक्षण एव हि नाशेन समाक्रान्ततया नावशिष्यते क्रियान्तरमुपादातुं कोऽपि कालः । क्रियामन्तरा च न शक्यतेऽभ्युपगन्तुमुपादान-त्वमिति कुत इयं वासनासंक्रमव्यवस्थाप्युपपद्यताम् । किं च स्वभावभूतानां केषां-चित् स्वनिष्ठधर्माणामुपसंक्रमणे सत्येवोपादानोपादेयभावो लोके दृष्टः । उपादानधर्मा ह्युपादेयमुपसंक्राम्यन्तीत्येतावतैव तयोरुपादानत्वमुपादेयत्वं च परिचीयते लोकैः । क्षणिकत्ववादिनान्तु भवतां केषामपि धर्माणां स्थैर्यमनभ्युपगच्छतां तदिदमुपसंक्र-मणमभ्युपगन्तुमसांप्रतमिति न संभवत्युपादानत्वव्यवस्था, ततश्च दूरोज्झिता वासनोत्पत्तिव्यवस्थापीति चेन्नैतत्सम्यगनुपश्यन्ति भवन्तः ।

यत्तावद् विनश्यतां विज्ञानानां विज्ञानान्तरोपादानत्वमसंभवीति, तदविचा-रात् । (*) विनश्यतामेव भावानां भावान्तरोपादानतायाः सर्वत्रोपलभ्यमानत्वात् । विनश्यदेव हि बीजमङ्कुरस्योपादानं दृष्टम्—न तु स्वरूपावस्थितम् । विनश्य-

* सोऽयमसतः सदुत्पत्तिवादः ।

न्नेव च मृत्पिण्डो घटस्योपादानं न तु स्वरूपेणावस्थितः । एवं च यत्रोपादान-विनाशो लौकिकैर्नानुभूयेतापि, तत्रापि स्वरूपोपमर्दरूपो विनाशः परोत्पादनेऽभ्यु-पगन्तव्य एव, अन्यथा कार्योत्पादनस्यैवासिद्धेः । यदि ह्युपादानं स्वरूपतोऽप्रच्युतं स्यात्तर्हि कथं कार्योत्पत्तिस्तत्र संभवेत् । एकस्य कार्यकारणरूपोभयात्मना ऽवस्थातुमशक्तत्वात् । इत्थं च कार्यकारणभावानुरोधिभिरवश्यं विनश्यदवस्था-नामेवोपादानकारणत्वमभ्युपगन्तव्यमिति विनश्यदवस्थानां विज्ञानानां विज्ञानान्त-रोपादानत्वे नास्ति काप्यनुपपत्तिर्नाम । सत्ताग्रहणानन्तरं विकारप्रयोजकक्रियान्त-रग्रहणाय नावशिष्यते काल इत्यपि निःसारम् । गृहीतायाः सत्ताया एव परोत्पा-दनव्यापारत्वाभ्युपगमात् । यावत्तैव सत्तात्र सिद्धा, तवतैवायं स्वभावात्परक्षण-मुत्पादयतीति न क्रियान्तरमपेक्षते । 'अर्थक्रियाकारित्वमेव' किल सत्त्वमवोचामेति नैतद् विस्मर्तव्यम् । तथा च सत्तामात्रेण परोत्पत्तिप्रयोजकत्वे नानुपपत्तिः । यत्तु स्वभावभूतस्थिरधर्मोपसंक्रमणं विनोपादानत्वादि दुर्विज्ञेयमित्युक्तं तदप्यसमन्मतम-नालोच्यैव । यतो ह्युपादानधर्माणामुपादेयोपसंक्रान्तेर्नास्ति कोऽप्यसमन्मते दृष्टान्तः । सर्वेषामपि भावानां क्षणिकत्वाभ्युपगमेन स्थिरधर्माणां गगनकुसुमायमानतयोप-संक्रमणस्यासिद्धिग्रस्तत्वात् । तस्मात्सर्वत्रापि भावेषूपादानगुणसदृशगुणान्तराण्ये-वोपादेयेषूपजायन्ते—न तूपादानगता गुणा एवोपसंक्रान्ताः प्रत्येतव्याः । यत्रापि लौकिकास्तानेव धर्मानुपसंक्रान्तानभिमन्यन्ते तत्राप्ययं सादृश्यातिशयनिबन्धन उपचारो वा भ्रमो वा प्रतिपत्तव्यः, पितुराकार एव पुत्रेऽनुलक्ष्यत इत्यादिवत् । तन्तुकपालादिगतरूपादिभिः पटघटरूपादय उत्पाद्यन्त इति सिद्धान्तयन्तो वैशेषिका अप्यत्रार्थेऽस्मदनुकूला एव । कार्यकारणगुणयोस्तैरैक्यानभ्युपगमात् । सदृशध-र्मोत्पत्तिनिबन्धनमेव चोपादानोपादेयभावविज्ञानमपीति सदृशवासनावतां परवि-

ज्ञानानां पूर्वपूर्वोपादानकत्वं निष्प्रत्यूहं प्रसिद्धयेत् । तदित्थं सर्वथोपपादितं स्मरणमिति प्रतिक्षिप्तः पूर्वतनो द्वितीय आक्षेपः ।

अथ कर्तुरेव फलभोगो न्याय्य इति तृतीयः परमवशिष्यते सोपि न दोषावहः । स्वकृतस्य कर्मणः स्वाधिष्ठितसन्तानगतेन साक्षात्परम्परया वा स्वजन्येन विज्ञाना-न्तरेण फलोपभोगेऽपि क्षत्यभावात् । दृश्यते हि पितृकृतानां धनसंचयादीनां पुत्रादिभिरप्युपभोगः । योद्धृकृतानां च जयपराजयादीनामपि राज्ञ उपभोगो दृश्यत इति स्वोपादेयेनान्येन विज्ञानेन फलोपभोगे कोऽयं मत्सरः । ननु राजार्थमेव तत्र योद्धृणां प्रवृत्तिरिति चेदिहापि विज्ञानान्तरार्थमेव पूर्वस्य विज्ञानस्य प्रवृत्तिरिति किं न तुष्यसि । स्वार्थैव प्रवृत्तिः सर्वत्र दृष्टेति चेत्पुत्राद्यर्थं स्वयं परिक्लिश्यापि धनान्यर्जयतः पित्रादीन् किं न पश्यसि ? तस्माद्यस्य यदुद्देश्येन प्रवृत्तिस्तेन कृते फलभोगे नैवास्ति वैफल्यं प्रवृत्तेरिति निष्कलङ्कशङ्कोऽयं क्षणिक-तावादः ।

नन्वेवमुपपादितेऽपि स्मरणादौ 'य एवाहं पूर्वमद्राक्षं स एव स्मरामि' 'मयैव पूर्वं साक्षात्कृतमिदम्' 'यन्मया कृतं तस्यैव फलमनुभवामि' 'स्वार्थमेव कार्यमि-दमनुतिष्ठामी' त्यादिसर्वजनीनस्वानुभवविरोधस्ते सुदुष्परिहर एव प्रसज्जते । दर्शनस्मरणकालयोः कृतिफलानुभवकालयोश्चैकस्यात्मनस्त्वयानभ्युपगमात् । त्व-न्मते हि वासनोपसंक्रमणादिना स्मरणाद्युपपत्तावपि 'यदिदमन्यो मत्पूर्वक्षणो (*) ऽद्राक्षीत्तदहं स्मरामि' 'मत्पूर्वक्षणकृतस्येदं फलमहमनुभवामी' त्यादिरेव प्रत्यय उचितः । दृश्यते ह्यन्येन केनचिद्बोधितस्यार्थस्य साक्षात्करणे 'तदुक्तमहमद्य

(*)-क्षणिकं विज्ञानादिपदार्थजातमप्यत्र शास्त्रे क्षणपदेन बहुधा व्यवह्रियत इति तदनुसृत्यैवात्रापि व्यवहारः ।

साक्षात्करोमी' त्येष एवानुभवः । पुत्रादेश्च पित्रार्जितं मया भुज्यत इत्येवानुभवस्तथैवात्रापि भवितव्यम् । न तु कोऽपि तथा प्रत्येति, स्वकृतस्य स्वानुभूतस्यैव तु सर्व उपभोगं स्मरणं वाभिमन्यत इति चेन्नैतदनिष्टमस्माकम् । सादृश्येनाविद्यया च क्षणिकेष्वप्येकत्वबुद्धिरूपा प्रत्यभिज्ञा पूर्वमेवास्माभिरुपपादिता । सा यथा परस्य, तथैव स्वस्याप्युपपद्यत इति को विरोधः ? ननु बाह्येषु पदार्थेषु सादृश्यमूलिका प्रत्यभिज्ञा समुदेतु नाम, इह तु पूर्वपरयोर्विज्ञानक्षणयोरेको द्रष्टैव कोऽपि नास्ति, विज्ञानातिरिक्तस्य द्रष्टुरनभ्युपगमादिति सादृश्यं केन गृह्यताम्, उभयनिष्ठं हि सादृश्यमुभयग्रह एव सुग्रहं नेतरथा । तथा च सादृश्यग्रहस्यैवाभावे कुतस्तन्मूलिका प्रत्यभिज्ञा समुदेत्विति चेद् हन्त भ्रान्तिः । न हि (†) सादृश्यग्रहणं प्रत्यभिज्ञायां हेतुर्भवितुमर्हत्यपितु वस्तुनिष्ठमगृहीतं सादृश्यमात्रम् । सादृश्यग्रहणे हि सति स इवायमिति प्रतीयते न तु स एवायमिति । अगृहीतं तु सादृश्यं तद्भ्रान्तिजननद्वारा समुत्पादयति प्रत्यभिज्ञामिति सादृश्याग्रहणमत्रापादितं भूषणमेव न तु दूषणपक्षनिक्षिप्तम् । नन्वस्तु सादृश्यस्याग्रहः, सदृशयोस्तु पदार्थयोर्ग्रहोऽवश्यं प्रत्यभिज्ञायां हेतुः, सः—अयमिति प्रतीतेर्द्विर्ग्रहणाभावे सर्वथानुदयादिति द्वयोः सदृशयोर्विज्ञानयोः केनात्र ग्रहणं भवत्विति चेत्तदपि निःसारम् । अस्मन्नये क्वाप्येकेन द्रष्ट्रा पूर्वापरकालयोर्द्विर्ग्रहणासंभवात्—ग्रहीतॄणामपि ग्राह्याणामिव क्षणिकत्वात् । ततश्च सर्वत्रैव पूर्वोक्तरीत्या पूर्वपूर्वविज्ञाननिष्ठसंस्कारसदृशसंस्कारविशिष्टः स्वानुभव एव विज्ञानानां 'स एवाहमिति प्रत्यभिज्ञां जनयिष्यति । अथापि कोऽयं प्रत्यभिज्ञातेति चेन्नन्वसकृदुद्घुष्टं विज्ञानक्षण एव

(†) यद्यपि स्वलक्षणाः सर्वेपि पदार्था इत्यत्र दर्शने सिद्धान्त्यते तथापि यथा निर्वहति सदृश्यव्यवहारस्तथेदमर्थप्रकरणे स्फुटं स्यात् ।

प्रत्यभिज्ञातेति । स हि पूर्वपूर्वविज्ञानसंस्काराणां (†) स्वस्मिन्नावेशात्पूर्वं द्रष्टृत्वादिकं स्मरति, सम्प्रति त्वर्थाननुभवति इति प्रत्यभिजानातीत्युच्यते । अविद्या त्वस्यानादिसंसिद्धा पूर्वस्माद् भेदमपोहन्ती स्थैर्यमनुभावयति । अविद्यावशादेवात्मना स्वस्य क्षणिकत्वानवगमात् । सोऽयं स्थैर्याभिमानोऽनाद्यविद्याविजृम्भितमविद्यानिवृत्तिपर्यन्तमनुवर्तत एवेति सर्वेऽपि लौकिकाः पारलौकिकाश्च व्यवहारास्तत एव सम्यङ् निर्वहन्ति । एतेन स्वस्वरूपे भ्रमासंभवात्कथं संभवेत्प्रत्यभिज्ञेत्याद्यापादयन्तो निरस्ताः । विलक्षणशक्तिसंपन्नयाऽविद्यया सर्वस्योपपादितत्वादिति सुचिरमनुध्याय विज्ञेयम् ।

तदित्थं क्षणिकं विज्ञानमेवात्मपदार्थ इति संसिद्धम् । तस्यैतस्य विज्ञानस्य शरीराद्बहिः कदाप्यनुपलम्भेन शरीरपरिच्छन्नत्वमेवैष्टव्यम् । शरीरवृद्ध्यपचयानुविधायित्वमप्यस्य क्षणिकत्वादेवोपपद्येतेति न कश्चिद्विरोधः ।

जीवात्मपरमात्मभेदेनात्मद्वैविध्यं चात्रापि दर्शनेऽनिष्टमेव परमात्मनि प्रमाणाभावादिति पूर्वोत्तरदर्शनयोरेवालोच्यम्, समानयुक्तिकतया नेह विशेषतो विव्रियते । यथा च परमात्मनोऽनभ्युपगमेऽपि बाह्याध्यात्मिकसमुदायरूपः संसार उपपत्तिमियर्ति, तथेदमर्थप्रकरण एव स्फुटं विवेचयिष्यामः ।

इदं च विज्ञानं यदा तत्तद्बाह्यविषयोल्लेखि, तदास्य जाग्रदवस्थेति व्यवहरन्ति लोकाः । यदा तु वासनामयानसत्पदार्थानेवोल्लिखति तदा स्वप्नावस्थेत्युच्यते । ते चैते स्वाप्निकाः पदार्था आन्तरा एव बहिर्वदवभासन्ते, असत्ख्यातेरत्र शास्त्रेऽभ्युपगमादिति बुद्धिप्रकरणे स्फुटीभविष्यति । अथ यदा केवलमहंकारास्पदमालयविज्ञानं प्रवृत्तिविज्ञानविरहितं स्वयमेवानुवर्तते तदा सुषुप्त्यवस्था नाम । मूर्च्छादिषु च सर्वत्रैव केवलस्यालयविज्ञानस्यानुवृत्तिः । आलयविज्ञानमपि नानुवर्तते इति तु न

(†) स्वसदृशस्य संस्कारान्तरस्य तेनैवात्रोत्पादनादिति भावः ।

भ्रमितव्यम्, सन्तानोच्छेदे पूर्ववासनाप्रविलये उत्थितस्य स्मरणाद्यनुपपत्तेः, विज्ञानविरहितस्य देहस्य मृतपुरुषदेहादविशेषापत्तेश्च। तास्मादालयविज्ञानमात्रं सुषुप्त्यादावप्यनुवर्तते—इतरे तु चत्वारः स्कन्धाः पूर्वमुक्ता जाग्रदवस्थायामेव संहन्यन्त इति सर्वं सुस्थम्।

तदित्थं बौद्धदर्शनमनुसृत्यात्मतत्त्वं विवेचितम्।

आत्मतत्त्वे--जैनदर्शनम्।

अथार्हत आर्हन्तीमेव पुरुषार्थसाधनं मन्यमानानां स्याद्वाद—वादिनात्मतत्त्वं विवेच्यम्। इयमेषां प्रतिपत्ति :—

न खलु शरीरमेवात्मा, पुनर्जन्मनः स्वर्गनरकादिगतीनां चानापत्तेः। **तेषां च प्रेत्यभावप्रकरणे साधयिष्यमाणत्वात्।** नापि विज्ञानमात्रम्, कृतप्रणाशाकृताभ्यागमयोर्दुष्परिहरत्वात्। 'स एवाहमिति' प्रत्यभिज्ञायाश्चासति बाधकेऽप्रामाण्यानौचित्यात्। तस्माच्छरीरातिरिक्तो ज्ञानगुणको जीवापरपर्याय आत्मा नाम द्रव्यम्।

द्रव्यलक्षणन्तु 'गुणपर्यायवद् द्रव्यम्' इत्याचार्यैरभिहितम्। गुणाः—शक्तयः—स्वभावाः—इत्यनर्थान्तरम्। ते च द्विविधाः, सामान्याः, विशेषाश्च। सर्वद्रव्यसाधारणाः। ते च मुख्याः षट्,—अस्तित्वम्, वस्तुत्वम्, द्रव्यत्वम्, प्रमेयत्वम्, अगुरुलघुत्वम्, प्रदेशवत्वं चेति। अस्तित्वसम्बन्धाद् द्रव्याणां नैकान्ततोऽभावः कदापि प्रसज्जते। वस्तुत्वसम्बन्धात्सर्वत्र द्रव्येष्वर्थक्रियाकारित्वमनुभूयते। द्रव्यत्वयोगात्सर्वेष्वपि द्रव्येषु परिणामः प्रवर्तते। प्रमेयत्वयोगाच्च प्रमाणैः सर्वाण्यनुभूयन्ते। अथ यत्सम्बधेनानन्तानां शक्तीनामेकपिण्डरूपतावभासते, एका शक्तिः शक्त्यन्तरतां, द्रव्याणि च विजातीयद्रव्यान्तरतां नापद्यन्ते—तदिदमगुरुलघुत्वं नाम। प्रदेशवत्वं प्रदेशपरिस्पन्दादिना द्रव्याणामाकारविशेषावाप्तिहेतुः। त एतदादयो द्रव्यसामान्यगुणाः। विशेषगुणास्तु तत्तद्द्रव्याणामसाधारणाः, यथा—जीवे ज्ञानसुखादयः, पुद्गलद्रव्ये च रूपस्पर्शादयः। त इमे शक्त्यपरपर्याया गुणाः प्रकारान्तरेणापि द्विधा भिद्यन्ते—भाववती शक्तिः, क्रियावती शक्तिश्चेत्यभिधानभेदात्। द्रव्याणां स्वभावभूता अस्तित्वादयः, ज्ञानादयो विशेषाश्च भाववती शक्तिरभिधीयन्ते। प्रदेशपरिस्पन्दहेतुः प्रदेशवत्वन्तु, क्रियावती शक्तिरिति व्यवह्रियते। एवं च गुणद्वैविध्यात्तत्पर्याया अपि द्विविधाः—अर्थगुण-

पर्यायः, व्यञ्जनगुणपर्यायश्च । पर्याया नाम परिणामाः । तत्र ज्ञानादीना य इमे कालभेदात् नैर्मल्यतारतम्यादयो† विशेषाः, घटज्ञान–पटज्ञानादयो विशेषाश्च, रूपादीनां च शुक्लत्व–हरितत्वादिविशेषास्तत्रापि तारतम्यविशेषाश्चेति ते सर्वेऽप्यर्थगुणपर्याया इत्युच्यन्ते । प्रदेशवत्वशक्तिकृता द्रव्याणामा*कारविशेषास्तुव्यञ्जनगुणपर्याया इति । एते व्यञ्जनगुणपर्यायाः सक्तिविशेषकृता अपि द्रव्याकाररूपत्वाद् द्रव्येण साक्षात्सम्बन्धाद् द्रव्यपर्यायशब्देनाप्यभिधीयन्ते । वस्तुतस्तु द्रव्यपर्यायशब्दोऽपि भाक्तः, प्राधान्येन तु द्रव्याणां प्रकल्पिता निरंशाः प्रदेशा एव द्रव्यपर्याया इति स्फुटीभविष्यत्युपरिष्टात् । तदित्थं दिङ्मात्रेणोपदर्शिता गुणाः पर्यायाश्च ।

एषां गुणपर्यायाणां च समुदाय एव द्रव्यम् । समुदिता गुणाः पर्याय एव च द्रव्यमिति यावत् । सोऽयं द्रव्यापरपर्यायः समुदायः समुदितेभ्यो गुणेभ्यो नैकान्तेनाभिन्नः, न च भिन्नः सर्वथा । यदि ह्यभिन्न एव स्यात्, तर्त्तहि द्रव्यपदमेवेदमनालम्बनमापद्येत । समुदितानां गुणत्वेन द्रव्यपदानभिधेयत्वात्–अतिरिक्तस्य चानभ्युपगमात् । किं च परस्परं भिन्नानां ज्ञानसुखादीनां समुदायरूपोऽयमात्मा यदि ज्ञानेन नाम स्वगुणेनाभिन्नः स्यात्, तर्हि ज्ञानरूपोऽयं सुखादिभ्यो नूनं भिन्नोऽपि स्यात् । ज्ञानसुखयोर्भेदात्, आत्मनश्च ज्ञानरूपत्वात् । तथा च सुखादिभिन्नं ज्ञानमात्रं समुदायः प्रसक्तः । न चैकस्मिन् वस्तुनि समुदायव्यवहार उपपत्तिमियर्तीति जलमध्यस्थमसीक्षोदवद्विलीनः समुदायः । विलीने च समुदाये तदभिन्नत्वेनाभिमताः समुदिता अपि विलीना एव नूनमिति सर्वाभावः शिरसि पतितः । सर्वत्रैव हि समुदायस्यैवमभेदः सर्वथा समुदितैः सह प्रत्याख्येयः । तस्मान्न तावत् समुदायः समुदितेभ्योऽत्यन्तमभिन्नः । न चात्यन्तं भिन्नोऽपि,

† भवति हि किमपि ज्ञानं निर्मलं, किमपि ततोऽप्यधिकं निर्मलमपरमतोऽप्यधिकमित्यादि ।

* मृदः पिण्डाकारः कपालाकारो घटाकार इत्याद्यूह्यम् ।

घटपटयोरिव समुदायसमुदितयोर्व्यतिरिच्योपलब्धिप्रसङ्गात् । ये हि पदार्थाः परस्परं भिन्नाः, अवश्यं पृथगपि ते समुपलभ्यन्ते । न त्वेवं समुदायः समुदितेभ्यः कदाचिदपि पृथगुपलब्धः । तस्मात्समुदायो नाम द्रव्यं न शक्यते गुणेभ्यः सर्वथा पृथगभ्युपगन्तुम् । किं च द्रव्यगुणयोः पृथक्त्व उभयोरप्यलक्ष्यतापत्तिः, औष्ण्यविरहितस्याग्नेरिव ज्ञानादिविरहितस्य जीवादेर्जीवादिद्रव्यमनाश्रितस्य ज्ञानादेर्वा निरूपयितुमशक्यत्वात् । किं च यदि ज्ञानादिभिन्नोऽयं जीवो द्रव्यमभ्युपगम्यते, तर्हि ज्ञानसम्बन्धात्पूर्वमयं ज्ञानी वा स्यादज्ञानी वा ? आद्ये पक्षे ज्ञानगुणाभ्युपगमस्यैव वैयर्थ्यमापद्येत । द्वितीये तु ज्ञानित्वमिवाज्ञानित्वमपि तस्याज्ञानगुणसम्बन्धादेव कल्प्यमिति तत्सम्बन्धात्प्राक् कीदृश आत्मेति निर्वक्तव्यम् । स्वाभाविकमज्ञानित्वमिति चेज् ज्ञानमपि तुल्यन्यायेन स्वभाव एवास्तु । तथा च पृथक्त्वासिद्धिः । न च पृथक्त्वेऽप्ययुतसिद्धत्वात्, पृथगुपलम्भो न युज्यत इति साम्प्रतं वक्तुम् । असम्बन्धद्वयोरेव सम्बन्धप्रवृत्तेर्लोके दृष्टत्वात् । समवायो नाम नित्यसम्बन्ध इति तु कल्पनामात्रम्, नित्यसंबद्धतायाः स्वभाव एव पर्यवसितत्वात् । किं चान्यत्–आत्ममानसेन्द्रियविषयसंयोगे समुत्पद्यमानोऽयं ज्ञानं नाम गुणः कुतस्तावदात्मन्येव समवैति न तु घटादाविति कारणं वाच्यम् । घटादेर्जडत्वेन ज्ञानसमवायायोग्यत्वादिति चेत्किमिदं जडत्वं नाम । ज्ञानानधिकरणत्वमिति चेदात्मन्यपि तुल्यमेव तत् ततः प्राक् । अस्ति पूर्वमप्यात्मनो ज्ञानान्तराधिकरणतेति चेत्तत्रापि ज्ञाने तुल्यः स एव पर्यनुयोगः । योग्यता तु स्वभाव एव पर्यवसिता । तस्मात्स्वभाव एवात्मनस्तथा भूतो ज्ञानवत्त्वं नामेत्येव वक्तव्यमित्यस्मत्पक्षकुक्षौ प्रवेशः । अथ च समवायोऽयं द्रव्यादभिन्नो द्रव्येण सम्बध्यते न वा ? न संबध्यते चेदसंबद्धः कथमयं ज्ञानगुणवत्त्वमात्मनो व्यवस्थापयेत् । संबध्यते चेत्केन सम्बन्धेन ? सोऽपि च संबन्धः केन सम्बन्धेनेत्यनवस्थाप्रसङ्गो दुर्निवारः ।

किं च पृथग्भूतज्ञानगुणसंबन्धस्तावददस्य जीवस्य किमर्थमभ्युपगम्यत इति पृच्छामः । ज्ञप्तिशक्तिसिद्ध्यर्थमिति चेद् ज्ञान एव सा शक्तिः कुतस्त्या ? ज्ञानत्वसंबन्धादागतेति चेद् ज्ञानत्वे कुतः प्राप्ता ! स्वभावादिति चेत्सोऽयमन्ते रण्डाविवाहन्यायावतारः । जीव एव स्वभावाज् ज्ञप्तिशक्त्युपगमौचित्यात् । तदेवं बहुविधाः खलुः दोषा द्रव्यगुणभेदैकान्ते निराबाधं प्रसर्पेयुः । तस्मात्समुदायः समुदितेभ्यो नात्यन्तं भिन्नः व्यतिरेकेणानुपलब्धेर्द्रव्यार्थिकनयापेक्षया त्वभिन्न इति ।

ततश्च समुदायस्य समुदितेभ्यो भेदाभेदावेवाश्रयणीयतया पतितौ । कथंचिदभिन्नः कथंचिच्च भिन्न इति । व्यतिरेकेणानुपलब्धद्रव्यार्थिकनयापेक्षया तावदभिन्नः संज्ञा—लक्षणो—पकारादिभेदात्तु पर्यायार्थिकनयापेक्षया भिन्न इति । ननु कोऽयं नयो नामेति चेत्, वक्तुरभिप्रायविशेषावधारणार्था ज्ञानभेदा एव नया इति गृहाण । तथा हि–सर्वमपि वस्तु अनेकान्तात्मकमिति प्रतिज्ञायते । अनेकान्तात्मकमनेकधर्मात्मकमिति यावत् । तच्च सामान्यविशेषादिविविधभेदभिन्नानेकगुणसमुदायरूपत्वाद् अनेककार्यकारित्वाद् अनेकशब्दाभिधेयत्वाद्, प्रतिक्षणमवस्थान्तरोपस्थितावपि तत्त्वेन प्रत्यभिज्ञायमानत्वाच्च सर्वेषां द्रव्याणां सर्वत्रानुभूयत एव निष्प्रत्यूहम् । तथा च अनेकान्तात्मकत्वं नामेदं भावत्वेन व्याप्तम्, सर्वत्रापि भावेषु युगपत् क्रमेण वा विविधधर्माश्रयतायाः स्पष्टमनुभूयमानत्वात् । तदित्थमभाववैलक्षण्यमेव भावेष्वनेकान्तात्मकतां प्रयोजयतीति निर्विवादमेतत् ।

अनेकधर्मात्मकं च सर्वमपि वस्तु न साकल्येन शब्दैर्युगपत्प्रतिपादयितुं शक्यम्, शब्दानामेकधर्मपुरस्कारेणैव तत्तद्वस्तु प्रतिपादनस्वाभाव्यादिति यं कंचनैकमेव धर्ममवलम्ब्य वक्तुरभिप्रायेण शब्दाः प्रयुज्यन्ते–स्याद्वा विशेषमुपसर्जनीकृत्य

सामान्यमवम्ब्य; स्याद्वा सामान्यमुपसर्जनीकृत्य विशेषमवलम्ब्य । तत्र सामान्यपुरस्कारेण द्रव्यपर्यायाणामभेदनित्यत्वादिग्राहकोऽयं द्रव्यार्थिकनयः, विशेषपुरस्कारेण भेदक्षणिकत्वादिग्राहकस्तु पर्यायार्थिकः । त एते नया बुद्धिप्रकरण एव प्रपञ्चेनाभिधातव्या इति प्रसक्तानुप्रसक्तेरुपरमामः ।

ततश्च सिद्धमेतद् गुणानां पर्यायाणां च समुदायो द्रव्यं नाम समुदितेभ्यो गुणेभ्यः पर्यायेभ्यश्च नयभेदात्कथंचिदभिन्नः कथंचिच्च भिन्न इति । तत्र भेददृष्ट्या गुणपर्यायवद् द्रव्यमिति मतुब्घटितं लक्षणं द्रष्टव्यम्, अभेददृष्ट्या तु गुणाः पर्याया एव च द्रव्यम् । अस्य च गुणसमष्ट्यात्मकस्य द्रव्यस्य प्रतिप्रदेशमभिव्याप्य सर्वे गुणास्तिष्ठन्ति, न तु, परस्परप्रदेशपरिहारेण । एकस्मिन् प्राङ्गणे बहुप्रदीपप्रकाशवदबहूनां गुणानां व्याप्यवृत्तित्वे विरोधानवतारात् । सर्वदा च सर्वाण्यपि द्रव्याणि यत्परिणमन्ति त इमे पर्याया अपि द्विविधाः, परापेक्षानपेक्षाकृतभेदात्, परमनपेक्ष्य स्वतः परिणामः स्वभावपर्यायः, परापेक्षया तु परिणामो विभावपर्याय इति । अस्ति किलाम्रफलं परमनपेक्ष्यैव मार्दवपीतत्वादिविशिष्टतया परिणमते । अस्ति च दुग्धमम्लद्रव्यमपेक्ष्य दध्यात्मना परिणमत इति सर्वत्रैवेदमालोच्यम् । पर्यायाणां च द्रव्यैर्भेदाभेदावुपपादितावधस्तात् । तथा च परिणतौ सर्वाण्यपि द्रव्याणि युगपदुत्पादव्ययध्रौव्ययुक्तानि सिद्ध्यन्ति । यथा हि मृत्पिण्डाद् घटे जायमाने घटरूपेणोत्पादः पिण्डरूपेण व्ययः मृद्रूपेण तु ध्रौव्यम् । एवमेवात्मनि घटज्ञानानन्तरं पटज्ञान उपजायमाने पटज्ञानरूपेणोत्पादः, घटज्ञानरूपेण व्ययः, ज्ञानसामान्यरूपेणात्मरूपेण च ध्रौव्यम् ।

मनुष्यपर्यायं प्रतिपन्नस्य जीवस्य हस्तित्वप्रतिपत्तौ हस्तिरूपेणात्मन उत्पादः, मनुष्यरूपेण व्ययः, आत्मत्वेन च ध्रौव्यमित्यादि तत्र तत्रालोच्यम् । अत एवोत्पादव्ययध्रौव्ययुक्तं सदिति तत्र तत्रालोच्यम् । अत एवोत्पादव्ययध्रौव्ययुक्तं सदिति

सल्लक्षणमभिप्रयन्त्याचार्याः । सच्च खलु द्रव्यम्–उत्पादव्ययध्रौव्ययोगात् । यत्र तु नैतानि तदिदं खपुष्पादिवदसदिति पर्यालोच्यं सुसूक्ष्मया दृशा ।

ननु च भो अत्र तावदन्यस्योत्पादोऽन्यस्य व्ययोऽन्यस्य च ध्रौव्यमिति कथं त्रैरूप्यमेकस्य वक्तुमध्यवसितोऽसि, उत्पादः खलु घटस्य, व्ययः पिण्डस्य, ध्रौव्यं तु मृद इति चेत्तदविवेकात् । न हि पिण्डघटादयो, घटज्ञानपटज्ञानादयो, हस्तित्वमनुष्यत्वादयो वा पर्याया मृद्द्रव्याज्जीवद्रव्याच्चैकान्ततो भिद्यन्त इत्यवोचाम । न हि तद्व्यतिरेकेण तानि परस्परं क्वचिदुपलभ्यन्ते । तथा च द्रव्यस्यैव केनचित्पर्यायेणोत्पादोऽन्यपर्यायरूपेण व्ययः स्वरूपेण च ध्रौव्यमिति सूक्तमेतत् 'उत्पादव्ययध्रौव्ययुक्तं सदिति, ।

अथैवं सत्यात्मनाऽभिन्नस्य घटज्ञानस्य विनाशे तदभिन्न आत्मापि विनष्ट इति क्षणिकवादप्रवेशापत्तिरिति चेन्नैतदेवम् । कथंचिद्भेदस्याप्युपपादितत्वात् । किं च व्ययो नामास्मद्दर्शने नात्यन्तं विनाशः, उत्पादोऽपि नाभिनवप्रादुर्भावः, अपि तु पूर्वस्मिन् क्षणे योऽयं द्रव्यपर्यायः स एवोत्तरक्षणे पर्यायान्तरतामापद्यते । पूर्वक्षणिको हि मृदः पिण्डपर्याय एवोत्तरक्षणे घटरूपो भवति, जीवस्य घटज्ञानमेव चोत्तरक्षणे पटज्ञानात्मना परिणमते । अन्यथा हि पूर्वक्षणे पूर्वपर्यायविनिवृत्तावुत्तरपर्याये चोत्पत्स्यमाने मध्ये क्षणमेकं पर्यायविरहितं द्रव्यं प्रसज्येत । न चैतत्संभवति, द्रव्यपर्याययोः साहचर्यनियमात् । तथा च पूर्वपर्याय एवोत्तरपर्यायतामासादयतीति नात्र क्षणिकवादशङ्कावसरः । व्याख्यातौ च पर्यायरूपेणैवोत्पादव्ययौ, द्रव्य रूपेण तु ध्रौव्यमेव । असतो हि द्रव्यस्योत्पत्तावभिप्रेतायां कदाचिच्छशविषाणमप्युत्पद्येत, सतश्चात्यन्तं विनाशे सर्वाभावोऽपि कदाचित्प्रसक्तः स्यात । तस्मात्पर्यायरूपेणैवोत्पादविनाशौ । *षट्स्थानपतितया वृद्ध्या हान्यापि च

*प्रणञ्चितव्यमिदमर्थप्रकरणे ।

गुणानामेवोत्पत्तिविनाशावभिप्रेतौ, द्रव्याणां स्वत्वरूपेण तु ध्रौव्यमेवेति । अत एव प्रत्यभिज्ञाप्रामाण्यमप्युपपद्यत इति कृतं बहुना प्रजल्पेन । तदित्थं पर्यायरूपेणानित्यत्वे स्वरूपेण च नित्यत्वाऽभ्युपगते सिद्धं पदार्थानां नित्यानित्योभयात्मकत्वम् ।

ननु नित्यानित्यत्वभेदाभेदादीनां विरुद्धस्वभावानां सामानाधिकरण्याभ्युपगमोऽयमसांप्रतम्, न हि शैत्यौष्ण्यादिविरुद्धधर्माणामैकाधिकरण्यं शक्यते प्रेक्षावता केनाप्यभ्युपगन्तुम्; वह्निरुष्णः शीतश्चापीति प्रतीत्यापत्तेः । तस्मान्नित्यत्वमेवाभ्युपगम्यतामनित्यत्वमेव वा, अभेद एव वा द्रव्यस्य गुणैरुपगन्तव्यो भेद एव वा । यदि चोभावपि प्रतीतिसिद्धावित्यभिप्रैषि, तर्हि तत्राप्येकस्य वास्तवत्वमपरस्यौपचारिकत्वं च व्यवस्थाप्यताम् । मुखं चन्द्रः, सिंहो माणवक इत्यादौ भेदस्य वास्तवत्वेऽभेदोपचारवत्, शिलापुत्रकस्य शरीरमित्यादावभेदस्य वास्तवत्वे भेदोपचारवच्च । व्यवस्थितिरेव ननु प्रयोजनं शास्त्राणाम्, अव्यवस्थां तु यद्युररीकुर्वते शास्त्राणि, तदा क एषां पांसुलपादैर्हालिकैर्भवेद् भेदः । न चारोपितत्वमनभ्युपगम्य विरुद्धधर्मयोरेकत्र व्यवस्थितिरुपपद्यत इति चेदहो मोहविजृम्भितम् ।

उभयोरपि धर्मयोरेकत्र प्रत्ययसिद्धत्वे विरोधस्य दूरं निरस्तत्वात् । प्रतीतिवल्लभ्य एव ननु विरोधः । ययोर्धर्मयोः सामानाधिकरण्यं न क्वाप्युपलभन्ते, तयोरेव विरोधमुपकल्पयन्ति लोकाः । इह तु सामानाधिकरण्यमेव प्रतीतिसिद्धमिति कोऽत्र विरोधापादनावसरः । तथाहि शुक्लो घटः, घटे शुक्लं रूपम् इत्यादिप्रतीतेर्भेदाभेदैकान्तयोरसम्भवस्योपपादितत्वाच्च द्रव्यस्य गुणैर्भेदाभेदावेव प्रसिद्ध्यतः । एवं पिण्डपर्यायविनाशस्य घटपर्यायोद्भवस्य च प्रत्यक्षमक्ष्णा गृह्यमाणत्वान्मृद्रूपेणोभयत्र प्रत्यभिज्ञायमानत्वाच्च पर्यायैरपि भेदावेव । तथा च घटे कृष्णरूपं विनष्टम्, लोहितं तूपजातम् । पिण्डो विनष्टः घट उपजातः

मृदनुवर्तत इति नित्यानित्यत्वं प्रतीतिबललभ्यं केन वा शक्यं प्रत्याख्यातुम् । कथं च सिध्येत्प्रतीतयोर्विरोध इति विभाव्यतां मनाक् ।

किंच न वयमुच्छृङ्खलं नित्यानित्यत्वं भिन्नाभिन्नत्वं वा क्वचित्प्रतिजानीमहे, येन विरोध आस्पदं विन्देत । तत्तद्द्रव्यपर्यायाद्यपेक्षया तु नयार्पणाभेदादनेकान्ततां ब्रूमः । तथाच विरुद्धानामपि जन्यत्व-जनकत्व, परत्वा-परत्व, ज्येष्ठत्व-कनिष्ठत्वादीनां धर्माणामपेक्षाभेदाद्यथैकस्मिन्नुपपत्तिः, देवदत्तो यज्ञदत्तस्य पिता, विष्णुमित्रस्य तु पुत्र इति, चैत्राज्ज्येष्ठो, मैत्रात्तु कनिष्ठ इति, प्रयागात्काशी पूर्वा, पाटलिपुत्रात्तु पश्चिमेत्येवमादि, तथैव ननु जीवादिद्रव्यमपि जीवत्वादिरूपेण नित्यं गुणैः पर्यायैश्चाभिन्नम्, घटज्ञानत्वादिरूपेण मनुष्यहस्त्यादिरूपेण चानित्यं भिन्नं चेति को विरोधः । एवं शैत्यौष्ण्ययोरप्येकस्मिन्नवयविनि धूपघटादाववच्छेदकभेदेनोपलम्भोऽस्त्येवेति भवद्दृष्टान्तोऽपि विपरीतः । न च घटे देशभेदेनैव शैत्यौष्ण्ययोरवस्थानमिति केचिदवयवाः शीता एव, नहि य एवावयवाः शीतास्त एवोष्णा इति क्व सामानाधिकरण्यम् । प्रकृतेऽपि च पर्याया अनित्या एव, द्रव्यन्तु नित्यमेवेत्येवाभ्युपगम उचितस्तथा च नानेकान्तवादः सिद्धयतीति चेद्, हन्त स्यादियं व्यवस्था, यदि द्रव्यं पर्यायेभ्योऽत्यन्तं भिन्नमेव भवेत्, तदेव तु नास्तीत्यसकृदवोचाम । तथैवायमवयवी घटोऽपि नैकान्ततः स्वावयवेभ्यो भिन्न एवेति घटनामावयविनि शैत्यौष्ण्ययोः सामानाधिकरण्यं न शक्यते प्रत्याख्यातुम् । तस्मात्पर्यायाणामनित्यतया तदभिन्नस्य द्रव्यस्यापि कथंचिदनित्यत्वमस्त्येव, स्वरूपापेक्षया तु नित्यत्वमप्यस्त्येवेति नयार्पणाभेदान्नास्ति विरोध इत्याकलनीयं सुसूक्ष्मम् । * केचित्तु नित्यानित्यत्वादिकं नित्यत्वादनित्यत्वाच्च विलक्षणमखण्डं धर्ममुररीकृत्य विरोधं परिहरन्तीत्यास्तां तावत् ।

* 'स्याद्वादमञ्जरी' षड्दर्शनसमुच्चयादौ ।

* तदित्थम् द्रव्यार्थिकनयार्पणापेक्षया **'स्यान्नित्यो जीवः'** (१) *पर्यायार्थिकनयार्पणापेक्षया तु **'स्यादनित्यो जीवः'** (२) एवं च *क्रमार्पितोभयनयापेक्षया **'स्यान्नित्यश्चानित्यश्च जीवः'** (३) * युगपदुभयनयार्पणे तु कस्याप्येकस्य शब्दस्य युगपत्प्रधानभूतानेकधर्मावच्छिन्नवस्तुबोधने शक्त्यभावात् **'स्यादवक्तव्यो जीवः'** (४) इदं चावक्तव्यत्वं नाम नित्यत्वानित्यत्वसमष्टिरूपमपि नित्यत्वादनित्यत्वाच्च *पानकरसादिन्यायेन धर्मान्तरतामापन्नमित्यनुभवसिद्धम् ।

तथा च नित्यत्वेन सहावक्तव्यत्वविवक्षायां* 'स्यन्नित्यश्चावक्तव्यो जीवः' (५) अनित्यत्वेन सहावक्तव्यत्वविवक्षायान्तु* 'स्यादनित्यश्चावक्तव्यो जीवः' (६) एवं क्रमार्पितोभयेन सह युगपदर्पितोभयविवक्षायां* 'स्यान्नित्यश्चानित्यश्चावक्तव्यो जीवः' (७) इति । एषामेव भङ्गापरपर्यायाणां सप्तानां वाक्यानां समवायः सप्तभङ्गी नाम जैनागमे सुप्रसिद्धा स्याद्वाददर्शनजीवातुः । इयं च सर्वत्रापि वस्तुषु तद्गतसर्वधर्मानपेक्ष्याप्रतिहतं प्रवर्तत इति प्रतिजानते स्याद्वाददक्षाः । तथाहि–द्रव्यार्थिकनयापेक्षया* जीवो ज्ञानादिभ्यः स्यादभिन्नः, पर्यायार्थि-

* द्रव्यस्वरूपापेक्षया । स्वरूपविवक्षायामिति यावत् ।
* परिवर्ति–पर्यायस्वरूपविवक्षया ।
* द्रव्यस्वरूपस्य पर्यायाणां च क्रमेण विवक्षायाम् ।
* युगपदुभयस्वरूपविवक्षायाम् ।
* यथा मधुराम्लकट्वाद्यारब्धपानकद्रव्यरसो मधुरादिभ्यो भिद्यते तद्वदिति भावः ।
*–द्रव्यस्य युगपद् द्रव्यपर्यायैः सह विवक्षायाम् ।
*–पर्यायस्य युगपद् द्रव्यपर्यायैः सह विवक्षायाम् ।
*–द्रव्यपर्याययोः क्रमेण द्रव्यपर्याययोर्युगपच्च सह विवक्षायाम् ।
*–द्रव्यमात्रविवक्षायाम् ।

कनयापेक्षया* तु स्याद्भिन्नः, क्रमेण नयद्वयार्पणे स्याद्भिन्नश्चाभिन्नश्च, युगपन्नयद्वयार्पणे स्यादवक्तव्यः । चतुर्थस्य क्रमेणाद्यैस्त्रिभिः सह विवक्षणे स्यादभिन्नश्चावक्तव्यः, स्याद्भिन्नश्चावक्तव्यः, स्यादभिन्नश्च भिन्नश्चावक्तव्यः–इति । तथैव खलुस्वरूप–स्वक्षेत्रस्वकालाद्यपेक्षया* 'स्यादस्ति जीव.' पररूप–परक्षेत्र-परकालाद्यपेक्षया 'स्यान्नास्ति जीवः' क्रमेणोभयथा विवक्षायां 'स्यादस्ति च नास्ति च जीवः' । स्वरूप–स्वक्षेत्राद्यपेक्षया, पररूप–परक्षेत्राद्यपेक्षया च युगपद्विवक्षायान्तु तथार्थप्रतिपादकस्य कस्यापि शब्दस्याभावात्स्यादवक्तव्यो जीवः । इदमप्यवक्तव्यत्वमस्तिनास्तिसमष्टिरूपमपि पानकरसन्यायेन विभिन्नतामेवापन्नमिति तस्य क्रमेणाद्यैः सह विवक्षायां 'स्यादस्ति चावक्तव्यः, 'स्यान्नास्ति चावक्तव्यः' 'स्यादस्ति च नास्ति चावक्तव्यः' । इत्थमेव सर्वत्र योज्यम् । अत एव सर्वेषु विषयेषु सर्वथैकान्तवादान् दर्शनान्तराभिमतान्निराकरोति स्याद्वाददर्शनमिदम्, स्वयं चानेकान्तदर्शनमित्याख्यायते । अस्यैव तु महतो दर्शनस्य वस्तुकार्त्स्न्यं व्याचक्षाणस्य तत्तदेकैकमंशमादाय तानि दर्शनानि परस्परे विवदन्त इति स्याद्वादिनां दृष्टिः । तादित्थमियं सप्तभङ्गी संक्षेपतः प्रसङ्गादुपदर्शिता । भूयोऽपि नयनिरूपणसम्बन्धेन बुद्धिप्रकरणे समुपदर्शनीया । द्रव्यविषये च यदन्यदवशिष्टं तदर्थप्रकरणेऽभिधातव्यमिति प्रसक्तानुप्रसक्तेरुपरताः प्रकृतं जीवविषयमनुसरामः ।

तस्यैतस्य जीवापरपर्यायस्यात्मद्रव्यस्येतरव्यावृत्तो विशेषगुणश्चैतन्यम् । तच्च किमिति चेद् ज्ञानदर्शनसुखवीर्याख्यगुणचतुष्टयमेवोच्यते चैतन्यम् । 'अस्तीदम्' इति वस्तु यत्केवलमालोच्यते, न तु घटत्व-पटत्वादिना विशेषरूपेण गृह्यते

*–पर्यामयात्रविवक्षायाम् ।

*–जीवो जीवत्वेनास्ति, पुद्गलत्वेन तु नास्ति । एवं क्वचिद्देशे अस्ति, क्वचित्तु नास्ति । तथैव कालादिसम्बन्धेनापि द्रव्यान्तरेष्वप्यूह्यम् ।

तदिदमनाकारं दर्शनं नामोच्यते । अनितरव्यावृत्तेन सामान्येन रूपेण वस्तुग्रहणमिति यावत् । सामान्यविशेषाभ्यां वस्तुयथात्म्यावधारणं साकारं तु ज्ञानम् । यत्सविकल्पकमित्युच्यते दर्शनान्तरीयैः ।

एते एव ज्ञानदर्शने 'उपयोगो जीवलक्षणम्' इत्यादावुपयोगशब्देन व्यवह्रियेते । तत्र यद्यप्यात्मनोऽनन्तं ज्ञानमनन्तं दर्शनमनन्तं वीर्यमव्याबाधं नित्यं च सुखं स्वभावसिद्धम्, अथाप्यनादिना कर्मबन्धेन समावृतस्वभावोऽयमल्पज्ञानदर्शनवीर्यः सुखदुखादिकं च कर्मफलप्रापितमाप्नुवन् सांसारिकीं स्थितिमनुभवति । सोऽयं कर्मबन्धोऽस्य 'मिथ्यादर्शनाविरतिप्रमादकषाययोगाख्यैः' स्वस्यैव पर्याय (परिणाम) विशेषैरापाद्यते । तत्र मिथ्यादर्शनं नाम सम्यगुपदेशे श्रद्धानाभावपूर्वकं मिथ्योपदेशे श्रद्धानम् । तच्च कस्यचिदशुभकर्मोदयात् स्वत उदेति, कस्यचित्तु भगवदर्हदितरतैर्थिकोपदेशजन्यः । अस्ति हि जैनेतरदर्शनानि सर्वथा मिथ्यादर्शनानीति जैनानां दृढतरोऽभिनिवेशः । तथा च दर्शनान्तरजन्यं ज्ञानमुपदेशजं मिथ्याज्ञानम् । अविरतिश्च हिंसास्तेयासत्यकुशीलपरिग्रहादीनां विनिवृत्तेरभावः । मनःषष्ठानामिन्द्रियाणां विषयेषु सरागं प्रवृत्तिरप्यविरतिरेव । क्रोध-मानमाया–लोभाद्याः कषायाः । 'कषन्ति हिंसन्त्यात्मानमिति' कषायाः, । यद्वा सादृश्येन हेतुनायं कषायशब्द उपचरित एषु द्रष्टव्यः । न्यग्रोधादिरसा हि कषाया इति मुख्यतया वृत्त्योच्यन्ते, त एव कर्मसंश्लेषहेतुत्वादिमे क्रोधादयोऽपि कषाया इति । मुक्त्युपायभूतेषु कर्मस्वनादरः स्मृत्यनवस्थानादिश्च प्रमादः ।

अथात्मप्रदेशपरिस्पन्दो योग इत्याख्यायते । योगः, कर्म, क्रिया चेत्यनर्थान्तरम् । सोऽयं योगस्त्रिविधः । कायवाङ्मनोयोगभेदात् । तत्र शरीरप्रदेशानवलम्ब्यात्मनः प्रदेशपरिस्पन्दः काययोगः । वाक्परिणामाभिमुखस्यात्मनः प्रदेशपरि-

स्पन्दो वाग्योगः । मनःपरिणामाभिमुख्ये च मनोयोगः । वाङ्मनसी इमे आत्मन एव प्रदेशपरिणाम इत्यास्तामिदमप्रकृतम् । स एष योगः शुभोऽशुभश्च पुण्यस्य पापस्य च कर्मणो यथासंख्यं बन्धहेतुः ।

तीव्र–मन्द-ज्ञाताज्ञातादिभेदेन, कृतकारितानुमतादिभेदेन क्रियाणां बाहुल्येन च प्रत्यात्मनियता बहवो योगस्य भेदाः संभवन्ति, ते तु धर्मप्रकरण एव विशेषेणोपयुज्यन्त इति नेह दर्शनसंग्रहे विशेषतः प्रपञ्चयन्ते ।

तदेवं व्याख्याताः पञ्च बन्धहेतवः । एते हि समस्ता व्यस्ताश्चोपलभ्यन्ते, तत्र पूर्वपूर्वभावे नियत उत्तरोत्तरेषां भावः । उत्तरसत्तायान्तु पूर्वभावो न नियतः । तथा च मिथ्यादर्शनाविष्ट आत्मनि पञ्चापि बन्धहेतवः । तद्रहित आत्मनि उत्तराश्चत्वार इत्याद्यूह्यम् । कषायविनिर्मुक्तेषु केवलज्ञानसंपन्नेषु तु योग एवैको बन्धहेतुः । तानेतान् बन्धहेतूनास्रवशब्देन व्यवहरन्त्याचार्याः । यथा हि जलास्रवणहेतुभूतं सरः सलिलवाहिद्वारमास्रवशब्देन लौकिका आचक्षते, तथैव खलु कर्मणामास्रवणहेतुभूतमिदं योगाद्यपि निर्विशेषमास्रवशब्देनात्मज्ञा अभिप्रयन्तीति । ननु कर्मबन्धहेतुभूतास्त इम आत्मनः पर्यायविशेषा एव केन हेतुनोपजायन्ते । न खल्वात्मनः स्वाभाविका एते (मिथ्यादर्शन क्रोधाद्याः) पर्याया इति शक्यमभिधातुम् तथा सति मुक्तानामप्यात्मनामेतदाविर्भावे कर्मबन्धप्रसङ्गादिति चेत्सत्यम् । कर्मबन्धहेतुका एव मिथ्यादर्शनादय आत्मपरिणामाः—इत्यभ्युपगमे नास्ति कापि क्षतिः । न चैवमन्योन्याश्रयः, अनादौ संसारे बीजाङ्कुरवददोषात् । यथा हि किञ्चिद्बीजमङ्कुरं जनयति, अङ्कुराच्च तरुभूतादपरं बीजं काले उत्पद्यत इति बीजाङ्कुरयोरनादिरनन्तः कार्यकारणभावः, तथैव केचिद्रागादयः कर्मबन्धं जनयन्ति, कर्मबन्धाच्चापरे रागादयः प्रजायन्ते इत्यनादिरयमास्रवस्य बन्धस्य च कार्यकारणभावप्रबन्धः ।

अथ कोऽयं बन्ध इति चेत्, यथैवार्द्रश्चूर्णादिपिण्डः समीपे प्रसृतान् रेणूनुपाददद् दृष्टः, तथैव मिथ्यादर्शनाद्यावेशादार्द्रीकृतोऽयमात्मापि लोकाकाशक्षेत्रेषु सूक्ष्मावगाहेन कृतस्थितीनि कर्मभावयोग्यानि पुद्गलद्रव्याण्युपादत्ते, यथा वा सन्तप्ततमोऽयसः पिण्डः स्वसम्बन्धमनुप्राप्तान् वारिबिन्दूनात्मसात्करोति, तथैवायं कषायपरितप्त आत्माऽप्यभिन्नप्रदेशानि सूक्ष्मपुद्गलद्रव्याण्यात्मसात्करोतीति, स एष आत्मपुद्गलयोः पारस्परिकः सम्बन्ध एव बन्धः । स चायं समासेन चतुर्धा व्याख्यायते–प्रकृतिबन्धः, अनुभवबन्धः, प्रदेशबन्धश्चेति । तत्र विविधरसबीजपुष्पफलादीनां मदिरादिपरिणामवदात्मनोपात्तानां सूक्ष्मपुद्गलानां कर्मभावेन परिणतौ तेष्वष्टविधशक्तिप्रादुर्भावः प्रथमः प्रकृतिबन्धः । अष्टविधशक्तियोगाच्च तानि कर्माण्यप्यष्टधा व्यपदिश्यन्ते–ज्ञानावरणम् दर्शनावरणम्, वेदनीयम्, मोहनीयम्, आयुः, नाम, गोत्रम्, अन्तरायश्चेति । मूर्तान्येतानि कर्माणि पुदगलपर्यायाः, एतत्सम्बन्धादेवात्मनोऽपि मूर्तत्वम् । एषामुदयवशादभिभववशाच्च विविधा आत्मनोऽवस्थाः प्रादुर्भवन्ति । तत्राद्यं ज्ञानावरणमात्मनः पञ्चविधज्ञानशक्तिमुपावृणोतीति तत्पञ्चविधमेवाख्यायते । द्वितीयं दर्शनावरणं चतुर्विधां दर्शनशक्तिमावृणोति, स्वस्योदयकाले च पञ्चविधामात्मनोऽवस्थां यथायोगमाविर्भावयतीति संभूय नवविधं तत् । इमाः खलु तस्योदये सत्यात्मनः पञ्चावस्थाः निद्रा, निद्रानिद्रा, प्रचला, प्रचलाप्रचला, स्त्यानगृद्धिश्चेति । तत्र मदखेदक्लमाद्यपनोदनाय स्वापो निद्रा नाम प्रसिद्धा, यस्यां ज्ञानदर्शनयोरभावः सर्वैरापामरमनुभूयते । तस्या उत्कृष्टा वृत्तिर्निद्रानिद्रा । शोकश्रममदादिभिरासीनस्यापि यत्र नेत्रगात्रादिविक्रियोपलक्ष्यते सेयमात्मनः प्रचलावस्था । तस्या एव च पौनःपुन्येन प्रवृत्तिः प्रचलाप्रचला । स्वप्नेऽपि वीर्यविशेषाविर्भावेन या नीतिरुपलक्ष्यते–ययायमात्मा रौद्रं बहुकर्म करोति सा स्त्यानगृद्धिः । स्त्याने स्वप्ने गृद्धिर्दीप्तिरित्यर्थात् । इमा

अवस्थाः कर्मोदयजन्याः, श्रमादयो वातपित्तकफादयो वा तत्र सहकारिकारणानि, कर्मोदयहेतुभूतानि वा ।

अथ तृतीयं वेदनीयं कर्म स्वोदये यथायोगमात्मानं सुखं दुःखं वानुभावयतीति सुखवेदनीय–दुःखवेदनीयभेदाद् द्विविधम् । चतुर्थं मोहनीयं तु समासतो द्विविधम् दर्शनमोहनीयम्, चारित्रमोहनीयं च । तत्पुनरवान्तरभेदैरष्टाविंशतिधा । तथा हि आद्यं दर्शनमोहनीयं मिथ्यात्व–सम्यक्त्व–तदुभयभेदात् त्रिविधम् । यद्धि जीवस्य सर्वज्ञोक्ततत्त्वार्थश्रद्धानपराङ्मुखत्वरूपं मिथ्यादृष्टित्वमापदयति तन्मिथ्यात्वम् । यदा तु तदेव शुभेनात्मपरिणामेन निरुद्धशक्ति न शक्नोति श्रद्धानं जीवस्य वारयितुमिति तत्रौदासीन्यमालम्बते तदा सम्यक्त्वपदवेदनीयं भवति । मध्ये क्षीणाक्षीणशक्तिकन्तु तदुभयमिति व्यपदिश्यते । अथोत्तरं चारित्रमोहनीयमकषाय–कषायवेदनीयभेदाद् द्विविधम् । अकषायशब्दे ईषदर्थको नञ्, अकषायाः–★ ईषत्कषायाः । ते च हास्यम्, रतिः, अरतिः शोकः, भयम्, जुगुप्सा, पुरुषवेदः स्त्रीवेदः, नपुंसकवेद इति नव । एषां कर्मणामुदयवशात् प्रसिद्धा हास्यादयः, स्त्रैणाः, पौंस्नाः, नपुंसकाश्च भावाः (आत्मनः पर्याय विशेषाः) यथाक्रममाविर्भवन्ति । एतानि अकषायवेदनीयानि नव कर्माणि । कषायास्तु क्रोध–मान–माया–लोभाख्याश्चत्वारः । क्रोधो द्वेषः, मानोऽहङ्कारः, माया दम्भः, लोभो रागः । एते प्रत्येकमवस्थाभेदाच्चतुर्विधाः, अनन्तानुबन्धिनः, अप्रत्याख्यानावरणा. प्रत्याख्यानावरणाः, संज्वलनाश्च । अनन्तं मिथ्यादर्शनमनुबध्नन्तोऽनन्तानुबन्धिनः । अल्पामपि विरतिं सर्वथा प्रतिबध्नन्तोऽप्रत्याख्यानावरणाः । विरताविरतिं सहमाना अपि संयमं प्रत्याचक्षाणाः प्रत्याख्यानावरणाः । सत्यपि संयमे ज्वलन्त उत्तमचारित्रलाभं

★ कषायशब्दार्थः प्रागुक्तोऽनुसन्धातव्यः–

विघ्नन्तश्च संज्वलनाः । तदेतेषां षोडशानां कषायाणां यदुदयान्निर्वृत्तिस्तानि षोडशकषायप्रवेदनीयानि कर्माणि । तदित्थमवसितमष्टाविंशतिविधं मोहनीयम् ।

नारक–तिर्यङ्–मनुष्य–देवानां चतुर्णामायुषो (जीवनकालस्य) नियामकं पञ्चममायुः कर्म, यद्वशात् प्राणिनां जीवनकालो व्यवतिष्ठते । तं तं भावमात्मानं नमयति प्रापयतीति नाम कर्म षष्ठम् । तच्च प्रथमं द्विचत्वारिंशद्विधमवान्तरभेदैश्च पुनर्बहुधाभिन्नमप्यवान्तरभेदानुपेक्ष्य संक्षेपतः प्रदर्श्यते । एतस्यैवोदयादात्मनो बाह्यार्थसम्बन्धप्रतिनियमः ।

१ यदुदयादात्मा भवान्तरंसंगच्छति तद्गतिनाम कर्म

२ यदुदयान्नारकतिर्यगाद्या जातीराप्नोति तज्जातिर्नाम ।

३ शरीरनिर्वृत्तिसाधनं शरीरनाम ।

४ अङ्गोपाङ्गादिविवेकजनकमङ्गोपाङ्गनाम ।

५ तत्तदङ्गोपाङ्गानां स्थानप्रमाणपरिक्लृप्तिसाधनं निर्माणनाम ।

६ शरीरभावाय परिगृहीतानां पुद्गलानां परस्परप्रदेशसंश्लेषणं यतो भवति तद्बन्धननाम ।

७ 'शरीराणां विवररहितान्योन्यप्रदेशानुप्रवेशेनैकत्वापादकं संघातनाम' ।

८ परिमण्डल–कुब्जादिविधशरीराकृति निर्वर्तकं संस्थाननाम ।

९ अस्थिबन्धनविशेषसाधनं संहनननाम ।

१० शरीरस्य मृदुकठिनादिस्पर्शनिर्वर्तकं स्पर्शननाम ।

११ एवमेवरसनाम ।

१२ गन्धनाम ।

१३ वर्णनाम ।

१४ च । जीवस्य भवान्तरप्राप्तौ पूर्वशरीराकारविनाशकमानुपूर्व्यनाम । केचित्तु गतावुत्पतितुकामस्यान्तर्गतौ वर्तमानस्य तदभिमुखमानुपूर्व्या तत्प्रापणसमर्थमानु-

पूर्वीनामे'त्याहुः । परे च 'निर्माणनिर्मितानां शरीराङ्गोपाङ्गानां विनिवेशक्रमनियामकमानुपूर्वीनामेति गदन्ति ।

१५ आत्मनोऽगुरुलघुपरिमाणनियामकमगुरुलघुनाम । यद्वशादात्मा नायःपिण्डादिवदधःपतति, न वा तेजोवदर्कतूलादिवच्चोर्ध्वं गच्छति ।

१६ यदुदये स्वयमुद्बन्धनादिनापघाते प्रवृत्तिस्तदुपघातनाम । अपरे तु शरीराङ्गापाङ्गोपघातकं स्वपराक्रमविजयाद्युपघातकं वा उपघातनामेत्याहुः ।

१७ परप्रतिघातसाधनं परघातनाम ।

१८ यदुदयादातपनशक्तिसिद्धिस्तदातपननाम । (यथा सूर्ये)

१९ उद्योतसामर्थ्यनिर्वर्तकमुद्योतनाम (यथा खाद्योतादौ) उच्छ्वाससाधनमुच्छ्वासनाम ।

२० यदुदयाद्विहायसागतिः संभवेत् तद्विहायोगतिर्नाम ।

२१ यदुदयाच्छरीरमेकस्यैवात्मन उपभोगसाधनं भवति तत्प्रत्येकशरीरनाम ।

२२ अनेकजीवसाधारणशरीरनिर्वर्तकन्तु साधारणशरीरनाम ।

२३ †त्रसत्वनिर्वर्तकं त्रसनाम ।

२४ स्थावरत्वनिर्वर्तकं स्थावरनाम ।

२५ यदुदयादन्येषामनुरागोत्पत्तिस्तत्सुभगनाम ।

२६ विपरीतन्तु दुर्भगनाम ।

२७ मनोज्ञस्वरनिर्वर्तकं सुस्वरनाम ।

२८ दुःस्वरनाम ।

† त्रसाः स्थावराः

रामणीयकतद्वैपरीत्यसाधने कर्मणी शुभनाम ।

अशुभनाम च ।

यदन्येन न प्रतिहन्यते न वान्यं प्रतिहन्ति तत् सूक्ष्मम्-तथाविधशरीरनिर्वर्त्तकं सूक्ष्मनाम ।

प्रतिघाति तु बादरमुच्यते तन्निर्वर्त्तकं बादरनाम ।

पर्याप्तिनिर्वर्त्तकन्तु पर्याप्तिनाम । पर्याप्तिस्तु षोढ़ा-आहारपर्याप्तिः, शरीरपर्याप्तिः, इन्द्रियपर्याप्तिः, प्राणापानपर्याप्तिः, भाषापर्याप्तिः, मनःपर्याप्तिश्चेति । केचिन्मनः पर्याप्तिं नेच्छन्तीति पञ्चधैव तेषाम् । पर्याप्तिस्तत्तदुचितद्रव्यग्रहणादिव्यापारपरिसमाप्तिरिति । तत्र वक्ष्यमाणेषु जीवभेदेषु-एकेन्द्रियस्य चतस्र आद्याः पर्याप्तयः, द्वीन्द्रियादीनान्तु भाषासहिताः पञ्च, पञ्चेन्द्रियेषु च केषाञ्चन षष्ठी मनःपर्याप्तिरपीत्यवगन्तव्यम् तासां यथायोग्यं निर्वर्त्तकमिदं पर्याप्तिनामकर्म ।

तदभावहेतुरपर्याप्तिनाम ।

स्थैर्यस्थैर्यनिर्वर्तके स्थिरनाम ।

अस्थिरनाम ।

प्रभोपेतशरीरकारणमादेयनाम-केचित्तु आदेयभावनर्वर्त्तकमादेयनामेति' ।

विपरीतमनादेयनाम ।

यशोनिर्वर्त्तकं यशोनाम (यशः कीर्त्तिनाम) ।

विपरीतमयशोनाम ।

यत्तु कर्म तीर्थंकरत्वं निर्वर्त्तयति तदिदं सर्वोत्कृष्टं तीर्थंकरनामेति ।

व्याख्यातं षष्ठं नामकर्म ।

अथाभ्यर्हणीयेषु विपरीतेषु च कुलेषु (देशादिषु च) गोत्रे कर्म उच्चैर्नीचैर्भेदात् द्विविधम् । तथान्तरायो नामाष्टमं कर्म तु जीवस्य दानलाभभोगोपभोगवीर्यशक्ति-

प्रतिबन्धकं पाञ्चविध्यमेव प्रयाति । ता इमाः कर्मणामष्टौ प्रकृतयः स्वभावाः । एषु ज्ञानावरणदर्शनावरणमोहनीयान्तरायाख्यानि चत्वारि घातिकर्माणीत्याख्यायन्ते । आत्मनःशक्तिनिरोधकत्वात् । शेषाणि तु चत्वार्यघातिकर्माणि । एष्वेव चाष्टविधेषु शुभपरिणामनिर्वर्त्तनसमर्थानि शुभानि पुण्यमित्यशुभानि तु पापमिति व्यवहारं विन्दन्ति । एषां च कर्मणामास्रवभूतास्ते ते क्रियापरपर्याया योगा आकरग्रन्थेषु व्याख्याता इति नेह विस्तरभयात्प्रतन्यन्ते । तत्तच्छुभाशुभक्रियाविष्टेनात्मनोपादीयमानाः पुद्गला यथाविधमुक्ताष्टविधशक्तियुताः संपद्यन्ते । अस्मिंश्च पुद्गलानां शक्त्युद्भवे आत्मनस्तत्तच्छुभाशुभक्रियावेश एव कारणम्, इत्ययं बन्धो योगविशेषकृत एवाख्यायते । न च युगपदुपादीयमानानां कर्मपुद्गलानामष्टविधत्वे शङ्कनीयम्, युगपदुपात्तस्याप्याहारस्य रसासृङ्मांसादिभेदेन बहुधा भिन्नत्वदर्शनात् । तदित्थमाख्यातः प्रथमः प्रकृतिबन्धः ।

त इमे यथायथमुक्तशक्तिविशिष्टाः सूक्ष्माः पुद्गला अनन्तानन्ता आत्मनैकक्षेत्रावगाहने वर्त्तमाना आत्मनः प्रदेशैरेकीभावमापद्यन्त इत्येष प्रदेशबन्धः प्रदिष्टः । सोऽयमेकीभाव आत्मन ऊर्ध्वाधस्तिर्यगवस्थितैः सर्वैरपि देशैः सह कर्मपुद्गलानामवसेय इति प्रत्यात्मप्रदेशमुपाश्लिष्यानन्तानन्ताः कर्मपुद्गला यावद्विपाकमनुवर्त्तन्ते, न हि ते संसारिणमात्मानं शरीरमशरीरं (भवान्तरप्राप्तौ) वा कदापि विजहति । एकीभावेऽप्यात्मनः पुद्गलभेदस्तु पूर्वमुपदर्शितेनोपयोगेन लक्षणेन सुविज्ञेय एव विदुषाम् ।

स चायमेकीभावाख्यः प्रदेशबन्धोऽप्यात्मनः क्रिययैवोपजायत इति योगहेतुक एवावसेयः । एषान्तु कर्मपुद्गलानामाविपाकमनुवर्त्तमाना परिच्छिन्नकाला पूर्वाभिहितस्वभावेभ्योऽप्रच्युतिः स्थितिबन्धः । आत्मना ह्युपात्तेषु कर्मभावयोग्येषु पुद्गलेष्वष्टविधशक्तीनामभ्युद्गमस्तावद् व्याख्यातः । तथा च अजागोमहिष्यादिक्षीरविशेषाणां यथा नियतकाला स्वीयस्वभावान्माधुर्यादप्रच्युतिस्तथैवैषां कर्मणामप्यात्मनिष्ठज्ञानशक्त्यावरणादिस्वभावेभ्यो नियतमेव कालप्रच्युतिरिति । स चायं कालनियमोऽपि सर्वज्ञोक्तागमदिशा सुविज्ञेयः । तथाहि-ज्ञानावरणदर्शनावरणान्तरायाणामपरा स्थितिरन्तर्मुहूर्त्तम्, परा तु त्रिंशत्सागरोपमकोटीकोट्यः । मध्ये चावान्तराः कालविकल्पा अवसेयाः । एवं वेदनीयस्यापरा द्वादशमुहूर्तम् परा तु पूर्वयोरिव । मोहनीयस्यापराऽन्तर्मुहूर्तम् । परा तु सप्ततिः सागरोपमकोटीकोट्यः । आयुष्कस्यापरा पूर्ववत्-परा तु त्रयस्त्रिंशत्सागरोपमानि । नामगोत्रयोश्चाष्टौ मुहूर्त्तानपरास्थितिः सागरोपमकोटीकोट्यस्तु परेति । तत्र परास्थितिरियं सर्वेषामपि कर्मणां मिथ्यादृष्टेः समनस्कस्य पञ्चेन्द्रियस्य पर्याप्तकस्य जीवस्य । अपरा तु 'ज्ञानदर्शनावरणान्तरायाणां सूक्ष्मसाम्पराये, मोहनीयस्य अनिवृत्तिवादरसाम्पराये । आयुषः संख्येयवर्षायुष्कतिर्यक्षु मनुष्येषु च' । मध्या तु मध्यमेषु यथागममनुसन्धेयेति—दिक् ।

अथात्मनः प्रदेशैरनुबद्धानां तेन सहैव भवे परिभ्रमतां तत्तच्छक्तिविशिष्टानां तत्तेषां कर्मणां क्रमेणोदयावलिस्रोतसि प्रविष्टानां यत्स्वस्वानुरूपविषयानुभावकत्वसामर्थ्यं सोऽयमनुभवबन्धो नाम । अयञ्च द्रव्यक्षेत्रकालभवभावलक्षणनिमित्तभेदैर्नानाविध्यमवगाहते, तत्र केषाञ्चिदष्टविधकर्मावान्तरभेदानामुत्तरप्रकृतिपदाभिधेयानां परमुखेनाप्यनुभवो भवतीत्यनुसन्धेयम्, मूलप्रकृतीनामष्टानान्तु न कदापि परमुखेन । तौ चैतौ स्थित्यनुभवबन्धौ कषायाणां तीव्रमन्दमध्यत्वाद्यनुविधायिनाविति कषायहेतुकावाख्यायेते । विविधा हि कषायभेदाः, तथाहि—क्रोधस्तावत्पर्वतराजिसदृशः ।

भूमिराजिसदृशः ।

बालुकाराजिसदृशः ।

उदकराजिसदृसश्चेति ।

इष्टवियोजनानिष्ट संयोजनादिजनितो मरणपर्यन्तमनुवर्त्तमानो निरनुनयस्तीव्र आद्यः, दुरनुनयस्तु द्वितीयः । अहोरात्रपक्षमासवत्सराद्यवस्थायी तृतीयः, क्षणसौम्यानां विदुषान्तु चतुर्थः । तथैव मानोऽपि शैलस्तम्भसदृशः, अस्थिस्तम्भसदृशः, दारुकास्तम्भसदृशः, लतास्तम्भसदृशश्च । एवं माया वंशकुणसदृशी, मेषविषाणसदृशी, गोमूत्रिकासदृशी, निर्लेखनसदृशी च । तथैव च लोभोऽपि लाक्षारागसदृशः, कर्दमरागसदृशः कुसुम्भरागसदृशो हरिद्रारागसदृशश्च । त एते कषाया यथाविधास्तीव्रा मन्दा वा जीवस्य भवेयुस्तथाविधावेव स्थित्यनुभवावपि प्रवर्त्तेते । तीव्रैस्तीव्रौ मन्दैस्तु मन्दावित्यालाचनोयम् । अनुभवानन्तरन्त्वात्मप्रदेशैर्निबद्धानि तानि कर्माण्यभ्यवहृतौदनादिविकारवन्निर्जीर्यन्ते, आत्मप्रदेशेभ्यश्च्यवन्तीति सैषा निर्जरेत्युच्यते । कैश्चित्तु अप्राप्तविपाककालान्यपि कर्माणि क्रियाविशेषाहितसामर्थ्यादुदीर्य विपाच्य च निर्जीर्यन्ते । न चैवमात्मप्रदेशानुस्यूतानां सर्वेषामपि कर्मणां निर्जरणेऽन्तरेणैव प्रयासमात्मा मुक्तः स्यादिति शङ्कयाङ्कनीयं चेतः, यतो ह्यनुक्षणं कर्मपुद्गलान्युपाददानस्यात्मनोऽन्यैरन्यैश्च कर्मभिरभिहितश्चतुर्विधो बन्धः सातत्येनानुवर्तत एवेति । यदा त्वात्मनि मिथ्यादर्शनादयो बन्धहेतवोऽपनीयन्ते, तदा गृहीतकर्मनिर्जरणे भवत्येव मुक्त आत्मेत्युपपादयिष्यत उपरिष्टात् । ननु च बन्धो नामायमनुभूतचरो मूर्त्तपदार्थेषु, अमूर्त्तस्य त्वात्मनः कथं सोऽयं शक्यः प्रसञ्जयितुमिति चेन्नैतदेवम् । न हि वयमेकान्तेनामूर्त्ततामात्मनि व्यवस्थापयामः, अपि तु स्वस्वरूपापेक्षयायमात्मा स्यादमूर्त्तः, कर्मबन्धपर्यायापेक्षया तु स्यान्मूर्त्तोऽपि । तस्मात्पूर्वैः कर्मपुद्गलैर्बद्धत्वान्मूर्त्तस्यास्याभिनवकर्मग्रहणं न कथमपि विरुद्धचते । अथापि स्वभावादमूर्त्तस्यादिमः कर्मबन्धः कथमिति चेन्नैतदाशङ्कनीयम् । तुषतण्डुलयोरिव

कर्मात्मनोर्बन्धाख्यसंयोगस्यानादित्वाभ्युपगमात् । अनादेर्बन्धस्य निवृत्त्यभावे मुक्तिरसिद्धा स्यादित्यपि तुषतण्डुलदृष्टान्तेनैवोत्तरितं द्रष्टव्यम् ।

तदेवमनवरतं कर्मभिरनुबद्धस्यास्य जीवस्य कर्तृत्वभोक्तृत्वादिकं सर्वं लोकदृष्टं यथायथं व्यवस्थितम्, न तु स्वस्वभावादिति व्याख्यातमेतत् । तेषां चैषां कर्मणां क्षयादुपशमादुदयाच्च विविधा अस्यात्मनो भावाः (परिणामाः) प्रसज्जन्ते । औपशमिकाः, क्षायिकाः, क्षायौपशमिकाः, पारिणामिकाश्चेति । कतकरजःसम्बन्धादप्सु वर्त्तमानस्यापि पङ्कस्येवात्मनि वर्त्तमानानामपि घातिकर्मणां (ज्ञानावरणादीनां) कारणवशादनुद्भूतावस्थत्वमुपशमः । आत्यन्तिकी निवृत्तिस्तु क्षय इत्यनयोर्भेदः । क्षीणाक्षीणवृत्तिस्तु कर्मणां क्षयोपशमः । एवं द्रव्यादिनिमित्तवशादुद्भूव उदयः । तत्र सम्यग्दर्शनचारित्राभिधेयावात्मनः परिणामावौपशमिकौ, मोहनीयकर्मोपशमनिमित्तत्वात् । आद्यो हि दर्शनमोहनीयस्य चारित्रमोहनीयभेदानामनन्तानुबन्धिनां कषायाणां चोपशमे प्रादुर्भवति, उत्तरस्तु कृत्स्नस्यापि मोहनीयस्योपशमे । उपशमे हि तस्य कर्मणः को हेतुरिति चेत्काललब्ध्यादिरेवेति गृहाण ।

"तत्र काललब्धिस्तावत् कर्माविष्ट आत्मा भव्यः कालेऽर्द्धपुद्गलपरिवर्त्तनाख्येऽवशिष्टे प्रथमसम्यक्त्वग्रहणस्य योग्यो भवति, नाधिके इति, इयमेका काललब्धिः । अपरा कर्मस्थितिकाललब्धिः उत्कृष्टस्थितिकेषु कर्मसु जघन्यस्थितिकेषु च प्रथमसम्यक्त्वलाभो न भवति, क्व तर्हि भवति, अन्तःकोटीकोटीसागरोपमस्थितिकेषु कर्मसु बन्धमापद्यमानेषु विशुद्धपरिणामवशात्सत्कर्मसु च ततः संख्येयसागरोपमसहस्रोनायामन्तः कोटीकोटीसागरोपमस्थितौ स्थापितेषु प्रथमसम्यक्त्वयोग्यो भवति ।" "अपरा काललब्धिर्भवापेक्षया, भव्यः, पञ्चेन्द्रियः सञ्ज्ञी पर्याप्तकः सर्वविशुद्धः प्रथमसम्यक्त्वमुत्पादयति । आदिशब्देन जातिस्मरणादिः परिगृह्यते ।"

एवं सर्वघातिस्पर्द्धकानामुदयक्षये सदुपशमे देशघातिस्पर्द्धकानां चोदयेऽष्टादशमिश्राः क्षायौपशमिका भावा भवन्ति । ते च मतिश्रुतावधिमनःपर्ययाख्यज्ञानचतुष्टयम्, मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानमित्यज्ञानत्रितयम्, चक्षुरचक्षुरवधिभेदात् त्रीणि दर्शनानि, दानलाभभोगोपभोगवीर्याणां पञ्चानां लब्धयः पञ्च, पूर्वोक्ते सम्यक्त्व-चारित्रे, विरताविरतपरिणामः संयमासंयमाख्यश्चेति निर्दिष्टाः । एते हि स्वस्वप्रतिबन्धककर्मविशेषाणां सशेषक्षयोपशमयोराविर्भवन्ति ।

अथ चतुर्णामपि घातिकर्मणां निःशेषक्षये तावदर्हत्पदवाच्यानां तीर्थंकरादीनां नव क्षायिका भावाः, ते च सर्वपदार्थविषयमिन्द्रियादिबाह्यहेत्वनपेक्षमात्मनः स्वाभाविकं केवलं ज्ञानम् ।

केवलं दर्शनम् ।

अनन्तप्राणिगणानुग्राहकमभयदानम् ।

परित्यक्तकवलाहारक्रियाणामपि तेषां केवलिनां शरीरबलाधानहेतुसूक्ष्मपुद्गलसम्बन्धप्रयोजको लाभः ।

कुसुमवृष्ट्यादिविशेषप्रादुर्भावकोऽनन्तो भोगः ।

सिंहासनचामरच्छत्रत्रयादिलम्भकोऽनन्तो भोगः ।

अनन्तं वीर्यम् ।

सम्यक्त्वचारित्रं चेति । एते च नवाप्यात्मनः स्वाभाविका एव भावा घातिकर्मभिः प्रतिबद्धास्तेषामत्यन्तक्षये आविर्भवन्ति नत्वपूर्वाः । इदन्तु बोध्यम्, एषां क्षायिकानामप्यनन्तवीर्याव्याबाधसुखरूपेणैव वृत्तिरनुसंधेया । अनन्तस्य वीर्यस्य चापि केवलज्ञानरूपेणैवेति । तस्माद् घातिकर्माणि चत्वारि यत्र क्षयं गतानि-अघातिकर्माणि तु शुभानि यथायथं वर्त्तन्त एव, तेषु तीर्थंकरेष्वेव नवानामेषां क्षायिकभावानां वृत्तिरवसातव्या । तत एव च सर्वज्ञा एते प्राणिगणानुग्रहाय यदुप-

दिशन्ति तदिदं जैनं दर्शनं सर्वैरपि शिवेप्सुभिः समादरणीयम् । न च तीर्थंकराणां सर्वज्ञत्वे संशेतव्यम्–दृष्टेष्टाविरुद्धवाक्त्वेनानुमितात् रागादिदोषराहित्यादेव तदनुमानोपपत्तेः । तथा हि अर्हन् सर्वज्ञः–रागादिदोषरहितत्वात् यो हि न सर्वज्ञः, नासौ रागादिदोषरहितः, यथा रथ्यापुरुषः–रागादिदोषरहितस्तु भगवानर्हन्, तस्मात्तथेति । रागादिदोषराहित्यमपि–अर्हन् रागादिदोषरहितः, दृष्टेष्टाविरुद्धवाक्प्रयोक्तृत्वात् । यो नैवं स नैवम्, यथा कणादादिरित्यनुमानेन सुविज्ञेयम् । अन्येषां दृष्टविरोधस्तु प्रपञ्चित एव तत्र तत्र । यत्तु केचन पुरुषसामान्य एव सर्वज्ञतां न क्षमन्ते तान् प्रतीत्थमनुमिनुमः–आस्ते कश्चिदात्मा, सकलपदार्थसाक्षात्कारी, तद्ग्रहणस्वभाववत्वे सति प्रक्षीणप्रतिबन्धकत्वात् । यः पदार्थो यद्ग्रहणस्वभावः प्रक्षीणप्रतिबन्धकश्च, सोऽवश्यं तद्ग्राहकः, यथा प्रक्षीणतिमिरं चक्षुः रूपग्राहकमिति । अस्ति चात्मनः सकलपदार्थविबोधस्वभावः सर्वेषामैकमत्यात् । सर्वैरप्युपगतः शाब्दानुमानादिना सकलपदार्थविबोधे यदि ह्यात्मनः स्वभाव एव सकलपदार्थ बोधे न प्रभवेत् शब्दादिनापि कथं तादृशं ज्ञानं जायेत । नन्वास्तां स आत्मनः–स्वभावः प्रतिबन्ध कानां तु निःशेषमुपक्षयो दुरुपपादः, क्वाप्यदृष्टत्वादिति चेन्मैवं वोचः । दोषावरणे क्वचिन्निर्मूलं विनश्यतः–हीयमानत्वात्, यद्धि हीयमानम्–अवश्यं तत्कदाचन निर्मूल्यते यथा वह्निपुटपाकपरिशोध्यमास्य सुवर्णस्य , मलमित्यनुमानेनावरणादीनामत्यन्तविनाशस्य सुसाधत्वात् । तर्कानुमोदितश्चायमर्थः–वृद्धिक्षययोगिनः पदार्थस्यानित्यतायाः सर्वैरपि तैर्थिकैरूरीकरणात्, तादृशानां समूलं विनाशस्य युक्तत्वात् । हीयमानता तु ज्ञानावरणादीनामुत्तरोत्तरं धीविकासदर्शनादनुभवसिद्धैव, । यावदात्मनो ज्ञानशक्तेरावरणमपनीयते–तावत्येव सा शक्तिः समुज्जृम्भते इति दृश्यते लोकेऽपि । यदा तु तस्यावरणस्य कार्त्स्न्येनापनयस्तदा सकलपदार्थप्रत्यक्ष-

मात्मनः केन वार्यताम् । सकलपदार्थप्रत्यक्षकार्येव च सर्वज्ञ उच्यते–इति न सर्वज्ञे शङ्कालेशातङ्कः । तथैवेदमपरमप्यनुमानम्–सूक्ष्मान्तरितदूरार्थाः कस्यचित्प्रत्यक्षाः, अनुमेयत्वात्–अग्न्यादिवत् । यथा ह्यग्न्यादयः पदार्थाः कैश्चिदनुमीयन्ते–त एव च कैश्चित्प्रत्यक्षस्यापि गोचरीक्रियन्ते, तथैव खल्वेते परमाण्वादयो धर्मादयश्च सूक्ष्माः, देशविप्रकृष्टाः सुमेर्वादयः स्वर्गादयश्च, कालविप्रकृष्टाश्च भूतभविष्यन्तोऽन्तरिताः सर्वैरपि परीक्षकैरनुमीयन्त इति केनचित्प्रत्यक्षस्यापि गोचरी क्रियेरन् । येन तु प्रत्यक्षविषयतां नीयन्ते सोऽयमेव सर्वज्ञ इति विवेच्यतां सुधीवरैः । न च देवदत्तादिषु गृहीतव्याप्तिकेन पुरुषत्ववक्तृत्वादिहेतुकानुमानेन भगवत्यर्हत्यसर्वज्ञता शङ्कनीया, पुरुषत्वस्य सार्वज्ञेन विरोधबीजानुपलब्धेरस्यानुमानस्याप्रयोजनकत्वात्, वक्तृत्वस्य च ज्ञानविकासानुविधायितायाः प्रत्यक्षमुपलम्भेन प्रत्युत विरुद्धत्वात् । न चेदं सर्वमपि सिद्धसाधनम्–जगत्कर्त्तरीश्वरे सर्वज्ञतायाः परैप्यभ्युपगमादिति वाच्यम् । जगत्कर्तुरीश्वरस्य प्रतिषेत्स्यमानत्वात् । तस्मात्प्रक्षीणाखिलघातिकर्मणां तीर्थंकरादीनां पूर्वोक्ताः क्षायिका भावाः सम्यगुपपद्यन्त एवेत्यलमतिमात्रं प्रसक्तानुप्रसक्त्या । अथ संसारिणामुक्तकर्मोदयप्रसञ्जिता औदयिका एकविंशतिर्भावाः, ते च नारकादिभेदेन चतुर्विधा, गतिः, क्रोधादयश्चत्वारः कषायाः, स्त्रीपुन्नपुंसकानि त्रीणि लिङ्गानि, मिथ्यादर्शनम्, अज्ञानम्, (ज्ञानाभावो ज्ञानावरणोदयप्रयोज्यः) असंयतत्वम्, (संयमाभावः) असिद्धत्वम्, (संसारित्वम्) कृष्ण-नील-कापोत,तेजः-पद्म-शुक्ल-भेदेन षड्भेदा लेश्याश्चेति । तत्र लेश्या नाम कषायानुरञ्जितस्यात्मनः परिणामविशेषः, स चायं परिणामो वस्तुतः सर्व एवाशुभः सुरेश्वरैश्वर्येऽप्यात्मनः स्वस्वभावापेक्षया (मुक्तापेक्षया) दुःखस्यैव सद्भावात् । अथापि तु व्यवहारानुरोधेन सुखदुःखतारतम्यमाश्रित्य शुभाशुभत्वेन द्वैविध्यम् । तत्राप्युत्कृष्टमध्यमावरभावेन प्रत्येकं त्रैविध्यं चेति षड्विधत्वं नीयते । स च

षड्विधोऽप्येभिः षड्भिर्वर्णविशेषैरुपचर्य लेश्याशब्देनाख्यातः-उत्कृष्टाशुभः कृष्णवर्णेन, मध्यमाशुभो नीलेन, अवराशुभः कापोतेन । एवमवरशुभस्तेजसा, मध्यमशुभः पद्मसदृशेन, उत्कृष्टशुभस्तु शुक्लेनेति । इतरत्तु सर्वं प्रकृतिबन्धे प्रततमेवेति नेह पुनरुच्यते । कर्मक्षयोदयादिनिरपेक्षास्त्वात्मनो भावाः पारिणामिकास्त्रय एव जीवत्वम्, भव्यत्वम्, अभव्यत्वं चेति । तत्र जीवत्वं चैतन्यम्–भव्यत्वं च सम्यग्दर्शनाद्यवाप्तियोग्यत्वम् तद्विपरीतं चाभव्यत्वमिति । त एव आत्मनोऽसाधारणा भावाः (परिणामाः) । साधारणास्तु पूर्वमुक्ता एव (अस्तित्वादयः) अपरस्त्वत्र दर्शने जीवसम्बन्धेन बहूक्तः स्वर्गनरकादिगतिप्रपञ्चः संसरणसम्बन्धेन कालादिविस्तरः कर्मभेदविस्तरश्चेत्यादिः । तदित्थं सङ्ग्रहविधयोपदर्शितमात्मस्वरूपम्, तदीयं गुणचतुष्टयमवस्थाविशेषाश्च (निद्रादयः) प्रसङ्गतः प्रतिपादिता एव । अथ तावदाकारोऽस्य विचिन्त्यते ।

—: ० :—

आकारः

तत्र यद्यपि स्वभावतोऽयमात्मा तावदसंख्येयप्रदेशो लोकाकाशपरिमाणः, अथापि तु यादृशमस्य शरीरं शरीरनामकर्मणा समुपस्थाप्यते तावत्परिमाण एवायं संहरणविसर्पणशीलतया संपद्यते—इति देहानुविधायि प्रमाणमस्य द्रष्टव्यम् । तच्च क्वचिदतिसूक्ष्ममेकप्रदेशम् परमाणुसमम् । क्वचित्तु बृहत्तरमिति लोकसिद्धोऽयमर्थः । न च गजादिशरीरमभिव्याप्यावस्थितस्यात्मनः पिपीलिकाशरीरादिषु समावेशोऽसम्भवीति शङ्कनीयम् । उक्तेनात्मनः संहरणविसर्पणस्वभावेनोपपत्तेः । यथाहि विशालगृहमध्योदरस्थितप्रदीपप्रकाशस्य सकलं गृहमभिव्याप्नुवतः सूक्ष्मशरावेणावृत्ते प्रदीपे तावन्मात्रता, अपनीते त्वावरणे पुनर्गृहव्याप्तिस्तद्वत्, यथा वा स्वाङ्गान्युपसंहृतवतो वितन्वानस्य च कूर्मस्य परिमाणे बहुतरो भेदस्तद्वत्, यथा वा प्रचयोपनिबन्धनाभ्यां तूलस्य महान् देशावगाहभेदस्तद्वदित्याद्यूह्यम् । इदन्तु संहरणं विसर्पणं वा न स्वभावेन, अपि तु कर्मोपस्थापितशरीरानुविधायितयैवेति कर्मकृतमेवैतत् । अथैवं सति कौटस्थ्याभावापत्त्या प्रदीपादिवदेवानित्यतापत्तिरात्मन इति चेत्तदतिनिःसारम् । कूटस्थनित्यताया एवास्माभिरनभ्युपगमात् । यदि ह्यात्मा कूटस्थनित्यः स्यात्तर्हि सर्वथा सोऽविक्रियः स्यादिति देवनारकमनुष्यतिर्यगादिभेदाः सर्वथास्य नोपपद्येरन् । न च बन्धमोक्षव्यवस्थापि सुव्यवस्थामाप्नुयात्—धर्माधर्मादयश्चैकान्ततो वैयर्थ्यमृच्छेयुः । तस्मान्नायमात्मा सर्वथा नित्यः, अपि तु कथंचिन्नित्यः कथंचिदनित्यश्चेत्यवोचाम । देवनारकादिविविधपर्यायापेक्षया तावदनित्यत्वादिभिन्नाकारता सम्यगुपपन्ना, आत्मत्वेन नित्यत्वात्तु कृतप्रणाशाकृताभ्यागमादेः प्रसङ्गो निरस्तः । प्रदीपाद्यपि च नैकान्ततोऽनित्यमेवेति तद्दृष्टान्तोऽपि विकलः, तस्यापि द्रव्यत्वादिना नित्यत्वात् । तस्माद्देहाका-

रात्मवादे न किञ्चिद् बाधकम् । अनुभवसिद्धं च देहाकारत्वमात्मनः, चैतन्यमेव ह्यात्मगुणः स च सर्वस्मिन् देह एवोपलभ्यते, न देहैकदेशे नापि च देहाद्बहिः । ततश्च व्यापकात्मवादिनामप्रमाणा बहिःस्थितिकल्पनैव दोषः, गत्यागती च नोपपद्येयाताम् । परमाण्वात्मवादिनान्तु कान्ताश्लेषादौ सर्वाङ्गीण आनन्दानुभवो नोपपद्येत । तस्मात्सुव्यवस्थितो देहपरिमाण आत्मा । सप्तभिस्तु कारणैरात्मनः प्रदेशा देहाद् बहिरपि भवन्ति । तानीमानि कारणानि सप्त समुद्घाताः—इत्याख्यायन्ते । ते च वेदनासमुद्घातः ।

कषायसमुद्घातः

विक्रियासमुद्घातः

मरणान्तिकसमुद्घातः

तैजससमुद्घातः

आहाटकसमुद्घातः

केवलिसमुद्घातश्चेतिप्रपञ्चिता आकरग्रन्थेषु । तदेवमाख्यात आत्मनामाकारः । त एत आत्मानो द्विविधाः संसारिणो मुक्ताश्च । तत्रमुक्ताः सिद्धपद वाच्याः संसारिणस्तु द्विभेदाः—त्रसाः स्थावराश्च । द्वीन्द्रियादिपञ्चेन्द्रियान्ताश्चतुर्विधास्त्रसाः—तत्र द्वीन्द्रियाणां स्पर्शनरसने इन्द्रिये, त्रीन्द्रियाणां घ्राणाधिके ते, चतुरिन्द्रियाणां चक्षुरधिकानि तानि, पञ्चेन्द्रियाणान्तु श्रोत्राधिकानीति । कृमिपिपीलिकाभ्रमरमनुष्यादय उदाहरणानि । पञ्चेन्द्रियास्तु पुनर्द्विविधाः—अमनस्काः, समनस्काश्च । हिताहितप्राप्तिपरिहारपरीक्षासमर्थाः, समनस्काः, तद्विरहिताश्चामनस्काः । एत एव क्रमेण सञ्ज्ञिनोऽसञ्ज्ञिनश्चाख्यायन्ते । तदेवं पञ्चविधास्त्रसाः । त्रसत्वं त्वेषां न चलननिमित्तकमेव, गतिरहितानामयोगकेवलिनां त्रसत्वानापत्तेः, अपितु त्रसनामकर्मोदयविशिष्टत्वमेव त्रसत्वम् । तच्चागम-

संवेद्यमेवेति । अथ स्थावराः स्पर्शनैकेन्द्रियाः–ते च पृथिव्यप्तेजोवायुवनस्पतयः, पृथिव्यादीनां ह्येषां चतुर्विधत्वं तावदागमोक्तम्–पृथिवी, पृथिवीकायः, पृथिवीकायिकः, पृथिवीजीवश्चेति । तत्र काठिन्यगुणात्मिका प्रथनप्रवृत्तिनिमित्ता पृथिवी सामान्यम्, मृतमनुष्यादिकायवज्जीवपरित्यक्तः पृथिवीकायः, पृथिवी कायत्वेन दधानः पृथिवीनामकर्मोदयवशीकृतः पृथिवीकायिको जीवः, यस्तु पृथिवीं कायत्वेन ग्रहीष्यति स कार्मणकाययोगस्थः पृथिवीजीवः । इत्थमबादिष्वपि योज्यम् । वनस्पतयस्तु प्रसिद्धा एवेति । त एत एकेन्द्रिया अपि द्विविधाः सूक्ष्मा बादराश्च । येषां हि शरीरमप्रतिघाति त इमे सूक्ष्माः । सूक्ष्मशरीरवैशिष्ट्यादेव सशरीराणामनन्तात्मनां लोकेऽवस्थानं न विरुध्यत इत्यनुसंधेयम् । प्रतिघातिशरीरास्तु बादरा इति । एषामेकेन्द्रियाणां चत्वारः प्राणा–कायबलप्राणः, उच्छ्वासनिश्वासप्राणः, आयु प्राणः, स्पर्शनेन्द्रियप्राणश्चेति । तथा च द्वीन्द्रियादीनामेकैकप्राणवृद्धिरनुसन्धेया । पञ्चेन्द्रियाणां समनस्कानां हि दश प्राणा इति । इमे च सप्तापि संसारिणः पुनर्द्विविधा –सपर्याप्ता अपर्याप्ताश्च । पर्याप्तयस्तु प्रकृतिबन्धे प्रतिपादिता एवेति । त इमे चतुर्दश समासतः संसारिजीवभेदाः ।

इदमिह संप्रधार्यम्-य इमे सर्वकर्मबन्धविनिर्मुक्ताः सिद्धपदवेदनीयास्त एवात्र दर्शने परमात्मपदेनेश्वरशब्देन च शब्द्यन्ते, न तु नित्ययुक्तः सर्वजगत्कर्ता परमात्मा नाम कश्चिदतिरिक्तः । तत्सत्वे प्रमाणनुपलब्धेः । न च शब्दप्रमाणरूपाद्वेदात्तत्संसिद्धिरिति शङ्क्यम्, हिंसादिप्रतिपादके वेदे प्रामाण्यस्यैव दूरापेतत्वात् । ननु च भो आस्तां वेदः, अनुमानमपि तु जागर्त्येवेश्वरं प्रमापयितुम् तद्यथा–क्षित्यङ्कुरादिकं बुद्धिमत्कर्तृजन्यम्–कार्यत्वाद्–घटवदित्यनुमानेन तावत् क्षित्यादीनां कर्तृजन्यत्वसिद्धौ य एषां कर्ता स एव सर्वज्ञः सर्वशक्तिरस्माकमीश्वरपदवाच्य इति सिद्ध एवानुमानेनेश्वरः । न च क्षित्यादिषु कार्यत्वमेवासिद्धम् । सावयवत्वेन कार्यत्वानुमानादिति

चेत्तदेतन्न मनोरमं विदुषाम् । तथाहि-किमिदं सावयवत्वं नाम येन कार्यत्वं क्षित्यादिषु साध्यते, यद्यवयवसम्बन्धः (संयोगः) सावयवत्वं तर्हि गगनादावपि तदिति तेषामपि कार्यत्वं स्यात्, सर्वमूर्तिमद्द्रव्यसंयोगितायाः परैरपि गगनादिष्वभ्युपगमात्तस्याश्चावयवसम्बन्धमन्तरासंभाव्यत्वात् । यत्तु कल्पितैरेव प्रदेशैः सर्वद्रव्यसम्बन्धमुररीकुर्वते–तदसत्, कल्पितस्य वस्तुत्वाभावेन गगनादीनां व्यापकताया अप्यवस्तुत्वापत्तेः, कर्णविवरसंयोगिन आकाशस्यैव श्रोत्रतया तस्याप्यवस्तुत्वापत्तेश्च । तस्मान्नावयवसम्बन्धमात्रेण कार्यत्वं शक्यते साधयितुम् । नाप्यवयवसमवायितयाऽपि, सामान्यादौ व्यभिचारात् । अनुगतबुद्धिप्रयोजके हि समष्टयात्मकं सामान्यमवयवेषु सर्वेषु विशेषेषु समवेत्येवेति । अथ यद्यवयवजन्यत्वं सावयवत्वं तर्हि साध्यसमो हेतुः, क्षित्यादिषु जन्यतामेवानभ्युपगच्छन्तं परं प्रति तस्यापि साधनीयत्वात् । अथ यदि सावयवबुद्धिविषयत्वमेव सावयवत्वं तर्त्हि आत्मादावपि जन्यत्वापत्तिः, न चात्मादीनामप्रदेशत्वमेवेति सांप्रतम्, निराकृतत्वात् । तथात्वे परमाणुवद् व्यापित्वविरोधाच्च । तस्मात्कार्यत्वमेव तावत् क्षित्यादिषु दुर्वचमिति कथं तत्कर्तृत्वेन परमात्मा सिद्धिमियर्तु । येषु तु घटपटमठादिषु कार्यत्वमुपलब्धं तेषां कर्तृत्वमपि जीवेष्ववोपलब्धमेवेति न तदर्थं परमात्मापेक्षणीयः ।

किं चान्यत् किमिदं क्षित्यादिषु कार्यत्वं नाम, यद् हेतूकृत्य कारणतया परमात्मानुमीयेत ? 'अभूत्वा भावित्वम् इति यदुच्यते, न तद्विचारसहम् । अभवन–भवन–क्रिययोरेकस्य कर्तुरसंभवात् । यो ह्यभावाश्रयः, कथमसौ भावाश्रयः स्यात् ? समानकर्तृत्वाभावे च कथं क्त्वाप्रत्ययः उपपद्येत ? अथ कालभेदेन भवेदुभयोरेक एवाश्रय इति तदपि न, अभावाश्रयत्वकाले तस्य कर्तुरवस्तुत्वेन भावाश्रयत्वकाले च वस्तुत्वेनैकत्वासंभवात्, अथाभ्युपगम्येतापि कर्यत्वमभूत्वा

भावित्वम्, तथापि क्षित्यादिषु साध्यसमो हेतुः, तेषामभूत्वा भावित्वस्यास्मादृशैर-नभ्युपगम्यमानत्वात् । नहि क्षित्यादयः कदाप्यभूत्वा पुनर्भवन्ति, अपि तु सनातना एवैत इति । सावयवत्वेन कार्यत्वसाधनं तु प्रागेव प्रत्युक्तम् । ननु सन्निवेशविशे-षाद्वयमभूत्वा भावित्वं क्षित्यादिष्वनुमास्यामह इति चेत्सोऽयं संनिवेशविशेषो भवद्बुद्ध्युपारूढ़ एव परिग्राह्य इति केन राज्ञाज्ञप्तम्? न हि वयमेतादृश सन्निवेशं कार्यत्वप्रयोजकमनुजानीमः । अवयवसम्बन्धरूपः सन्निवेशस्तु गगनादिषु व्यभिचरित इति प्रागेव प्रत्यपीपदाम ।

एतेनैव प्रकारेण प्रागभावप्रतियोगित्वं कार्यत्वमित्यपि प्रतिवक्तव्यम् । असतः प्रतियोगिताश्रयत्वासंभवात् । क्षित्यादिषु साध्यसमत्वाच्च । न हि क्षित्यादीनां प्रागभावोऽस्माभिर्गृहीतपूर्व इति । यत्तु अक्रियादर्शिनोऽपि कृतबुद्ध्युत्पादकत्वं कार्यत्वम् तत्रेदं प्रक्ष्यामः, किं सर्वेषां कृतबुद्ध्युत्पादकत्वं, उत कस्यापि गृहीत-संकेतस्य ? आद्ये क्षित्यादिष्वसिद्ध एव हेतुः, अस्मादृशां तत्र कृतकत्वबुद्धेरनुदयात् । क्षित्यादिकं बुद्धिमद्धेतुकं न भवति, अस्मदाद्यनवग्राह्यपरिमाणाश्रयत्वात् गगनादिवदिति' अनुमानस्याप्यस्मदादिबुद्ध्यनुकूलस्य जागरूकत्वात् । अन्ते तु गगनादावनेकान्तः, तत्रापि खननादिना कृतमिति कस्यापि बुद्ध्युदयसंभवात् । अप्रामाणिकी सा बुद्धिरिति चेद्भवदीयापि कथं न तथाविधेति क आश्वासयिता ? कारणव्यापारानुविधायित्वं कार्यत्वमप्येवमेव निराकर्तव्यम् । सिद्धे हि कारणे तद्व्यापारानुविधायित्वं सिद्ध्येत्, तस्मिंस्तु सिद्धे कारणं सिद्ध्येदित्यन्योन्याश्र-योऽप्यत्र शिरसि विशेषतः पतति ।

उत्पत्याश्रयत्वमपि च क्षित्यादिषूत्पत्तेरग्रहणात्साध्यसममेव । अथ कैश्चित्स्व-कारणसमवायः सत्तासमवायो वा कार्यत्वमिष्यते, त इत्थं प्रतिवक्तव्याः,

योगिनामशेषकर्मक्षयादावभावरूपे कार्ये तावदव्याप्तमिदं कार्यत्वम्, अभाव कारणसमवेतत्वस्य सत्तासमवाययोश्च त्वयैवानभ्युपगमात् । मास्तु तत्र कार्यत्व-मिति चेत्तर्हि न स्यात्तदीश्वरजन्यमिति निःशेषकर्मक्षयात्मकस्य मोक्षस्य संपत्तये जगदीश्वराराधनं भवच्छास्त्रैरुपदिष्टमानर्थक्यमृच्छेत् । किं च उत्पन्नेषु घटादिषु सत्ता समवैति, उत्पद्यमानेषु वा । उत्पन्नेषु चेत्, सत्सु असत्सु वा ? सत्सु चेत्किं प्रागेव सतां सत्तासमवायेन प्रयोजनम्; प्राक् च तेषां सत्वं सत्तासमवायात्स्वतो वा । सत्तासमवायादिति चेत्सा सत्ता सत्सु असत्सु वा समवेतेत्यनवस्थापातः । स्वतः सतान्तु व्यर्थ एव सत्तासमवाय. । अथासत्सु घटादिषु सत्ता समवैति, तया च ते सन्त इतिचेदसत्सु शशविषाणादिष्वपि सत्ता कुतो न समवैति ? न ह्यसतां परस्परं कोऽपि विशेष इति । ननु न कदापि सत्तासमवायविनाकृता घटादयो येन सत्त्वासत्त्वे तत्र पर्यनुयुज्येयाताम् । उत्पद्यमानानामेव तु भवति सत्तासम्बन्ध इति चेत्सोऽयं सत्तासम्बन्ध उत्पत्तेर्भिन्नो वा स्यादभिन्नो वा ? भिन्नश्चेदुत्पत्तिस्तर्ह्य सतीति यावद् ब्रूयादभाव इति, तावद्ब्रूयादुत्पद्यत इति । सापि सत्तासम्बन्धात्स-तीति चेत्तत्रापि सत्तासमवाय उत्पत्ति रूप इति सा कथं भवेदुत्पत्तिरिति पर्यन्तेऽ-नवस्थापातः । अथ सत्तासमवाय एवोत्पत्तिरिति चेद्गगनपरमाण्वादयोऽप्युत्पन्ना इत्युच्येरन्, तत्रापि सत्ता समवायाभ्युपगमात् । एवमेव कारणसमवायोऽपि चिन्तनीयः, सन् घटः कारणे समवैत्यसन् वा । संश्चेत्कारणसमवायाद्विना कुतोऽस्य सत्ता । असँश्चेच्छशविषाणादयोऽपि कुतो न समवयन्ति । तस्मात्सत्तासमवाययोरेव तावदपरिचिन्तितरम्यत्वात्कुतस्ताभ्यां कार्यत्वनिर्वचनप्राप्त्याशा । तदित्थं कार्यत्व-मेवानिरुक्तिशरणमृच्छति कथमनुमीयतां तन्निरूपितकारणत्वेनेश्वर इति विद्वांस एवैतद्विवेचयन्तु ।

अथ क्षित्यादिष्वभ्युपगम्येतापि कार्यत्वम्, तथापि न तत्कारणत्वेनेश्वरः शक्यः प्रमातुम् । अन्वयव्यतिरेकगम्या हि लोके कार्यकारणभावाः, यत्सत्वे यत्सत्वम्, यदभावे च यदभावस्तत् कारणमिति । नचैवमीश्वरविषये शक्यं प्रपञ्चयितुम् ईश्वराभावे क्षित्याद्यभाव इति । नित्यस्य व्यापकस्य चेश्वरस्य सर्वदेशकालसम्बन्धवतोऽभावस्य दुर्वचत्वात् । अथेश्वरसत्त्वे क्षित्यादिमत्त्वमित्यन्वयमात्रेणैव तत्र कारणत्वमुररीक्रियते–तर्हि जीवेष्वेवोररीक्रियतां कारणत्वम्–तत्सत्वेऽपि क्षित्यादिमत्त्वोपपत्तेः । अथ जीवसत्त्वेऽपि क्वचन (प्रलयादौ) क्षित्यादिकार्यासत्वान्न तेषां कारणत्वमिति चेत्समानमेतदीश्वरेऽपि, तत्सत्त्वेऽपि प्रलयादौ कार्यादर्शनात् । अथ जीवानामसर्वज्ञतया सकलपृथिव्यादिपदार्थविज्ञानाभावेनाविजानतश्च कर्तृत्वासंभवेन न संभवति जीवेषु सर्वकर्तृत्वम्, ईश्वरे तु भगवति सर्वज्ञे संभवत्येव, तस्मादीश्वरस्यैव कर्तृत्वं न जीवानामिति चेन्नैतदेवम् । असर्वज्ञताया एव कर्तृत्वबाधकत्वे योगिनां सर्वज्ञत्वाभ्युपगमेन तत्र कर्तृताया निराबाधं संभवात् । तस्मान्नान्वयमात्रेण कर्तृत्वं शक्यं विज्ञातुम् । व्यतिरेकस्य च नास्तीश्वरे संभव इति न तत्र कर्तृत्वमुपपत्तिमियर्तीति । ननु च भो आस्तामीश्वरेणान्वयव्यतिरेकयोरभावः, ईश्वरेच्छया त्वन्वयव्यतिरेकौ सेत्स्यतः, ईश्वरेच्छानुविधायित्वात् कार्याणाम्, तदिच्छासत्वे कार्यसत्वम्, इच्छाभावे तु कार्याभावः, इति । न चानभ्युपगम्येश्वरमिच्छा शक्याभ्युपगन्तुमिति सिद्ध एवेश्वरः—इति तदप्यविचारसहम् । ईश्वरेच्छाया अपि परैर्नित्यत्वाभ्युपगमात्तस्या अपि व्यतिरेकासिद्धेः । यदि त्वात्मगुणानां ज्ञानेच्छादीनामव्याप्यवृत्तितया देशव्यतिरेकेण व्यतिरेको निरुच्येत, यत्रेश्वरेच्छा तत्रैव तत्तत्कार्यम् यत्र तु न सा तत्र न तदिति । तत्तर्हि यत्र यत्कार्यं न भवति तत्र कदापि तन्नैव प्रादुःष्यात्, तत्रेश्वरेच्छाया अभावात् । नत्वेवं दृश्यते क्वचित्कदाचिदसतां मेघविद्युदङ्कुरादीनां कालान्तरे

समुत्पाददर्शनात्, नित्यायाश्चेश्वरेच्छायाः कालान्तरेऽन्यदेशे समुत्पादासंभवात् । अथानित्यामेव वयमीश्वरेच्छामभ्युपगमिष्यामः, तथा च कालव्यतिरेको देशव्यतिरेकश्च तस्याः सुवच एव स्यात्, न च तस्याः कार्यत्वे तज्जननार्थमिच्छान्तरमङ्गीक्रियेत तदर्थं चान्यदित्यनवस्थापातः शङ्कनीयः, इच्छापरम्पराया अनादित्वाभ्युपगमादिति चेत्तदेतदपि कुशकाशावलम्बनम् । एवं सति युगपदनेकत्र कार्याणामनुद्भवापत्तिः, इच्छाया एकस्मिन् प्रदेशे समुत्पादात् । सर्वत्र समुत्पादे तु देशव्यतिरेक एव न सिद्ध्येत् इति सर्वत्रैकविधानि कार्याणि समुत्पद्येरन् । युगपदनेकसिसृक्षोत्पाद इष्टानेकविषयकैकसिसृक्षोत्पादादिश्च तर्कविरुद्ध इति कृतं बहुना प्रपञ्चेन । एवमिच्छाप्रयत्नादयः कर्मबन्धमन्तरा न क्वापि दृष्टाः, न च कर्मबन्धो भवद्भिरीश्वरेऽभ्युपगम्यते, तथा सति जीववदेव तस्य पारतन्त्र्येण कर्त्तृताया एवानापत्तेः । तस्मादिच्छापि भगवतीश्वरे नोपपत्तिमती । किं चान्यत् घटादिदृष्टान्तेन यदिदं सकर्तृकत्वं क्षित्यादिषु साध्यते तदिदं सशरीरकर्तृकत्वमेव सिध्येत् । घटादीनां सशरीरकर्तृकाणामेवोपलम्भात् । न चेश्वरस्य सशरीरत्वं शक्यते केनाप्यभ्युपगन्तुम् । यद्यभ्युपगम्येत, तर्हि तदिदमीश्वरशरीरं जन्यं वा स्यान्नित्यं वा । जन्यं चेत्केन तदुत्पादितम् ? ईश्वरेणैवेति चेत्सशरीरेणाशरीरेण वा ? पूर्वशरीरावशिष्टेनेति चेत्तत्केन तत्केन चेत्यनवस्थाप्रसङ्गः, अशरीरेण तु शरीरोत्पादने नास्त्यनुमानमित्युक्तमेव पुरस्तात् । अथेश्वरशरीरे संयोगविशिष्टत्वमपि नित्यमेवाभ्युपगम्येत तर्हि किमपराद्धं वराकैः क्षित्यादिभिः । एतेऽपि ननु नित्या एवाभ्युपगम्यन्तामितीश्वरकल्पनैव वैयर्थ्यमापद्येत ।

ननु च भोः सकर्त्तृकत्वमात्रमस्माकं क्षित्यादिषु साध्यम्—न तु शरीरविशिष्टकर्त्तृकत्वम् । तथा च नात्र शरीरस्य नित्यानित्यत्वादिविचार उचितः । घटादिदृष्टान्तानुरोधप्रदर्शनमपि विफलम् । यतो न हि दृष्टान्ते दृष्टाः सर्वेऽपि धर्माः

पक्षेऽप्यपेक्ष्यन्ते—तथा सति महानसीयेन तृणजन्येन वा वह्निना धूमसम्बन्धं गृहीतवानपि पुरुषो न धूमेन पर्वतीयमरणिजन्यं वा वह्निमनुमिनुयादिति चेद्विषमोऽयमुपन्यासः । प्रत्यक्षं हि सर्वविधेनापि वह्निना धूमसम्बन्धः शक्यो ग्रहीतुमिति युक्तं तत्र वह्निसामान्यानुमानम् । इह त्वशरीरेण सर्वज्ञेन वा कर्त्रा कस्यापि कार्यस्य सम्बन्धो नोपलब्ध इति कथं कार्यत्वमशरीरं कर्त्तारमनुमापयेत् । किं चान्यत्–घटादिषुसक्रियाणामेव कुलालादीनां कर्त्तृत्वं सर्वत्र दृष्टम्, अक्रियस्य कर्त्तृतायाः सर्वथानुपपत्तेः । कारकचक्रप्रयोक्तृत्वे हि कर्त्तृत्वं स्यात्, न चाक्रियः शक्नोति कारकचक्रं प्रयोजयितुमिति । तथा च कर्त्तृत्वेनानुमतस्येश्वरस्यापि सक्रियत्वमेव प्रसज्येत, सक्रियत्वे च भवद्भिरभ्युपगतं कौटस्थ्यं व्यापकत्वं च विरुद्धचेत । न च कूटस्थव्यापकस्य जीवात्मनः कर्तृत्वमिवेश्वरस्यापि कर्तृत्वं न विरुद्धचेतेति वाच्यम्, जीवात्मनोऽस्माभिः सक्रियस्यैवाभ्युपगमात्, कौटस्थ्यस्य निराकृतत्वात् । नहि कूटस्थस्य कर्तृत्वमुपपत्तिमदिति न कथमपीश्वरानुमानमुपपत्तियुक्तम् । न चाप्तकामस्येश्वरस्य जगत्सृष्टौ प्रयोजनमपि शक्यते किञ्चिद्व्यवस्थापयितुम् । न च भवतां प्रक्षीणकर्मणस्तीर्थंकरस्य कारुण्यादुपदेश इवेश्वरस्यापि कारुण्यादेवास्तु सर्गे प्रवृत्तिरिति वाच्यम् । तथा सति दुःखिनां प्राणिनामनुत्पादापत्तेः । कारुण्याद् दुःखिनां सर्ग इति विनायकं प्रकुर्वाणस्य वानररचना । अथ दुःखं प्राणिनां कर्मभिरेव न त्वीश्वरकृतमितिचेदायातोऽसि मार्गे । दुःखमिव सुखमपि कर्मभिरेवास्तु किमीश्वरेणात्र कल्पितेनेत्याद्यलमतिप्रपञ्चेन ।

न च तीर्थंकरसाम्यमत्रार्हमभिधातुम्, तेषां तीर्थंकरनामकर्मोदयवशीकृतानामेकान्ततः कर्मबन्धविनिर्मुक्तेरभावादिति दिक् ।

ननु च भो बुद्धिमन्तं कर्तारमन्तरेण कुत्र वा कार्याणि ते दृष्टचराणि, येन कार्यत्वमभ्युपगम्यापि क्षित्यादिषु तत्कर्तारं प्रतिषेधसीति चेत्, किं न पश्यसि विद्युदादीन् ? तेऽपि पक्षान्तःपतिता इति चेत्प्रागेवास्माभिः परीक्षिता तेऽनुमानप्रक्रिया, यया गर्वमावहसि । प्रस्वपतोऽपि च पुंसः परिदृश्यन्ते निश्वासप्रश्वासादीनि कार्याण्यबुद्धिपूर्वकाण्येव जाग्रद्दशायामपि च यानि भवन्ति, मल–धातुनिर्माणादीन्यन्तःशरीरे कार्याणि न तानि बुद्धिपूर्वकाणीति शक्यन्ते व्यपदेष्टुम्–अहं करोमीत्यनुव्यवसायस्य केनापि तत्करणाभावात् । तस्माद्बुद्धिमद्व्यापारपूर्वकत्वमेव सर्वकार्याणामिति नास्ति कोऽपि नियमः । ततश्च न हि जगत्कर्ता कोऽपि जगदीश्वरः, अपि तु तीर्थंकरा एव भवन्तीश्वरपदवाच्याः । तेऽपि न हि कर्तृत्वादीश्वराः, अपि तु प्रक्षीणाशेषकर्मबन्धनत्वात् । तदुपासना च तादृशगुणोपलब्धिकामुकानां भवति फलवती । तदिदमात्मसम्बन्धे प्रदर्शितमार्हतं दर्शनम् ।

—: ० :—

वैशेषिकदर्शनम्

अथ वैशेषिकदर्शनमनुसृत्यात्मतत्त्वं निरूप्यते । लोकस्यासन्दिग्धाविपर्यस्ताहं-प्रत्ययगोचर आत्मा यद्यपि प्रसिद्धः, तथापि शरीरेन्द्रियेषु भ्रमो जोयतेऽस्य, तमपनेतुमात्मा शरीराद्यतिरिक्तो युक्त्याप्यत्र साध्यते ।

तत्र तावदित्थमात्मानुमातव्यः श्रोत्रादीन्द्रियाणि शब्दादिविषयोपलब्धौ कर्तृपरतन्त्रणि, करणत्वात्–छेदनक्रियादिकरणादिवत् । यथाहि छिदिक्रिया-करणानि वास्यादीनि देवदत्तादिकर्तृप्रेरितान्येव कार्यसाधनानि दृष्टानि, तथा श्रोत्रादीन्द्रियाण्यप्येतानि शब्दादिविज्ञाने करणभावमुपगतानि प्रेरकं कर्तारमपेक्षन्ते । यस्तु कर्ता स एवास्माकमात्मपदवेदनीयः । परस्य शरीरे तु प्रवृत्तिनिवृत्ति-भ्यामयमात्मानुमातव्यः । साधिष्ठातृकमिदं शरीरं, हिताहितयोः प्रवृत्तिनिवृत्ति-मत्वात्, सारथिसमधिष्ठितरथवत् । रथस्तावदिष्टदेशमाप्नुवन्ननिष्टं परिहरंश्चा-वश्यं प्रेरकेण बुद्धिमता सारथिना समधिष्ठित एव भवति-अनधिष्ठितस्तु नैव गन्तुं शक्नुयात् । वाटवादिसंघर्षवशस्तु प्रचलन्नितस्ततः पतेन्नत्विष्टदेशमेवाप्नुयात् । तथैवशरीरमिदं हिताहितप्राप्तिपरिहारार्थं विचेष्टमानं बुद्धिमता केनचिदधि-ष्ठितम् । अनधिष्ठितन्तु रथवदेव जड़त्वान्नप्रेष्ठं स्थानमाप्नुयात्, बलेन कथंचित्प्र-वर्तमानमपि वा इतस्ततः प्रचलेत् । योऽयमधिष्ठातास्य स एवात्मा । देशनादि विकृतकर्मविशिष्टां भस्त्रामालोच्य यथानुमीयते कश्चित् प्रेरकः, तथैव प्राणापानादि विकृतकर्मदर्शनादपि तत्प्रयोक्ता चेतनः कश्चिदनुमीयते, एवं शरीरकर्मणापि तत्प्रेरकश्चेतन आत्मानुमातव्यः, पार्थिवेभ्यो घटादिभ्यो देहवैलक्षण्यं दृश्यते, घटादयो जड़ा यावन्त एव शिल्पिना निर्मितास्तावन्त एवावतिष्ठन्ते, नतु स्वरूपेण समेधन्ते, भग्नाः क्षता वा न पुनः प्ररोहन्ति । देहस्तु तद्विपर्ययेण यावानुत्पन्नस्तदपेक्षया

बहुलं समेधते, क्षतविक्षतश्च पुनरपि प्ररोहति, तदनेनाप्यस्य वृद्धिः । भग्न–क्षतसंरोहणादिकर्मणा गृहवृद्धयादिना गृहपतिरिव देहाधिपतिरात्मा कश्चिदसंशयमनुमीयते । नैरन्तर्येण प्रवर्तमानया च मनसः क्रियया शरक्रिया, तत्प्रेरकः शरासनधर इव मनः प्रेरकः कश्चिदात्मानुमितिमध्यास्ते । किं चाम्लादिपदार्थे दृग्गोचरं गत एव रसनविक्रियाप्युपलक्ष्यते सेयमेकमेव रूपरसाद्यनुभवितारमन्तरेण नैवोपपद्यते, यदि हि दर्शनेन चक्षुरेव जानीयात्–कुतस्तर्हि रसनमजानदेव विक्रियामासादयेत् । तस्माद्यथा कश्चित्पुरुषो गवाक्षद्वयेन कंचित्पदार्थं पश्येत् तथैव द्रष्टा कश्चिदनुमेयः । किंच ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नाः स्वीयानुभवसिद्धाः । एते च क्रियादिविशिष्टत्वात्समवायिकारणाद्यभावाच्च न द्रव्याणि–अपि तु गुणा एव । गुणाश्च नियमेन यत्किञ्चिद्द्रव्याश्रया भवन्तीति तदाश्रयत्वेनाप्यात्मानुमातव्यः । 'अहं सुखी' 'अहमिच्छामि' इत्याद्यनुभवाच्च सुखाद्याश्रयोऽयमात्माऽहंप्रत्ययगोचर आपामरं प्रसिद्ध इति दिगेषात्मानुमानस्य । ननु च भोः सर्वैरपि संप्रतिपन्नं प्रत्यक्षत्वेनाविसंवादि चेदं शरीरमेव सुखाद्याश्रयमहंप्रत्ययालम्बनं च भवतु, अस्यैव च चेतनत्वेन मनः प्राणादिप्रेरकत्वमनुमन्यताम्, इदमेव च स्वाश्रितैश्चक्षुः श्रोत्रादिभिरर्थान् प्रत्यभिजानातु, तस्मात् कृतमदृष्टचरेणात्मपदवाच्यपदार्थान्तरप्रकल्पनेनेतिचेन्मैवं मंस्थाः । यतः पृथिव्यादिभूतनिष्पन्नमिदं शरीरं न शक्यते चेतनत्वेन सुखाद्याश्रयत्वेन चाभ्युपगन्तुम् । तथात्वे भौतिकानां घटादीनामपि चैतन्यसुखादि-सिद्धि-प्रसङ्गात्, भौतिकत्वाविशेषात्, तत्र च तदनुपलब्धेः । तथा चानुमानम्–शरीरमचेतनं सुखाद्यनाश्रयं च, भौतिकत्वात् घटादिवदिति । शरीरगुणाश्च रूपादयो यावच्छरीरमवतिष्ठन्ते । नैवमिमे सुखादयो यावच्छरीरमुपलब्धाः, मृतशरीरेऽनुपलब्धेः । व्याप्यवृत्तयो हि रूपादयः शरीरे, अव्याप्यवृत्तयश्च सुखादय इति, बाह्येन्द्रिय-प्रत्यक्षास्तु शरीरमिव शरीरगुणा रूपादयः । अप्रत्यक्षास्तु

सुखादय इति नैते शरीरगुणा भवितुमर्हन्ति । न च मदशक्तिदृष्टान्तेन सर्वेऽप्येत
आक्षेपाः समुत्क्षेप्तुमर्हाः ।

रूपादीनां हि परार्थानां परसंवेद्यत्वम् ज्ञानसुखादयस्तु भवन्ति न परसंवेद्या
इति वैलक्षण्यस्य दुरुपपादत्वात् । किञ्च गुणानां यावद् द्रव्यभावित्वमेव युक्तम्
रूपादीनामिव । नहि रूपादयः कदापि पृथिव्यादीन् जहति, जहति तु शरीरं सुखा-
दय-इति नैते शरीरविशेषगुणाः शक्या अभ्युपगन्तुम् । तस्मात्सुखाद्याश्रयोऽयमात्मा
देहाद् व्यतिरिक्त एवाऽभ्युपगन्तव्यः । किंच देहचैतन्येऽभ्युपगम्यमाने देहावयवाः
प्रत्येकं चेतयन्ते, संघातो वा तेषामिति तावद् विवेच्यम् । मदशक्त्यादिदृष्टा-
न्तेन तु प्रत्यवयवमेव चैतन्यं प्राप्तम् , मदशक्तेः प्रत्येकं मदिरात्रयवेषु दर्शनात् ।
तथा च चैतन्येऽभ्युपगम्यमाने "य एवाहंदृष्टवान् , स एव स्पृशामि" इत्याद्य-
नुभवो विरुध्येत, द्रष्टुः स्प्रष्टुश्च भिन्नत्वादेककर्तृकत्वानुपपत्तेः । न चाम्ल-
दर्शनसमनन्तरं रसनविक्रियाद्यपि प्रागभिहितमुपपद्येत, अनुभवितुर्भिन्नत्वात् ।
पादे च दुःखमुपयति सति करो न प्रतिकुर्यात् , स्वस्यैव दुःखप्रतिकारादौ
प्राणिनां प्रवृत्तिदर्शनात् । तस्माद्यदि संघात एव चैतन्यमुपगच्छसि तदापि
संघातोऽयमवयवेभ्यो भिन्नो वा स्यादभिन्नो वेति पर्यनुयुज्यसे ।

यद्यभिन्नस्तर्हि तदेतदवयवेष्वेव चैतन्यमायातमिति पूर्वोक्तसवदोष-
प्रसक्तौ घट्टकुट्यां प्रभातायितम् । यदि तु अवयविनं भिन्नमभिन्यसे तर्हि
एकस्यापि शरीरावयवस्य विनष्टौ सोऽवयवी विनष्ट इति कोऽपि पूर्वमनुभूतं न
स्मरेत् । बाल्यकौमारयौवनवार्धक्यादिभेदैश्च सर्वथा भिन्नत्वमुपगतेऽस्मिन्शरीरे
'य एवाहं बाल्ये पितराननन्वभूवं स एव स्थाविरे पुत्रपौत्राननुभवामीति'
प्रत्यभिज्ञा सर्वथा नोदियात् । न च बाल्याद्यवस्थान्तरेष्वनुभूतमर्थमवस्थान्तरे
कश्चिदपि स्मरेत् । तस्मादेष कायचैतन्यवादः सर्वथा दुरुपपादः । एवमिन्द्रि-

येष्वपि चैतन्यं नाभ्युपगन्तुं शक्यम्, भिन्नेन्द्रियेणापि प्रत्यभिज्ञायाः प्रदर्शितत्वात्,
तस्याश्चेन्द्रियचैतन्ये दर्शनस्पर्शनकर्तृभेदेनानुपपत्तेः । कारणानि चोपलब्धा-
विन्द्रियाणि, चक्षुषा पश्यतीत्यादि व्यपदेशात् । न च कर्तृकरणयोरैक्यमुचितम् ,
तस्मात्कर्ताऽयमात्मा करणेभ्य इन्द्रियेभ्यो भिन्न एवाऽभ्युपगन्तव्यः । अथ शाखा-
भिर्वृक्षं विनमति, स्तम्भैर्गृहं ध्रियत इत्यादौ कर्तृकरणयोरभेद उपलभ्यत एवेति
चेत्तदविज्ञानात् । अवयवेभ्योऽतिरिक्तमवयविनमुपगच्छतामस्माकं कर्तृ
करणयोर्भेदस्यैव सुप्रसिद्धत्वात् । किचान्यत्–इन्द्रियचैतन्येऽभ्युपेते वार्धक्येऽन्धः
पूर्वं चक्षुषानुभूतान्पदार्थान्नैव स्मरेत्, अनुभवितुरेव विनाशात् । अन्येन चान्यानु-
भूतार्थस्मरणानुपपत्तेः । विषयसमवधाने च विज्ञानशक्तिरिन्द्रियाणां समवधा-
रितेति विषयासान्निध्ये स्मरणं नैवोपपद्येत, इन्द्रियाणां तथाशक्तिविरहात्,
अन्यस्य च स्मर्तुरभावात्, तस्मादिन्द्रियचैतन्यवादोऽपि सर्वथापास्तः ।

भवद्भिरेव नित्यत्वेनाभ्युपेतस्य मनस एव आत्मत्वमस्तु । आत्मानमभ्युपेत्यापि
मनोव्यापारमन्तरेण न ज्ञानं सुखाद्युपलब्धिर्वाऽभ्युपगम्यत इति वरं मनस एव
ज्ञानसुखाद्याश्रयत्वोपगमइति चेन्नैतद्युक्तम् । कारणत्वेन साधितस्य मनसः
कर्तृताया दुर्वचत्वात् । यथा हि रूपाद्युपलब्धौ करणानि चक्षुरादीनि, तथैव
सुखाद्युपलब्धौ करणं मनोऽभ्युपेतम् । तद्यथात्मत्वेन कर्तृत्वमारोप्यते सुखाद्युप-
लब्धौ करणं नूनमन्यद्वक्तव्यम् । तथा च नाममात्रे विवादो न वस्तुनि । करणस्य
कर्तुश्चोभयोरेवाऽभ्युपगतत्वात् । यदि तु सुखाद्युपलब्धौ स्वयं मन एवात्मत्वेन
प्रतिपन्नं कारणम्, न तस्य कारणान्तरापेक्षेत्युच्येत तर्हि रूपाद्युपलब्धावपि स्वतन्त्र-
मेव कारणमस्तु किं चक्षुरादिभिः करणैः । रूपाद्युमलब्धौ सन्ति चक्षुरादीनि
करणानि सुखाद्युपलब्धौ तु नास्ति किमपि करणमिति नियमे प्रमाणाभावः ।
किंच सत्यात्मनि विभौ; सत्सु चेन्द्रियेषु, सति चापि विषयसान्निध्ये युगपज्ज्ञान-

द्वयाद्यनुत्पत्या मनोऽस्माभिरनुमीयते, तथैव यदि स्वतन्त्र आत्मा स्यात् तर्हि पुनरपि युगपदालोचनस्मरणदर्शनादिप्रसङ्गो दुर्वारः स्याद्, व्यापारापेक्षितया कालभेदस्य करणस्यानभ्युपगमात् । करणान्तराभ्युपगमे तु नाममात्रे विवादो न वस्तुनि । किंचान्यत्–युगपज्ज्ञानानुत्पत्तेर्मनसोऽणुपरिमाणमभ्युपेतम्–तदाश्रयत्वे हि ज्ञानसुखानीनामणुवृत्तीनां रूपादिगुणानां प्रत्यक्षाभावेन कारणतोपगमात्, मनसि च महत्त्वाभावात् । तदेवं मनसोऽपि नात्मत्वमिति साधितम् । सोऽयं शरीरेन्द्रियमानसाद्यतिरिक्तस्तदधिष्ठिताहंप्रत्ययगोचर आत्मा नाम द्रव्यम् । तस्य चैतस्य रूपादिमत्वे शरीरादिवदेव बाह्येन्द्रियैः प्रत्यक्षत्वप्रसङ्ग इतिरूपादिविरहादेवाऽमूर्तोऽयमात्मा । अमूर्तस्य च परिच्छेदासंभवाद् विभुत्वमस्यावसेयम्, मूर्तिरेव हि परिच्छेदिका पदार्थानाम्, अमूर्तानां कालाकाशादिवदेव परिच्छेदस्यानुभवविरुद्धत्वात् । कि च विभुत्वाभावे अणुत्वं वा स्यादात्मनः शरीरपरिमितत्वं वा । अणुत्वे तदाश्रितानां ज्ञानसुखादीनां पूर्वोक्तयुक्तेरप्रत्यक्षता प्रसज्येत । शरीरपरिमितत्वे त्वनित्यता दुर्निवारा । मध्यमपरिमाणविशिष्टानां घटादीनामनित्यतायाः प्रत्यक्षं दर्शनेन तत्रापि तदनुमानस्याप्रतिहतं प्रवृत्तिसंभवात् । शरीराकाराणां चानवस्थितत्वेन तदनुविधायिन आत्मनोऽप्याकारस्यानवस्थितिप्रसङ्गाच्च । तथा च वृद्धिह्रासयोगितया शरीराणामिवात्मनोऽप्यनित्यत्वं केन वार्येत, वृद्धिर्हि केषांचिदवयवानामुत्पत्तिः, ह्रासश्च केषांचिदवयवानां विनाशः । उत्पत्तिविनाशविशिष्टत्वमेव चानित्यत्वमिति कथमात्मनोऽनित्यत्वं न स्यात् । अनित्यतात्वात्मनोऽनुपदमेव निराकरिष्यते । संकोचविकासौ तु मूर्तधर्मौ नात्मनि संभविनौ । तस्माद् विभुत्वमेवात्मनो निर्विवादम् । विभुत्वं व्यापकत्वं चेत्यनर्थान्तरम् । तच्च सर्वदेशावस्थानं विभुत्वं सर्वैर्हि मूर्तिमद्भिः पदार्थैराकाशादिवत् युगपत् अप्रतिघातकत्वाच्चामूर्तानां सर्वेषां सर्वदेशावस्थानमविरुद्धम् । मूर्तं हि मूर्तान्तरं प्रतिहन्ति,

स्वसामानाधिकरण्येन तदवस्थितिमपवारयति, अमूर्तानां त्वाकाशादिवदेवैकाधिकरण्ये न कोऽपि दोषः । तस्मादविरुद्धं सर्वात्मनां विभुत्वम् ।

ननु च भोः यदि विभुमिममात्मानमभिमन्यसे कुतस्तत्तर्हि शरीरादन्यत्रापि न विषयोपलब्धिः । कुतो वा नान्यत्रापि सुखदुःखेच्छादिप्रत्यय इति चेन्नैतत्सारम्, आत्ममनःसंयोगस्योपलब्धिसामान्ये हेतुताभ्युपगमेन मनसश्चान्तःशरीरमेवावस्थित्या शरीरावच्छेदेनैवोपलब्धेः सुवचत्वात् । अथैवमपि सर्वात्मनां सर्वैरेव शरीरैः सर्वैरपि च मनोभिः सर्वकालं संयुक्ततया यज्ञदत्तशरीरेऽपि कुतो न देवदत्तस्य विषयोपलब्धिः । स्वकीय एव शरीरे स्वकीयेनैव मनसा स्वस्योपलब्धिरिति चेत्तदप्यसंभवि, शरीरेषु मनःसु वा स्वकीयताया एव दुर्वचत्वात् । सर्वेषामपि शरीरमनसां सर्वात्मभिः संयोगमुपेतानामिदं स्वीयमिदं परकीयमिति नियामकाभावात् । ततश्च दुर्निवारा सर्वशरीरेषु सर्वेषां विषयाद्युपलब्धिः, न च सा संभवतीत्यसाम्प्रतमात्मनो विभुत्वमितिचेन्मैवं वोचः । स्वकृतकर्मजन्येनादृष्टेन (धर्माधर्माभ्यां) यदुपार्जितं शरीरं तदेव तत्तदात्मनां स्वीयं शरीरम्, तदेव च तत्तदात्मनां भोगसाधनम् स्वीयत्वादेवेति न शरीरान्तरेषूपलब्धिसंभवोऽपि । नच शरीरसाधरणीभूतानामदृष्टानामेव व्यावर्तकानामुपलब्धिरिति शक्यमाक्षेप्तुम् । अदृष्टस्यासाधारणत्वोपगमात । तथा च यदात्मसमवायि यददृष्टम् तदेव तस्य शरीरादिकमुत्पादयतीति सर्वं सुस्थम् ।

ननु च भोस्तथापीत्थमनुयुज्यसे, अदृष्टं हि नामेदं प्राक्तनं बुद्धिशरीरारम्भलक्षणप्रवृत्तिजन्यम्–सर्वैरपि च मन.शरीरैः सर्वेप्यात्मानस्तुल्यं संयुक्ता इत्युक्तमेव । तथा च सर्वात्मसंयुक्तैः शरीरादिभिः कृतं कर्म कुतः खलु नियत एवात्मन्यदृष्टमुत्पादयति, नान्येष्वात्मसु इति विनिगमनाभावः । तथा चादृष्टस्यापि नियामकाभावेन येन केनचिच्छरीरेण कृतं कर्म सर्वेष्वप्यात्मस्वदृष्टमुत्पादयेत्,

सर्वे च तत्फलमुपभुञ्ज्यु. । न चात्मनिष्ठप्रयत्नप्रेरितानामेव शरीरादीनां प्रवृत्या यस्मिन्नात्मनि प्रवृत्यनुकूलः प्रयत्नस्तत्रैव प्रयत्नफलभूतमदृष्टं समवैतीति विनिगन्तुं युक्तम्, यतस्तावदात्मनिष्ठे प्रयत्नेऽपि आत्ममनःसंयोग एव हेतुतयाऽभ्युपगतः । स च संयोगः सर्वैरपि मनोभिः सर्वेषामप्यात्मनां सदृश एवेति कुत एकस्मिन्नेवात्मनि प्रयत्न उत्पद्येत ? तथा च प्रयत्नोत्पत्तेरनैयत्ये तज्जन्यप्रवृत्तिजनितादृष्टानां समवायोऽप्यनियत इति तत्कारितः शरीरेण स्वस्वामिभावः सुखदुःखसाक्षात्कारश्चापि सर्वोऽनियतमेव प्राप्त इति सर्वमपि दुःस्थम्, तथा च न युज्यतेऽयमनेकात्मनां विभुत्वाऽभ्युपगम इति चेत्सर्वमिदमनर्गलं पश्यन्ति भवन्तः । न हि सर्वैरपिमनोभिः सर्वात्मनामेक एव संयोगः, अपितु प्रत्यात्मं भिन्नः, आश्रयभेदेन संयोगभेदात् । तथा च स्वेनैव मनसा संयोगः, स एव च तत्र प्रयत्नोत्पादकः, मनसः स्वत्वं तु प्राक्तनमदृष्टम्, तस्यापि स्वीयत्वनियामकः प्राक्तन आत्मनः प्रयत्नः, तन्नियामकश्च तत्कारणीभूतः स्वेनैवमनसात्मसंयोगः । अदृष्टनिमित्तको मनःशरीरादिसम्बन्धः, मनःशरीरादिसम्बन्धनिमित्तकं चादृष्टमित्यनादौ संसारे बीजाङ्कुरवन्नेयमनवस्था शङ्कातङ्काय । तथा च तत्तदात्मप्रयत्नजन्या तदीयशरीरादिप्रवृत्तिरेव तस्मिन्नात्मन्यदृष्टमुत्पादयति, तच्चादृष्टं तस्मिन्नात्मनि समवेतं कालवशात्प्राप्तपरिपाकं तस्यात्मनः शरीरान्तरादिभिः संयोगं सुखदुःखादिकं चोपस्थापयतीति न कोऽप्यत्र दोषः । तथा चानेकत्वे सत्यप्यात्मनां विभुत्वं निर्विवादम्, अनेकत्वन्तु जन्ममरणसुखदुःखादीनामवस्थितेः प्रत्यात्ममनुभवसिद्धतया न शक्यं कथमप्यपलपितुम्, दृश्यते हि कश्चिन्मृतः, कश्चिज्जातः, कश्चित्सुखी, अपरस्तु दुःखी, कश्चिज्जानाति, अपरस्तु मूढः, कश्चिन्मुक्त अपरस्तु बद्ध एवेति प्रत्यात्मं भिन्ना सुनियता व्यवस्था । नैयमेकत्वे सर्वात्मनामुपपादयितुं सुशका, विरुद्धधर्मणामेकत्र समवायविरोधादित्यनेकत्व-

मात्मनां निर्विवादमेव । तथा च ''एकोदेवः सर्वभूतेषुगूढः'' इत्याद्या काचिदात्मनामेकत्वं प्रतिपादयन्ती श्रुतिर्यद्युपलभ्यते तर्हि–जातिपरत्वेनैव नेया । अस्ति हि सर्वात्मसु समवेता सामान्यपदाभिधेया आत्मत्वजातिरेकैव । अयमात्माऽयमात्मेत्यनुगतप्रत्ययहेतुतया तस्या निष्प्रत्यूहं प्रसिद्धत्वात् । तथा चात्मसमवेतायास्तस्या एवैकत्वमात्मसूपचर्य प्रवर्तन्ते श्रुतयो नत्वात्मव्यक्तीनामेकत्वं कथमपि संभवतीत्यालोचयन्तु सुधियः ।

अथ शरीराद्यतिरिक्तोऽयमात्मा नित्योऽनित्योवेति विचारः प्रवर्तनीयः । नित्यत्वं हि प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम् । यस्य पदार्थस्योत्पत्तिविनाशौ नस्तः स एव नित्य इति तात्पर्यम् । अनित्यत्वं चोत्पत्तिविनाशयोगित्वम् । तत्र तावदेकशरीरसम्बन्धे उत्पत्तिविनाशौ नैव गृह्येते । अहमुत्पन्नो नष्टो वेत्यनुभवाभावाद् । पूर्वदृष्टश्रुतचराणामर्थानामाशरीरपातं स्मरणात् प्रत्यभिज्ञानाच्च । अथ शरीरेण सहाप्यात्मन उत्पत्तिविनाशौ नैव वक्तुं शक्यौ, जातमात्रस्य बालस्याननुभूतविषयस्य प्रागेव विषयानुरागदर्शनात् । यदि हि प्रागेवास्य विषयानुरागो न स्यान्नैवायं विषयानुपसेवेत । किमन्यत्–जीवनहेतुभूते स्तन्यपानादावपि नैव प्रवर्तेत । उपादित्साया प्रवृत्तौ रागस्यैव हेतुताया लोकदृष्टान्तेन सिद्धत्वात् । तथैव भीतिहेतोर्विनिवृत्तिदर्शनात् बालस्य तेषु विद्वेषोऽप्यनुमेय एव, निवृत्तौ लोकदृष्टान्तेनैव द्वेषस्य हेतुतासिद्धेः । रागद्वेषौ चेमौ न पूर्वानुभूतविषयस्मरणमन्तरेणोपपद्येते । यो हि यज्जातीयं विषयमनुभूय सुखमुपलब्धवान्–तज्जातीयमर्थमनुपश्यन् पूर्वसुखं चानुस्मरन् स तत्रानुरज्यति, तानुपादित्सति च, यज्जातीयेन तु विषयेण दुःखमुपलब्धवान्, तज्जातीयमनुपश्यन् दुःखमनुस्मरंश्च तं द्वेष्टि जिहासति चेति दृश्यते लोके । तथैव खलु क्वचिदप्यनुरज्यन् कंचिदर्थं द्विषंश्चायं बालोऽपि नूनमवश्य पूर्वमपि विषयानन्वभूत् । तात्कालिकमेव सुखं दुःखं वाऽनुस्मरन् रज्यति

द्वेष्टि चेति युक्तमेतत्, अन्यथा रागद्वेषयोरनुपपद्यमानत्वात् । न जातमात्रेऽपि कुसुमादौ यथा गन्धादिरुत्पद्यते—तथैव जातमात्रेऽपि बाले रागोऽपि नाम गुण उत्पद्यतामिति वक्तुं साम्प्रतम् । यतः सर्वमपि वस्तु कारणादेवोत्पद्यते न तु सर्वं सर्वत्रेति युक्तमेतत् । अन्यथा व्यवस्थाया एवाभावापत्तेः । कार्यकारणभावश्चैष यथादर्शनमेव व्यवतिष्ठते ।

रागस्त्वयं पूर्वानुभवस्मरणहेतुक एव सर्वत्रोपलब्ध इति कथं तस्यादृष्टं कारणान्तरं कल्पनीयम् । अन्यथा तु घटोऽपि मृदमन्तरेणैवोत्पद्यतामिति सर्वव्यवस्थाव्यवच्छेदप्रसङ्गः । तस्माद् बालस्य रागद्वेषाभ्यामवश्यमस्य पूर्वानुभवोऽनुमातव्यः । पूर्वानुभवश्च नान्तरेण शरीरमिति पूर्वशरीरयोगोऽपि संसिद्धः । तत्रापि च सरागस्यैवास्योत्पत्तिः, अन्यथा विषयानुभवे प्रवृत्यनुपपत्तेरिति ततोऽपिपूर्वं शरीरयोगः सिद्ध एव । तथा च क्वचिदपि प्राथमिकरागोत्पत्तेरसंभवेन जन्मपरम्पराया अनादितया आत्मनोऽप्यनादित्वसिद्धावनादिभावस्य नाशायोगादनन्तत्वमप्यात्मनः सिद्धमेवेति नित्य एवायमात्मा । एतेनैव बालस्य हर्षशोकादिसंप्रतिपत्तिरपि व्याख्याता, हसितरुदिताभ्यामनुमिताभ्यां हर्षशोकाभ्यामपि पूर्वानुभवानुभूतमर्थमयं स्मरति, तदा किमिति पूर्वसम्बन्धिनो मनुष्यादीनप्येष न प्रत्यभिजानातीति चेत्सत्यम् । उद्बुद्धसंस्कारजं हि स्मरणं नाम, तत्र जीवनहेतुभूताहारादिविषयानुभवजनितसंस्काराणां जीवनादृष्टमेवोद्बोधकमित्युद्बुद्धास्ते संस्काराः स्मृतिं जनयन्त्येव । यत्किलादृष्टं (धर्माधर्मौ) यां यां योनिमेतमनुमापयति तदुचितविषयोपसेपनायैव पूर्वसंस्कारानस्योद्बोधयति ।

विषयान्तर (कुटुम्बिजनाद्यनुभव) संस्काराणां तत्र सतामपि न किञ्चिदुद्बोधकमित्यनुद्बुद्धास्ते न तत्र स्मृतिं जनयितुमीशते । येषांतु तपोऽतिशयादिमहिम्ना समुद्बोध्यन्ते सर्वेपि संस्कारास्त इमे जातिस्मरा प्रत्यभिजानन्त्येव

सर्वमपीति सर्वं निरवद्यम् । तस्मात्पूर्वानुभूतस्मरणेनैव रागाद्युत्पत्तावनुत्पत्तिविरहात्पूर्वानुभवः संसिद्धः साधयत्येव नित्यत्वमात्मन इति निर्विवादम् । अमूर्तत्वादपि चाकाशादिवदात्मनो नित्यत्वमनुमीयत एव ।

न जायते म्रियते वा विपश्चिन् ।
नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो ।
न हन्यते हन्यमाने शरीरे ।

इत्यादि स्मृत्या चाप्यात्मनो नित्यत्वं प्रमीयत एव । शिष्टानां मोक्षार्थं प्रवृत्तिदर्शनाच्च नित्यत्वमनुमातव्यम् । यदि तावदात्मैवानित्यः स्यात् तर्हि शरीरेण सहैव तस्यापि विनष्टौ कस्य मुक्त्यर्थं शिष्टाः प्रवर्तेरन् । न च निष्फला शिष्टप्रवृत्तिरिति नित्यत्वमेवात्मनो निर्विवादम् । तदेवं शरीरेन्द्रियमानसातिरिक्तो नित्यो विभुरात्मा इत्युपपादितः । स चायमात्मात्र शास्त्रेऽपि द्रव्यमित्येवाभिहितः ।

द्रव्यपदार्थस्तु "क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्" इति सूत्रेण भगवता कणादेन लक्षितः । अत्र च क्रियावत्वगुणवत्वसमवायिकारणत्वमिति भिन्नान्यैवैतानि लक्षणानि । केषाञ्चिद् द्रव्याणां क्रियावत्वविरहेऽपि गुणवत्वादेव द्रव्यलक्षणं घटते । गुणास्तु द्रव्याश्रया स्वयमगुणा निष्क्रियाश्च रूपादयश्चतुर्विंशतिरुपदर्शिताः, तेषां च यथायथं सर्वद्रव्येषु वृत्तिरवसेया । तत्र तावदस्मिन्नात्मद्रव्ये के गुणा इति जिज्ञासायां—'बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराख्या' नव विशेषगुणाः, संख्यापरिमाणपृथक्त्वसंयोगविभागाख्याः पञ्च सामान्यगुणाश्चेति संभूय चतुर्दशगुणा अत्र समवेता विज्ञातव्याः । तत्र तावद् बाह्यवस्तुप्रकाशकं विशेषगुणविशिष्टस्वस्वरूपप्रकाशकं वा यदात्मन्युत्पद्यते ज्ञानं सेयं सर्वव्यवहारहेतुभूता बुद्धिर्नाम । सुखं त्वात्मनोऽनुकूलवेदनीयम्—'अनुग्रहलक्ष-

णम्' । तदिदमनेक विधम् । यत्किलेन्द्रियसन्निकर्षेण स्रक्चन्दनवनितादिमनोज्ञविषयोपलब्ध्या समुत्पद्यते तत्स्मृतिजम्, यच्च भविष्यदेवंविधविषयसंकल्पमात्रेणोत्पद्यते—तन्मानोरथिकम्—संकल्पजं वा" । एवं स्वाप्निकेषु विषयेषूत्पद्यमानं स्वाप्निकम् । असत्स्वाप च विषयेषु विदुषा काव्यनाटकाद्यवेक्षणात्—शमसन्तोषादिना वा समुत्पद्यमानं तत्तन्नाम्ना व्यवहर्तव्यम् । सर्वमपीदं सुखं वक्ष्यमाणधर्माख्यगुणहेतुकम्, अनुग्राहाभिषङ्गनयनवदनप्रसादादिनापरस्थमनुमेयम् । स्वकीयन्त्वात्ममनःसन्निकर्षात्प्रत्यक्षमेवेति ।

आत्मनः प्रतिकूलवेदनीयमुपघातलक्षणं दुःखम् ।

तच्चानिष्टवस्तुसंबन्धादिष्टवस्तुवियोगाच्च । सुखवदेव चास्यापि स्मृतिजत्वं संकल्पजत्वं स्वाप्निकत्वं च व्याख्येयम् । इदमधर्माख्यगुणजन्यं मुखदैन्याश्रुपातादिभिः परस्थमनुमेयम्—स्वीयं तु प्रत्यक्षमेवेति । स्वसम्बन्धितया सम्बन्धिनः परस्यसम्बन्धितया वा यदप्राप्तस्य वस्तुनः प्रार्थनं सेयमिच्छा नाम । सा च विषय विशेषोपहिता कामाभिलाषरागसंकल्पकारुण्यवैराग्योपधाभावादिभिः शब्दैर्यथायथं व्यवहृता द्रष्टव्या । तद्यथा—'मैथुनेच्छा कामः, भोजनेच्छाभिलाषः, पुनः पुनर्विषयानुरञ्जनेच्छा रागः, अनासन्नक्रियेच्छा संकल्पः, स्वार्थमनपेक्ष्य परदुःख प्रहाणेच्छा कारुण्यम्, दोषदर्शनाद्विषयपरित्यागेच्छा वैराग्यम्, परवञ्चनेच्छा उपधा, अर्न्तनिगूढ़ेच्छा भावः—इत्यादयो भेदा अन्येऽपि स्वयमूह्याः । अथ यस्मिन्सत्यात्मा प्रज्वलित इवावभासते सोऽयं प्रज्वलनात्मको द्वेषः । दुःखानुस्मरणादिकमत्र हेतुः । द्रोहः, क्रोधः, मन्युः, अक्षमा, अमर्ष इतयस्यैव विशेष-निबन्धना भेदाः । 'आशुतर-विनाशी क्रोधः, चिरानुविद्धोपकारपर्यवसायी द्रोहः, अपकारासमर्थस्यापकारिणि द्वेषो निगूढ़ो मन्युः, परोपकारासहनमक्षमा, स्वगुणपरिभवोऽपकारासमर्थो द्वेषोऽमर्षः, इत्याद्यन्यदप्यूह्यम् । अथ यस्य वशाज्जड़ानामपि

शरीरादीनां कर्मसु प्रवृत्तिः सोऽयमात्मगुणः प्रयत्नो नाम । प्रयत्नः, संरम्भः, उत्साहः, कृतिः—इत्यनर्थान्तरम् । स चायं प्रयत्नो द्विविध—सुषुप्तावपि प्राणापानादिसंतानप्रवर्तकः, प्रबोधमनुसन्धाय सुप्तस्य जागरणे मनसः प्रवर्तक एकः अपरस्तु हितप्राप्तयेऽहितपरिहाराय च शरीरादिकं व्यापारयन् इच्छाद्वेषपूर्वकः । अयमेव शरीरधारकोऽपीत्यत्रबोध्यम् । एतत्संम्बन्धादेव चास्यात्मनो विभोरपि कर्तृत्वोपपत्तिः, जड़ान् स्वयमप्रवर्तमानान् शरीरानेतद्गुणसंबन्धादयं प्रवर्तयतीति प्रवर्तनादयमेव शुभस्याशुभस्य च कर्मणः कर्तेत्याख्यायते । शुभाशुभं तत्फलं चाप्युपभुङ्क्ते । दृश्यते हि लोके य एव करोति स एव फलेन युज्यत इति । अनुभवसिद्धं चास्य कर्तृत्वम्, अहं जानामीत्यादिवदहं करोमीत्यबाधितप्रतीतेः । न च विभौ क्रिया-विरहात् क्रियाश्रयस्यैव च कर्तृत्वात् कथमेतदिति शङ्कनीयम्, प्रवर्तकतयैव कर्तृताया उद्भूतत्वात् । स्वयमप्रवर्तमानस्य जड़प्रवर्तकत्वमसिद्धमितिचेदप्रवर्तमानस्याप्ययस्कान्तस्यायःप्रवर्तकत्वमुपलक्ष्य संतोष्टव्यमिति दिक् ।

अथैतद्यत्नप्रेरितशरीरवाङ्मनःकृत-कर्मभिरात्मनि योऽतिशय उत्पाद्यते स एवादृष्टमित्याख्यातः । स द्विविधः धर्मः, अधर्मश्च । उत्तम-कर्म-जन्यो धर्मः, निकृष्टकर्मजन्यस्त्वधर्मः । कर्मणामुत्तमाधमत्वन्तु वेदादिशास्त्राण्यनुसृत्य प्रतिपत्तव्यम् । यद्धि यदुद्देश्येन वेदादौ विहितं वर्णाश्रमाद्युचितं कर्म तदनुष्ठीयमानमात्मनि धर्ममुत्पादयति, यत्तु यस्य निषिद्धं तत्क्रियमाणमधर्ममुत्पादयति, नित्यं च विहितमननुष्ठीयमानमप्यधर्ममुत्पादयतीत्यवसेयम् । इमौ च धर्माधर्मावेवात्मनः सुखदुःखप्राप्तिहेतू । धर्मोह्ययं स्वसामर्थ्यादेव पितृमनुष्याद्यासूत्तमयोनिषु संसारयत्यात्मानम्-इष्टं धनपुत्रदारादिकमनुप्रापयति च परंपरया च (चेतःशुद्धिद्वारकया) मुक्तेरपि हेतुतामुपयाति । अधर्मस्तु यथाशक्ति प्रेततिर्य-

गाद्यास्वधर्मयोनिषु संसारयति । अनिष्टसयोगेष्टवियोगादिकं च प्रापयति, निरन्तरं च संसारबन्धस्यैव कारणीभवति । उभावपि त्विमौ परिप्रापणीयं यावन्तं सुखं दुःखं वानुभाव्य स्वयमेव विनश्यतः आपरिपाकं त्वात्मन्यनुवर्तेते एव । कदाचित्तत्वज्ञानमुत्पाद्यत्वामूलं विनश्येते । संस्कारस्त्वयं त्रिविध आख्यायते । तत्र कंचिदर्थविशेषं दृष्टश्रुतादिना साक्षात्कृतवत्यात्मनि भावना नाम संस्कार उपजायते । यः कालान्तरेऽपि तमर्थं स्मारयति प्रत्यभिज्ञापयति च, अस्य, चोत्पादने हेतवः पटवभ्यासादरप्रत्ययाः । तत्र यं कंचनाश्चर्यकरमर्थं यदा स्तिमितमनुपश्यति शृणोति वा तदास्य सोऽयं पटुप्रत्ययः । अनेन च पटुरेव संस्कारोऽभ्युत्पाद्यते । यत्तु यत्नेन विद्या शिल्पव्यायामादिकं भूयो भूयोऽभ्यस्यते सोऽयमभ्यासप्रत्ययः । अत्र च पूर्वपूर्वमुत्पन्नं संस्कारमपेक्ष्योत्तरोत्तरेण प्रत्ययेन संस्कारातिशय उत्पाद्यते । अपेक्षा बुद्धिसहकृतमनुभवनं चादरप्रत्ययः, अयमपि संस्कारमुत्पादयति । उपेक्षया दृष्टश्रुतेषु त्वर्थेषु नोत्पद्यते संस्कार इति न तेषां स्मरणमपि समुदेति । अयं च ज्ञान-मद-दुःखादिविरोधीत्यनुभवेन स्वयमूह्यम् । तदेवमेत आत्मनो नव विशेषगुणा व्याख्याताः । एषां सर्वेषामपि समवायिकारणमात्मा । असमवायिकरणन्तु सर्वत्राप्यात्ममनः संयोगः । निमित्तकारणं च तत्र तत्र प्रायेणोक्तमेव–"ज्ञानजन्या भवेदिच्छा, इच्छा जन्याकृतर्भवेत्" इत्यादिकर्मापि बोध्यम् । स्वातिरिक्तेषु च सर्वेषु प्रायेण धर्माधर्मयोरपि यथायथं निमित्तत्वमवगन्तव्यम् । एषु च धर्माधर्म-भावनासंस्कारा अप्रत्यक्षाः (अतीन्द्रियाः) । अन्येतु षडप्यात्मनः संयोगात्प्रत्यक्षमुपयान्ति । सर्वेऽपि चैत आत्मन्यव्याप्यवृत्तयः । आत्मनि च सर्वदेशावच्छेदेन ज्ञानेच्छादयो वर्तन्त इति यावत् । षट् च बुद्धयादिः क्वचन बहुकालावस्थायितयाऽभिज्ञायते । सोऽयं बुद्धयादिसंतानएवैकत्वभ्रम आकलनीयः । क्षणिकतया एवैषु गुणेष्वनुभवसिद्धत्वात् । एतद्

विनाशकत्वं चैषामुत्तरमुत्पन्नानां द्रष्टव्यमिति दिगेषा । अथ य आत्मनि पञ्चसामान्यगुणा आख्यातास्तत्रात्मनां बहुत्वप्रत्ययहेतुभूता बहुत्वसंख्या पूर्वमुपपादितप्रायैव । परिमाणं चात्मनः परममहत्, विभूनां परममहत्परिमाणवत्ताया एवाभ्युपगमात् । यच्चात्मनो द्रव्यान्तरेभ्यः परस्परं च पृथक्त्वव्यवहारहेतुस्तदिदं पृथक्त्वम् । संयोगश्च मनसा सह ज्ञानादिविशेषगुणहेतुः सर्गादौ च परमाणुभिः समं तत्प्रवृत्तिहेतुः । अयं च तत्तद्गुणाविष्टैरात्मप्रदेशैः सहान्यतरकर्मज एव संयोग आत्मनो विभुत्वेन क्रियावत्वायोगादिति । आत्ममनःसंयोगादुत्पादितानां सुखादीनां विनाशहेतुरात्ममनोविभाग इत्यवसिताः पञ्चसामान्यगुणाः । एषां द्रव्यान्तरेष्वपि वृत्तितया सामान्यता । त एते चतुर्दशात्मगुणा उपदर्शिताः । गुणाश्चैते द्रव्यादात्मनो भिन्ना एव । अभेदे सत्याश्रयाश्रयिभावानुपपत्तेः । दृश्यते चात्मनि ज्ञानम्, बहुत्वम्, संयोगः, घटे रूपमित्यादय आश्रयाश्रयिभावनिबन्धना व्यवहाराः । न च तदेव तदाश्रितत्वं प्राप्तुं शक्नोतीति भेद एव गुणानां द्रव्येभ्यो न्याय्यः ।

वृक्षे शाखेत्यादिवदभेदेप्याश्रयत्वमुपपद्यतामिति न भ्रमितव्यम्, तत्राप्यवयविनो भिन्नताया एवास्माभिरभ्युपगमात् । किं चैषां ज्ञानादिविशेषगुणानामात्मना सत्यभेद एषां क्षणिकताया अनुभवसिद्धतया आत्मनोऽपि क्षणिकत्वमापद्येत । तया च स एवाहमिति प्रत्यभिज्ञाविरोधः, स्मृत्यनुपपत्तिश्चेति प्रपञ्चितं प्राक् । आत्मन इव च ज्ञानादीनाममि नित्यत्वापत्तौ सत्येकदा घटज्ञानेऽनवरतं तदनुवर्तेत । न च सत्यप्यभेद आत्मनोऽवस्थाविशेषा इमे, अवस्थान्तरेणाभिभवाच्च नैकदावस्थाद्वयं प्रतिभासत इति वक्तुं साम्प्रतम् । अवस्थाया अपि भेदाभेदविकल्पानतिवृत्तेः, यद्यवस्था द्रव्याद्भिन्ना तदा नाममात्रे विवादः । तस्या एवाऽस्माभिर्गुणशब्दादिभिरभिधानात् । अभेदे तु द्रव्यप्रतिभासे तदभिन्नाः सर्वा अपिताः प्रति-

भासेरन्, अवस्थान्तरेणाभिभवश्च नोपपद्येत । अवस्थाया अभिभवे तदभिन्नस्य द्रव्यस्याप्यभिभवापत्तेः । अवस्था अपि चैताः 'तदभिन्नाभिन्नस्य तदभिन्नत्वम्' इति न्यायेन परस्परमभिन्ना एव स्युरिति केन कस्याभिभवः ? तस्माद् गुणादिभिर्द्रव्यस्याभेदपक्षः सुदुःसाध्यः । न चैवं भेदाभेद एवाश्रीयताम्, अस्तु गुणानां द्रव्यैरभेदसमानाधिकरणो भेदः, अतएवाभेदपक्ष आपतितमात्मनोऽनित्यत्वमपि समाधीयेत, तत्रापि नित्यानित्यत्वाभ्युपगमस्यौचित्यादिति भ्रमितव्यम् । भेदाभेदयोर्नित्यत्वानित्यत्वयोश्च विरुद्धयोर्धर्मयोः सामानाधिकरण्यस्य सर्वथानौचित्यात् । अन्यथा विरोधस्यैवाभावापत्तेः ।

नहि लोके कश्चिदपि क्वापि कदापि अयमस्माद् भिन्नः, अभिन्नश्चापीति प्रत्येति । नापि भेदश्रवणानन्तरं नित्यत्वश्रवणानन्तरं वा अभेदानित्यत्वयोः संशयोऽपि कस्यचिदुदेति, विरुद्धधर्मनिश्चयेन तत्संभवस्यैवाभावात् । न चैकस्मिन्नेव वृक्षे कपिसंयोगतदभावयोरेकस्मिन्नेव च घटादौ शैत्यौष्ण्ययोर्दर्शनेनेहापि विरुद्धधर्मसामानाधिकरण्यमस्त्विति वक्तुं युक्तम् । तत्र देशभेदेनैव विरुद्धधर्मयोरवस्थानात्, इह च तथा वक्तुमशक्यत्वात् । न हि कश्चिदात्मप्रदेशो ज्ञानाद् भिन्नः, कश्चित्तुतदभिन्न इति शक्यमभ्युपगन्तुम्, तथा सति तत्प्रदेशे ज्ञानस्य कदाप्यनुदयापत्तेः । न वा घटस्य कश्चिदंशो रूपादभिन्नः कश्चित्तु भिन्न इति वक्तुं सुकरम्, तस्यांशस्य रूपरहितत्वापत्तेः । न चैवं कश्चिदपि लोकः प्रत्येतीति तुच्छमेतत् । आथाप्येकस्मिन्नेव धार्मिणि कार्यत्वकारणत्वयोः परत्वापरत्वयोश्च दर्शनात्तद्वदिहाप्यस्त्वितिचेदिहापि भ्राम्यन्ति भवन्तः । कार्यत्वपरत्वादीनामापेक्षिकधर्माणां तथात्वोपपादनेऽपि वस्तुनिष्ठानां स्वतन्त्रधर्माणां तथात्वकल्पनाया अबोधविलसितत्वात् । न हि कार्यत्वपरत्वादिवन्नित्यत्वादिकमापेक्षिको धर्मः । भेदस्यत्वापेक्षिकत्वेऽपि यदपेक्षोऽभेदस्तदपेक्ष एवभेदो नोपपद्यते,

यथाहि तन्तुः कार्पासस्य कार्यम्, पटस्य तु कारणम्, तथैवात्मा घटादिभिर्भिन्नः स्वगतगुणादिभिस्त्वभिन्न इति शक्यं वक्तुम् ।

तथा च भेद एव गुणादीनां द्रव्यैर्न्याय्य इति स्फुटं साधितम् । न च सति भेदे द्रव्यगुणौ पृथगप्युपलभ्येयातामिति शङ्कनीयम् समवायेन नाम नित्यसम्बन्धेन सम्बद्धानां तेषां पृथगुपलम्भस्यासंभवात् । यत्तु पृथगुपलब्धयोरेव सम्बन्धसंभवादयुक्त आत्मज्ञानयोः सम्बन्ध इति तन्न मनोरमम् । संयोगस्यैव तथात्वात् । समवायस्य तु, गुणगुण्यादीनां नित्यसम्बद्धानामेव सम्बन्धत्वाभ्युपगमात् । अथैवं सत्यात्मज्ञानयोर्भेद एव किं प्रमाणमिति चेत्तदाश्रयाश्रयिभावप्रतीतिरेवेत्युक्तमुपरिष्टात् । एतेन ज्ञाने प्रकाशशक्तिः कुतस्त्या ? स्वाभाविकीतिचेदात्मन्येव कुतस्तथा नोपगम्यत इत्याद्यापादयन्तोऽपि निरस्ताः । आत्मनि ज्ञानम्, ज्ञाने च ज्ञानत्वम्–इति प्रतीतिबलादस्माभिस्तेते पदार्थाः स्वीक्रियन्ते । ननु, प्रकाशशक्तिमात्रसिद्धयर्थं कल्प्यन्ते । ज्ञानत्वे तु, नाश्रितः कश्चिद् धर्मः प्रतीतिसिद्ध इति न स कल्प्यते । यदि कश्चिद् भवेत्–तत्रापि सोऽवश्यमभ्युपगम्येतैवेति क्वानवस्था ? यत्तु ज्ञानं नामेदमर्थान्तरं कुत आत्मन्येव समवैति न मनो गगनादिष्विति तदेतन्मुग्धचेष्टितम् । ज्ञानं नामेदं कुत आत्मन एव पर्यायो न गगनादीनामिति पर्यनुयोगस्य परत्रापि तुल्यत्वात् । तस्मात् ये पदार्था यथा भवन्ति तथैव ते परीक्षकेण परीक्षणीयाः–न तु बलादन्यत्रापि व्यापार्याः । न हि निम्बवृक्षः कटुरित्यन्यैरपि वृक्षैस्तथाभवितव्यमित्यापादयेदनुन्मत्तः । तथैव ज्ञानं नामेदमात्मन्येव समवेतमिति किमस्माभिः शक्यमत्र कर्तुम् । यत्तु यथास्ति तत्तथैव निरूपयामः । तस्माद् भिन्नमेवात्मनो द्रव्याद् गुणो ज्ञानम्–समवायेन च तत्र नित्यं सम्बद्धमिति न कोऽपि दोषः ।

ज्ञानसम्बन्धात्प्रागात्मा ज्ञानी वास्यादज्ञानी वेत्यादि विकल्पोप्यत एव निरस्तः । ज्ञानादिविशेषगुणविरहितस्यात्मनः कदाप्यनुपलम्भात् । यद्यपि तु जन्या एवैत आत्मनो विशेषगुणाः, तथापि प्रवाहरूपेणात्मना नित्यसम्बद्धा एव । अज्ञानस्य चाभावरूपत्वेन न तदर्थं गुणसम्बन्धापेक्षेत्यपि द्रष्टव्यमिति दिक् ।

तदेभिरुपदर्शितैर्गुणैर्विशिष्ट एवायमात्मा मनःप्रत्ययविषयः, 'अहमेतद्विजानामि, अहं सुखी, अहं यते' इत्याद्यनुभवात्, ननु केवल आत्मा कदापि प्रत्यक्षगोचरी भवति ।

तदित्थमनुसृत्य काणादं मतं विवेचितमात्मतत्त्वम् ।

आत्मतत्त्वे सांख्य दर्शनम्

अथात आत्मतत्त्वमधिकृत्य सांख्यदर्शनं प्रस्तूयते । यस्तावदात्मनो वैशेषिकैः शरीरेन्द्रियमानसातिरेकः संसाधितः, सोऽयं युक्ततमः, युक्ते च विभुत्वनित्यत्वे अपि, अनेकत्वमपि तदुत्प्रेक्षितं युक्तमेव । गुणवत्त्वं कर्तृत्वमित्यादि तु यदात्मनि तैरुपक्लृप्तं तदेतन्न मृष्यामहे, कूटस्थनित्यस्यात्मनो गुणवत्त्वाद्यनुपपत्तेः । तथाहि—ज्ञानेच्छादयो गुणाः नित्यास्तावदस्य नाभ्युपगम्यन्ते परैः, नापि च शक्यन्तेऽभ्युपगन्तुम्—अनुभवविरोधात् । जन्यानां च तेषां उपादानमात्मैवोपेयत इति प्राप्तमात्मनः परिणामित्वम्, परिणामिनामेवोपादानत्वसम्भवात् । न हि परिणाममननुभवन् मृत्पिण्ड उपादानं घटस्य दृष्टः । न च द्रव्योपादानेष्वेतदेवम्, गुणोपादानतात्वपरिणामिष्वपि निराबाधमेष्टव्येति साम्प्रतं वक्तुम्, सर्वत्रापि विकारित्व–(परिणामित्व) सामानाधिकरण्येनैवोपादानत्वसिद्धेः विक्रियामननुभवत उपादानतायां निदर्शनाभावात् युक्तिविरोधाच्च । न च शब्दसमवायिकारणमपरिणामि नभोऽत्रोदाहरणं शक्यं वक्तुम् । तस्यापि परिणमितायाः एवास्माभिरभ्युपगमात् । किञ्च अवस्थान्तरप्राप्तिरेव परिणामो नाम, दुग्धस्येव दधिभावः, हरितस्याम्रफलस्येव च पीतभावः । स चायमात्मन्यपि भवद्रीत्या सिद्ध एव । पूर्वक्षणे ज्ञानविशिष्टस्यात्मनः उत्तरक्षण इच्छावैशिष्ट्येनावस्थाभेदस्य सुतरां सिद्धत्वात् । तया च परिणामितया कथञ्चिदनित्यताया अप्यात्मनि प्रसक्तौ कूटस्थनित्यत्वमस्य व्याहन्येत, अपरिणामिन्येव हि कूटस्थनित्यम् । ननु च भो स्यादेतदेवं यदि ज्ञानेच्छादीनामात्मना तादात्म्यमभ्युपगच्छेम, भिन्नत्वमेव तु द्रव्यगुणयोर्वयं साधयामः । तथा चास्तां ज्ञानस्य विनाशः, उत्पद्यतामन्येच्छा, आत्मनस्त्वं त्वनुवर्तत एवेति केनात्मनो नित्यत्वं व्याहतमिति चेत् वाङ्मात्रविलासमेवैतदनुभवन्ति भवन्तः । कदा-

चिदपि पृथगनुपलभ्यमानयोर्द्रव्यगुणयोर्भेदस्यैव कल्पनामात्रत्वात् । ज्ञानस्यात्मनः पृथक्त्वे च जडत्वमात्मनः प्रसज्येत । तथा च स्वयं जडोऽप्ययमात्मा ज्ञानेनार्थान्तरेण सम्बद्धश्चेतनत्वमुपगत इत्यायातम्, न चैतत् सम्भवति, तमः प्रकाशयोरिव जडचैतन्ययोः सम्बन्धानुपपत्तेः । यथा चाप्रकाशेषु लोष्टादिषु नैव प्रकाश उत्पद्यमानो दृष्टः, तथैव जडेऽस्मिन्नात्मन्यपि चैतन्यन्नैवोदियात् । किञ्चैवमाम्रेऽपि हरितत्वविनाशः पीतत्वस्य चोत्पत्तिः, आम्रत्वं त्वनुवर्तत एवेति तत्रापि परिणामो न स्यात्, व्यवहरति तु तत्र परिणाममखिलोऽपि लोकः । किमन्यत् एवं सति द्रव्यत्वस्य सर्वत्रैवानुवर्तनात् तदपेक्षया सर्वेषामपि नित्यता प्रसज्येतेति जैनमतप्रवेशापत्तिः । तस्मादकामेनाप्यवश्यमेवं गुणोत्पादविनाशयोरात्मनः परिणामोऽभ्युपगन्तव्य एव, अयुक्तञ्चैतत् कूटस्थनित्यताव्याघातात् । दृश्यस्यैव च परिणामेनोपपत्तौ द्रष्टुरपि तत्कल्पनाया अनौचित्यात्, दृश्यं हि जगत् द्रष्टाचायमात्मा । तत्र दृश्यस्यास्य परिणामः प्रत्यक्षं प्रसिद्धो न शक्यः कथमप्यपलपितुमिति दृश्यस्य द्रष्टुश्चोभयोरपि परिणामकल्पनापेक्षया दृश्यमात्र एव तत्कल्पनं युक्तम् । द्रष्टुस्तु दृष्टिरप्रतिहतैवानुभवसिद्धेति तत्परिणामकल्पनायां मानाभावः, यदिह्यात्माऽपि परिणमेत तर्त्तहि यथा—चक्षुषः कदाचिदान्ध्यपरिणामः, यथा वा मनसः कदाचित् (सुषुप्तिमूर्च्छादौ) मौढ्यपरिणामस्तथैवास्यापि कदाचिदप्रकाशपरिणामः स्यादिति सत्योऽपि सुखादिवृत्तयो नानुभूयेरन्, अहं सुखीनवेत्यादि संशयश्चापद्येत्, नत्वेतदेवमनुभवविरोधात् । न हि सुखादिवृत्तयः सत्योऽपि कदाचिन्नावभासन्ते, सुषुप्त्यादौ तु वृत्तीनामेवानुदय इति व्याख्यास्यते । किञ्चैतेषां ज्ञानसुखादीनामात्मधर्मत्वेपि मनःसंयोगमन्तरा न संभवो भवद्भिरभ्युपेयत इत्यन्वयव्यतिरेकाभ्यां मनोधर्मत्वमेवैषामुपपत्तिमत् । भवद्भिरात्मन उपादानत्वं मनः संयोगस्य निमित्तत्वं च कल्पनीयमस्माभिस्तु मनोमात्रस्योपादा-

नता प्रकल्प्यत इति कल्पना लाघवमप्यत्रैव पक्षेऽवधेयम्, प्रकाशो (ज्ञानं) धर्मस्तद्धर्मी च जीव इत्युभयं भवद्भिरभ्युपेयते, अस्माभिस्तु प्रकाशरूप एवात्मेति धर्मिकल्पनालाघवमप्यस्माकमेव पक्ष आयाति । किं चान्यत् कर्तृत्वसुखदुःखादीनामात्मधर्मत्वे सर्वतैर्थिकाभिमततत्त्वज्ञानान्मोक्ष एव नोपपद्येत, स्वाभाविकधर्मविनिर्मुक्तेर्द्रव्येष्वसम्भवात् । न हि वह्नेः स्वाभाविकादौष्ण्यान्मोक्षः कदापि घटेत, यदि चायमौष्ण्यं जह्यात्–तर्त्तहि नूनमग्निरेवायं न स्यात्, तथैव यदि सुखदुःखादिकमात्मनः स्वाभाविकं तर्त्तहि तज्जहत आत्मत्वमेव विनश्येत् । तस्मादपरिणामित्वमगुणत्वमक्रियत्वं पुरुषापरपर्यायस्यात्मन एष्टव्यम् । कूटस्थनित्ये गुणासंभवस्योपपादितत्वात्, देशत्यागरूपायाः क्रियायाश्च विभौ कूटस्थे सुतरामघटनात् । एतदेवोपदिशन्ति श्रुतयोऽपि 'साक्षी चेता केवलो निर्गुणश्च' 'अस्थूलमनण्वह्रस्वम्' 'असंगो ह्ययं पुरुषः' 'अकर्ता चैतन्यं चिन्मात्रं सच्चिदेकरसो ह्ययमात्मा' इत्येवमाद्याः ।

ततश्च निर्गुणोऽकर्ता स्वयं प्रकाशरूपः पुरुषापरपर्याय आत्मेति सिद्धम् । अथ निगुणस्यास्य सुख-दुःखादिसम्बन्धः कथमुपपद्येतेति चेत् अनादिसिद्धात् प्रकृतिसंयोगादेवेति प्रतिजानीमः । प्रकृतिस्तु–'सत्वरजस्तमसां साम्यावस्थेति' सूत्रिता भगवता कपिलेन, वैषम्यं-न्यूनाधिकभावस्तद्विरहिताः अवैषम्योपलक्षिताः सत्वरजस्तमः पदाभिधेयास्त्रयो गुणाः प्रकृतिपदेनाभिधीयन्त इति तत्तात्पर्यम् । सत्वादिगुणाश्चैवमुपदर्शिता भगवतेश्वरकृष्णेन—

'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्चगुणाः ।
सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरुवरणकमेव तम' इति ।

इदमत्र तात्पर्यम्—सर्वमपि कार्यजातं लोके त्रिविधं दृष्टम्—सुखात्मकम्, दुःखा-
त्मकम्, मोहात्मकञ्चेति। एक एव पदार्थः कंचन सुखयति कंचन दुःखयति,
कंचन तु मोहयति। वाचस्पत्युक्तः स्त्रीदृष्टान्तोऽत्रानुसन्धेयः। तथा च
सर्वेषामपि पदार्थानां सुखदुःखमोहात्मकत्वमविवादम्। न चान्तःकरणधर्मा एव
सुखदुःखमोहाः न तु बाह्यपदार्थधर्मा इति भ्रमितव्यम्, बाह्यपदार्थसमवधान
एव सुखदुःख मोहानुभवस्य सिद्धतया तेषामपि तादृशवैजात्यस्यावश्यमङ्गीकरणीय-
त्वात्। 'यतोह्यन्तकरणधर्मोऽपि सुखं कस्यचिदेव बाह्यपदार्थस्य समवधाने सत्या-
विर्भवतीति सुखप्रतिनियतस्य तस्य बाह्यपदार्थस्यापि सुखात्मकत्वं न शक्यम-
पलपितुम्, एवमेव दुःखमोहात्मकत्वमपि। बाह्यपदार्थानामपि चान्तःकरणोपादान-
कत्वस्य वक्ष्यमाणवयाऽन्तःकरणस्येव तेषां सुखदुःखमोहात्मकत्वे नास्त्येव विवादा-
वसरः। तदेवं सुखदुःखमोहात्मकानां निखिलकार्याणां परमकारणेनाप्यवश्यं
सुखदुःखमोहात्मकेन भवितव्यम्, कारणस्यैव कार्येषु समन्वयदर्शनात्, मृद इव
घटघटीशरावप्रभृतिषु—सुवर्णस्यैव च कटककुण्डलग्रैवेयादिषु। तच्चेदं सुखदुःखमोहा-
त्मकं निखिलजगतः परमकारणमेवास्माभिः प्रकृतिशब्देन संशब्दितं द्रष्टव्यम्,
दुःखमेव च रजःशब्देन, मोहस्तु तमःशब्देन। तत्रेदं सुखमेवोच्यते सत्वशब्देन।
सुखमित्युपलक्षणं प्रसादलाघवाभिष्वङ्गतितिक्षासन्तोषादीनाम्—सर्वेषामप्येषां सत्व-
रूपत्वात्। दुखःमित्यपि च शोकादीनां राजसात्मनामुपलक्षणम्—एवं मोहोऽपि
निद्रादीनाम्। तेषामेषां गुणानां समुदाय एव प्रकृतिशब्देनोक्तः, तदपेक्षयैव च
सत्वादीनां गुणव्यवहारः, समुदायेऽवयवानां गुणीभावात्—पुरुषभोग्यत्वाद्वा गुणत्व-
मेषां द्रष्टव्यम्—न तु नैयायिकाभिमतं द्रव्याश्रितत्वरूपं गुणत्वं शक्यमेषामभ्युपगन्तुम्,
तन्मते गुणानामुपादानत्वविरहात्। एषां च सर्वजगदुपादानत्वात्। न च तदभिमत-
गुणात्वाभावे सुखादिरूपता सत्वादीनां नोपपद्येत सुखादीनां तैर्गुणत्वाभ्युपगमादिति

वाच्यम्, अत्र सुखादीनां द्रव्यतया एवोपगम्यमानत्वात्। कश्चित्तु सत्वादीनामेव
द्रव्यत्वम्—सुखादयस्तु तद्धर्मा गुणा एव, सत्वादीनां सुखाद्यात्मकत्वोक्तिस्तु
धर्मधर्म्यभेदादेवात्र शास्त्र इत्याद्यभ्यूहतीत्यास्तां तावत्। त एते सत्वादिगुणाः—
'प्रकाशप्रवृत्तिनियमार्थाः', लघु किल सत्वं स्वच्छं सर्वमपि प्रकाशयति, कर्मशीलं
(चलं) च रजोऽक्रिये अपि सत्वतमसी उपष्टभ्य (प्रोत्साह्य) प्रवर्तयति। गुरुभूतन्तु
तमः सत्वस्य प्रकाशलक्षणं रजसश्च प्रवृत्तिलक्षणं शीलमपवारयति (आवृणोति)
यदि हि सत्वं न स्यात्—किमपि तर्हि न प्रकाशेत् (वक्तव्यमिदमग्नेः) रजसश्चा-
भावे प्रवृत्तिरेव नोदियादिति सर्गोऽपि न प्रादुःष्यात्। तमस्तु न भवेत्तर्हि सर्वं
सर्वदा प्रवृत्ति (क्रिया) शीलमेव लक्ष्येत, तमसा तु नियम्यमानं रजः क्वचिदेव
प्रभवति प्रवर्तितुमिति एतद् धर्मविशेषप्रकाशनायैवैते शुक्ललोहितकृष्णैर्वर्णविषैर-
भ्युपचर्यन्ते। स्वच्छतया सत्वस्य शौक्ल्येन रञ्जकतया रजसो लौहित्येन आवश्यक-
तया तमसश्च कृष्णत्वेनोपचारात्। वास्तविकं तु रूपादि नास्त्येवैषाम्। एषु च
त्रिषु परिणामवशादेकैकमुद्भूतमन्यद् द्वयमभिभूय तिष्ठति। तत एवैते—अन्योन्याभि-
भववृत्तय उच्यन्ते। न चान्यद् द्वयमनपेक्ष्य कश्चित् किञ्चिद्विधातुं प्रभवतीत्यन्यो-
न्याश्रयवृत्तयः, अन्यश्चान्यमपेक्ष्य जनयति—परिणमते—इत्यन्योन्यजननवृत्तयः। न
च क्वापि कदापि कश्चिदप्यन्यद्वयविरहितो दृष्ट इत्यन्योन्यमिथुनवृत्तयश्चेति।
इत्थं च परस्परविरुद्धानामप्येषां प्रदीपवत् कार्यकारित्वमविरुद्धम्। यथा हि वर्तितैले
वह्निविरुद्धेऽपि तेन सह संभूयप्रकाशलक्षणं कार्यं निर्वाहयतस्तथैवात्राप्येकस्यान्येन
सह कार्यनिर्वाहकत्वमालोच्यम्। एते च जगति (कार्यावस्थायाम्) अन्योन्यमभिभ-
वन्तो वैषम्यपरिणता एव यद्यप्यनुभूयन्ते, अस्ति किंचित्कार्यं सत्वप्रधानमपरं रजः
प्रधानमितरत्तु तमोऽधिकम्, अथापि सर्वेषामप्यभावकत्वलक्षणमिदं वैषम्यं साम्य-
मन्तरेण न संभवति, यदि हि स्वाभावतः कश्चिद् गुणोऽधिकपरिमाणः स्यात्सर्वे-

ष्वेव कार्येषु सोऽधिक एवोपलभ्येत, न चैतदेवमालोक्यते, क्वचित्कस्यचिदपरत्र चान्यस्याधिक्यदर्शनात् । तस्मान्नूनं समाना अप्येते गुणा उद्भवानुद्भवाभ्यामभिभावकत्वमभिभाव्यत्वं वोपयान्तीत्येव युक्तं वचः । ततश्चोद्भवानुदभवयोः कार्यावस्थतया तत्कारणीभूता साम्यावस्थाप्येषां कदाचिदवश्यमङ्गीकार्या, सैषा प्रलयकालिकी साम्यावस्थैवैषां प्रकृतिरिति प्रधानमिति मूलकारणमित्यव्यक्तमिति च व्यपदिश्यते सांख्यनयज्ञैः । अवस्थायाश्चावस्थितानतिरेकाद् गुणा अप्येते प्रकृतिशब्देनैवाभिधीयन्त इति निरूपिता प्रकृतिः । तस्या एतस्याः सर्गकाले प्रथमः संक्षोभाद् गुणवैषम्यनिमित्तः परिणामः एव महत्तत्वमिति बुद्धिरिति चाख्यातः । तस्य च परिणामोऽहङ्कार इत्याद्युपपादनीयमुपरिष्टात् । तयाऽनया प्रकृत्या पुरुषस्यानादिरस्ति संयोग इति तत्परिणामेन बुद्धयाप्यसौ संयुनक्ति, तद्गतांश्च सुखदुःखादीननुभवतीव । ननु च भोः परस्परापेक्षया हि संयोगः सर्वेषां दृष्टचरः, यथा पङ्गोर्गतिसाधनापेक्षायामन्धस्य च दर्शनसाधनापेक्षायां-भवत्यनयोरन्योन्यं संयोगः कार्यकारी, का तु कथा प्रकृतिपुरुषयोः परस्परमपेक्षेति चेत् सत्यम् । दृश्या हि (भोग्या) प्रकृतिर्द्रष्टार (भोक्तार) मन्तरेण न दृश्यतामियर्तीति द्रष्टारं पुरुषमपेक्षते, तया चानुविद्धः पुरुषोऽपि तद्गतेन दुःखेन दुःखित्वमात्मनोऽभिमन्यमानः कैवल्यं प्रार्थयँस्तत्त्वसाक्षात्काराय तज्जन्यबुद्धिवृत्तीरपेक्षत इति परस्परापेक्षया संयोग एतयोरुपपन्नतरः । तथा च संयुक्तयोरनयोरन्योन्यस्मिन्नन्योन्यधर्माः प्रतिसंक्राम्यन्ति, (प्रतिबिम्बन्ते) सत्वप्राधान्येन सुप्रसन्नायां (स्वच्छायां) बुद्धौ चित्ते प्रतिबिम्बनादादर्श इव तेजःप्रतिबिम्बेन प्रकाशमाने (चेतनेव) बुद्धिवृत्तिरूपलक्ष्यते, स्वच्छतमे च पुरुषे बुद्धिवृत्तिगतानां कर्तृत्वसुखदुःखादीनां प्रतिबिम्बनादयसीव वह्निसंयुक्तदग्धृता स्फटिक इव कुसुमसंयुक्ते लौहित्यम्, सूर्य इव च विविधादर्शगते तद्रूपानुकारिताद पुरुषेऽपि सुखित्वं दुःखित्वं कर्तृता चेत्यादयो धर्माः अभिमन्यन्ते । तेनैवाभिमानेन

प्रसक्तमात्मनि दुःखं जिहासुरयं पुरुषोऽनवरतं 'दुखं मा भुञ्जीथ' इति प्रार्थयमानोऽनुभूयते, न त्वियं दुःखनिवृत्तिरस्य प्रकृतिविवेकमन्तरा संभवति, प्रकृतेर्दुःखस्वभावायास्ततो वियोजयितुमशक्यत्वादिति सुसूक्ष्ममालोच्यम् । ननु कृतविवेकसाक्षात्कारः पुरुषो मुक्तोऽपि पुनः प्रकृत्या कुतो न बद्धयेत, उभयोरपि व्यापकत्वेनाभिमतयोः प्रकृतिपुरुषयोः संयोगस्य कथमपि वारयितुमशक्यत्वात् । यदि हि संयोगोऽनयोर्वारितः स्यात् विभुत्वमेवोभयोर्व्याहन्येत, सर्वसंयोगिताया एव विभुत्वेनोच्यमानत्वात्, सति च संयोगे तस्यैव दुःखकारणत्वेनाभिमतत्त्वाद्दुर्निवारो मुक्तपुरुषेऽपि दुःख भोग इति चेन्नैतत् सारम् । यतो हि न संयोगमात्रस्य पुरुषे दुःखप्रतिबिम्बहेतुतां वयं वदामः, स्वबुद्धिभावेन परितयैव प्रकृत्या यः संयोगविशेषः स एवत्वस्मन्नये दुःखहेतुः । अयमेव संयोगविशेषो जन्मेत्यप्याख्यातः । अस्य च हेतुरविवेक इति दृष्टविवेके मुक्ते पुरुषे न प्रसङ्गो दुःखस्य । अथ कोऽयमविवेको नाम यः प्रकृतिपुरुषयोः संयोगहेतुतयाभिमन्यते, यदि प्रकृतिपुरुषयोरभेदज्ञानमविवेकः तदास्य संयोगोत्तरं जायमानस्य संयोगहेतुता नोपपत्तिमियर्ति, अभेदभ्रान्त्यर्थमेव हि संयोगोऽभिमन्यत इति संयोगात् प्राक् कुतस्त्येयमभेदभ्रान्तिः । यदि तु विवेकपदाभिधेयस्य (प्रकृतिपुरुषयोः) भेदज्ञानस्याभाव एवाविवेकस्तदा संयोगाख्यस्य भावस्याभावहेतुकत्वमाचक्षाणः कथं नोपेक्षणीयः, अपि च विवेकस्य प्रागभाव एव हि गृह्येत, उत्पन्नस्य विवेकस्य ध्वंसानभ्युपगमात्, प्रगभावश्चैष कार्याणामुपादानेष्वेव विश्राम्यतीति यत्र विवेकाख्या वृत्तिरूद्भवित्री तत्रान्तःकरण एव स प्रागभावः स्यात् । तथा च तस्य पुरुषधर्मत्वाभावेन मुक्तामुक्तपुरुषयोर्विशेषकत्वाभावादमुक्त इव मुक्तेऽपि पुरुषे बुद्धिसंयोगो दुर्निवारः । न च बुद्धिगतस्यैवाविवेकस्य संयोगहेतुतया समुत्पन्नविवेका बुद्धिरेव पुरुषेण न संयुनक्तीति साम्प्रतं वक्तुम्, पुरुषसंयोगमन्तरा जडायास्तस्या ज्ञान-

पूर्वकं प्रवृत्त्यनुपपत्तेः प्रवृत्तिस्वाभाव्यात्प्रवर्तमाना मुक्तामुक्तसाधारण्येनैव तावत् प्रवर्तेतेति, सर्वपुरुषसाधारणं च प्रलये प्रधानमिति तमोविवेकवत्तया विवेको दुर्वच एव । तस्मात्सर्वथा दुरुपपाद एष प्रकृतिसंयोगाद्दुःखयोग इति चेत्सर्वमिदमनवबोधविजृम्भितम् । 'अगृहीतासंसर्गकमुभय (प्रकृतिपुरुष) ज्ञानमेवास्माकमविवेकपदार्थः, स च पूर्वपूर्वो वासना (बीज) रूपेणावस्थित उत्तरोत्तरसंयोगहेतुतामुपयातीति बीजरूपादविवेकात्संयोगः संयोगाच्च पुनः स्थूलोऽविवेक इत्यनादौ संसारे नानवस्था। अयं यद्यपि बीजरूपोऽपि बुद्धिधर्म एवाभ्युपगन्तव्यः, कूटस्थनित्ये पुरुषे वासनाया असम्भवात, तथापि खलु विषयतारूपपुरुषेणाप्यस्य संबन्धः शक्य एवाभिधातुम् । इत्थं च यत्पुरुषविषयकाविवेकवासना यत्पुरुषबुद्धाववस्थिता तमेव सैव बुद्धिरनुबध्नाति इति न कोऽप्यतिप्रसङ्गः। बुद्धौ स्वीयतानियामकन्तु स्वेनोपभुक्ता याः सुखदुःखादिवृत्तयस्तद्वासनावत्वमेव, योहि पुरुषो यद्बुद्धेः सुखादिवृत्तीरुपभुङ्क्ते—प्रतिबिम्बग्रहणेनात्मसात्करोति—सैव तस्य पुरुषस्य बुद्धिरित्यभिधीयते । अथास्मिन्नसाधारण उपभोग एव को हेतुरिति चेत्स्वमेव । पूर्वपूर्वोपभुक्तवासनाबलात् स्वत्वम्, स्वत्वं चोत्तरोत्तरं वृत्तिभोगे नियामकमित्यनादित्वाद् बीजाङ्कुरवदेव नानवस्था । तस्मात्तत्पुरुस्याविवेकवती बुद्धिस्तेन संयुक्ता सती तमेव सुख दुःखादिवृत्तीरूपभोजयतीत्यभ्युपगमान्मुक्तस्य च बुद्धेरविवेकवत्ताभावान्न मुक्तस्य बन्धापत्तिः शक्या समुद्भावयितुम् । तदयमत्र निष्कृष्टोऽर्थः—त्रिगुणात्मिकया प्रकृत्यानादिरस्य पुरुषस्यात्मनः संयोगः—इति प्रकृतिपरिणामेन पूर्ववासनावता बुद्ध्यपरपर्यायेण महत्तत्त्वेनाप्यसौ संयुज्यते, तत्संयुक्तश्चैष महान् स्वच्छतया प्रतिफलितचैतन्यश्चेतनवद् व्यवसितो बाह्यं विषयसंनिधानेन्द्रियव्यापारादि यथायथं निमित्तमपेक्ष्य ज्ञानेच्छासुखदुःखादिरूपैः परिणमते—तदेतदुक्तं श्रुतौ—कामः संकल्पो ।

विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरिति एतत्सर्वं मन एवेति ।' मनो ह्यत्र बुद्धिमेवोपलक्षयति, करणत्वेनाभिमतस्येन्द्रियस्य मनसः तथाविधपरिणामसंभवादित्यास्तां तावत् । एत एव चास्य परिणामा बुद्धिवृत्तय अभिधीयन्ते—उपलक्षणं चैतत्—नैयायिकाद्यभिमतानामात्मगुणानामनुभवसिद्धानां बुद्धिवृत्तित्वेनान्तर्भावौचित्यात् । धर्माधर्मसंस्कारास्तु यद्यपि न वृत्तिरूपाः, अथापि बुद्धिप्रवृत्तिजन्याबुद्धयाश्रिता एवेति निर्विवादम् । ता एता बुद्धिवृत्तीस्तया सहाविविक्तोऽहमेवेदमित्यभिमन्यमानः पुरुष उपभुंक्ते, उपभोगश्चाविवेकादात्मनि तदभिमानः प्रतिबिम्बरूप एव तदुक्तं श्रुतिस्मृतिभ्याम्—तीर्णो हि तदा भवति हृदयस्य शोकान्, कामादिकं मन एव मन्यमानः सन्नुभौ लोकावनुसंचरति, ध्यायतीव लेलायतीव स यदत्र किञ्चित्पश्यत्यनन्वागस्तेन भवति ।

आत्मेन्द्रियमनो युक्तं भोक्तेत्याहुर्मनीषिणः'
'पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान् गुणान्'
'तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः ।
इमास्ताःप्रतिबिम्बन्ति सरसीव तटद्रुमाः' इति ।

'अहङ्कार विमूढात्मा कर्ताहमिति मन्यते' इति च । ननु च भोश्चेतनोऽहमेतत्करोमि, विजानाम्युपभुञ्जे चेत्याद्यनुभवस्य चैतन्यकृत्युपभोगादीनां सामानाधिकरण्यावगाहितया कृतिरचेतनायां बुद्धावुपभोगस्तु चेतने पुरुष इत्यनुभवविरुद्धमन्याय्यं च, दृश्यते हि लोके—य एव करोति स एव तत्फलमुपभुङ्क्ते इति—इह त्वन्यः करोत्यन्य उपभुङ्क्ते इति सर्वथैतदसमञ्जसं पश्यन्ति भवन्त इति चेन्नाहमसमञ्जसं पश्यामि । कृतेः कूटस्थे पुरुषेऽसंभवस्योपपादितत्वेन दृढतरतर्कबाधितोऽयमहं करोमीति प्रत्ययस्ता वदहं गौर इह गृहे तिष्ठामि इत्यादिवदेवाप्रामाणिकः प्रकृतिनिष्ठकर्तृतायास्तत्संयोगात् पुरुषेऽध्यस्ततयैवोपपाद्यः, बुद्धेर्वा प्राप्तचिदध्यासाया अहंप्रत्ययगोचरत्वं व्याख्येयम्

गत्यन्तरविरहात्, यत्र च कृति (प्रवृत्ति) स्तत्रैव बुद्धौ विषयाकारस्य सुखदुःख-रूपस्य च परिणामस्या (वृत्तेः) ङ्गीकरणात्कृतिफलयोरपि सामानाधिकरण्य-मेवास्माकम् । प्रतिबिम्बरूपेण पुरुषस्य सुखदुःखाद्युपभोगस्त्वकर्तुरपि मिथ्याज्ञान-मूलक एवेत्यावेदितमसकृदधस्तात् । न च मिथ्याज्ञानहेतुकान्यपि वस्तूनि वस्तु-स्वभावमनुवर्तन्ते नाम, न हि शुक्तिरजतमपि भवेदाकरजम्, न च रज्जुभुजङ्गोऽपि विषविशिष्टः । तस्मात् पुरुषे सुखदुःखाद्युपभोगस्य मिथ्याज्ञानहेतुकस्य वस्तु स्वभावाननुवर्तनेऽपि न क्षतिः । यथा च सुखदुःखादि, तथा कृतिरपि पुरुषेऽध्यस्ता एव लौकिकैरिति ततोऽपि न दोषः । वास्तविकं तु (परिणामरूपम्) सुखदुःखादि बुद्धौ कृति समानाधिकरणमेवेति तत्र नैव काचिदनुपपत्ति-शङ्कापि । दृश्यते च योधकृतयोरपि जयपराजययोः कृषीवलकृतस्यापि चान्नस्य भूपतिनोपभोग इति कृतिफलयोः सर्वथा सामानाधिकरण्यमप्यसिद्धमेवे-त्यालोचयन्तु सुधियः । ननु च भोः, यदि कृतिं सुखदुःखादिकमध्यस्तं चापि बुद्धा-वभ्युपगच्छसि तर्हि कृतं ते तावदजागलस्तनायमानेन पुरुषेण, वास्तविकमेव चैतन्यं बुद्धावभ्युपगम्य किमिति तमेवात्मानं नाभ्युपैषि ? तथाच नाममात्र एवायं विवाद इति चेत्तदेतद् बहुभ्रान्तं भवद्भिः । बुद्ध्यतिरिक्तस्य पुरुषस्य बहुधानुमानसद्-भावात् । तथा हि—सर्वेऽपि बुद्ध्यादयस्त्रैगुण्यमनुवर्तमानाः संहत्यकारिणः पदार्था एव भवितुमर्हन्ति, संघातरूपेणार्थक्रियाकारिणां शयनासनाभ्यङ्गगृहादिपदार्थानां परार्थतया एव लोके सिद्धत्वात् । न च बुद्धेः संहतत्वं संहत्यकारित्वं वाऽसिद्धम्—सुखदुःखमोहात्मकानां तत्परिणामानामनुभवप्रसिद्धत्वात्—संघातरूपतो-पपत्तेः । संहत्यकारिणी चैषा, स्वस्य वृत्युदये बाह्यपदार्थाद्यपेक्षणात् । इतर-साहित्येनार्थक्रियाकारितैव संहत्यकारित्वम् । तथैव प्रकृतिरपि सुखदुःखमोहा-त्मिका संहता संहत्यकारिणी च । पुरुषस्तु न संहतः, न वा संहत्यकारी, त्रैगुण्य-

विरहात्, प्रकाशरूपायां स्वार्थक्रियायामन्यस्यानपेक्षणाच्च । ततश्च संहतानां बुद्ध्यादीनां परार्थत्वसंसिद्धौ यदर्था एते—सोऽयं भोक्ता पुरुषः सुप्रसिद्धः । न च शयनासनादयः संहतशरीराद्यर्था एव दृष्टा इति तद् दृष्टान्तेन परार्था बुद्ध्यादयः संहतमेव परं गमयेयुरिति साम्प्रतं वक्तुम्, संहतत्वसामानाधिकरण्येन पारार्थ्यसिद्धौ पुरुषस्यापि संहतत्त्वे सोऽपि परार्थ इत्यनवस्थाप्रसक्तेः । न च दृष्टान्तदृष्टाः सर्वेऽपि धर्माः साध्यसिद्धावपेक्ष्यन्ते तर्ककुशलैः । तस्मात् त्रैगुण्यविरहितोऽसंहत एव पुमान् । किंच अचेतना रथादयो भोक्तृभिश्चेतनैरधिष्ठिता एव, प्रवर्तमाना दृष्टास्तथात्राप्यचेतनानां बुद्ध्यादीनां प्रवृत्तावधिष्ठात्रा केनचन चेतनेन भवितव्यम्, इति योऽयमधिष्ठाता स एवास्माकं पुरुष इति सिद्धः पुरुषः । न चागुणक्रियस्य तस्य प्रवर्तकत्वमनुपपन्नम्—संयोगमात्रादेव प्रवर्तकत्वाभ्युपगमात् । तथैव खलु सर्वोऽप्ययं बुद्ध्यादिमहाभूतान्तः प्रपञ्चः सुखदुःखमोहात्मकतया भोग्य एवेति भोक्तारमपेक्षते नाम ।

न हि भोक्तारमन्तरेण भोग्यतासंभविनी, भोग्यता च सुखादीनां प्रत्यात्मम-नुभवसिद्धा जगत्प्रसिद्धा च । न च भोग्यस्यैव भोक्तृता संभवति, स्वात्मनि वृत्ति-विरोधात् । कथं हि स्वयमेव स्वमुपभुञ्ज्यात् । ननु च भोः कर्मकर्तृविरोधात् स्वात्मनि वृत्तिविरोधेऽपि अन्यस्त्रिगुणो भोग्यः, त्रिगुण एव चान्य उपभोक्तास्तु, पुरुषस्य तु भोक्तृताभ्युपगमे भवदभ्युपगतमेव कौटस्थ्यं नितान्तं व्याहन्येत—पूर्वम-सतो भोगस्याभिनवस्य पुरुषसमवायित्वेनोत्पत्तौ कौटस्थ्यव्याघातात्—धर्मान्तरो-त्पत्तिरेव हि कौटस्थ्यबाधिका भवद्भिरेवोक्तेति चेन्नैतदेवं संभवति । त्रिगुणस्यैव भोक्तृत्वे सोऽपि त्रैगुण्यसामान्यादन्येन भोग्यः सोऽपि चान्येनेत्यनवस्थेयं दुरवस्था प्रसज्येत । तस्माद् त्रिगुणः पुरुष एव भोक्तृत्वेनास्थेयः । तस्य च भोगो न सुखादिपरिणामः, अपितु प्रतिबिम्बरूपमभिमानमात्रमिति न ततः कौटस्थ्यहा-

निरित्युपपादितमधस्तात्। स चायमभिमानरूप उपभोगोऽप्यन्ततः पुरुषस्य स्वरूपमेव, अर्थोपरक्तवृत्तिप्रतिबिम्बावच्छिन्नस्य स्वरूपचैतन्यस्यैव भोगत्वाभ्युपगमादिति नात्र धर्मान्तिरोपजननशङ्कापि। न च प्रतिबिम्बप्रयोजकं प्रकृतिसंयोगमात्रमलं कौटस्थ्यं विहन्तुम्। पारिणामिकधर्मान्तिरोत्पत्तावेव कौटस्थ्यव्याघाताभ्युपगमात्। ततश्च भोक्तृत्वेन पुरुषानुमानेऽस्मिन् न कोऽपि दोषलेशः। सर्वाणि च लोकशास्त्राणि प्रायेण मुक्तिमेव परमं पुरुषार्थमभिमन्यमानानि पुरुषसिद्धौ न विप्रतिपन्नानि, न हि सुखदुःखमोहात्मकस्य महतो दुःखविनिर्मुक्तिः संभवति, स्वभावस्यानपायित्वात्, न चासंभवद्वस्तु प्रेक्षावत्प्रतिपित्सागोचरं भवति, प्रवर्तन्ते तु सर्वेऽपि प्रेक्षावन्तो मुक्तिमभिलष्यन्तः। तस्मादपि यस्य मुक्तिरेषामभिमता स एष त्रिगुणविरहितः पुरुषोऽवश्यमभ्युपगन्तव्यः। अन्यसम्बन्धनिमित्तकस्य दुःखादेः स्फटिकलौहित्यस्येवापगमयितुं शक्यत्वादिति दिक्। तदित्थं पुरुषस्य बुद्ध्यादिभिन्नत्वं प्रसाधितम्, त्रिगुणविरहितत्वं च तैरेव हेतुभिस्तत्र तत्र व्याख्यातम्। त्रिगुणविरहितत्वादेव तु निर्गुणत्वमकर्तृत्वं चेत्युक्तप्रायम्, गुणानामेव प्रवृत्तिस्वाभाव्याच्चितस्तदनुपपत्तेः। बुद्धिवृत्तिप्रकाशकत्वाच्चास्य द्रष्टृत्वं साक्षित्वं चानुसन्धेयमेव, अयं च ज्ञान (प्रकाश) रूप एव न ज्ञानविशिष्ट इति पुरस्तादेवोक्तम्। सोऽयमेवंविधोऽप्यविद्यापरपर्यायादविवेकाद् बुद्धिसंयुक्तस्तद्विशिष्टमेवात्मानमहमिति प्रत्ययन्ति, तत एव च बुद्धौ चैतन्यमात्मनि ज्ञानसुखाद्याश्रयत्वं कर्तृत्वादि च तेषां भासते, उपभुञ्जान इव च बुद्धिधर्मान् सुखदुःखादीनिति सर्वमेतदुपपत्या श्रुतिस्मृतिभ्यां च विवृतमेव यथायथम्। अयमेव तु बुद्धिविशिष्ट आत्मन्यहं प्रत्ययः अस्मितेत्यहङ्कार इति चाख्यातः, इत एव विषयेषु रागद्वेषौ शरीरेऽभिनिवेशश्चेत्यादयो दोषाः प्रवर्तन्ते, तैरेतैः शुभाशुभयोः कर्मणोः प्रवृत्तिरुदेति, ततश्च संचितधर्माधर्मस्य लिङ्गस्योच्चावचं जन्म, तत एव च पुरुषे प्रतिबिम्बरूपः सुखदुःखा-

दियोग इति नैरन्तर्येण वर्तमानमिदं द्रष्टव्यमाविवेकख्यातेः। अत एव तु रूपविरहितस्य पुरुषस्य महतो वा कथमन्यत्र प्रतिबिम्ब इत्याद्यनर्गलमापादयन्तो निरस्ताः। अन्यधर्मस्यान्यत्राभिमानमात्रात्प्रतिबिम्बसादृश्यात्प्रतिबिम्बव्यवहारस्यात्र प्रवर्तमानत्वात्। यथा हि प्रतिबिम्बस्थलेऽन्यस्य बिम्बस्य धर्मा अन्यत्रावभासन्ते—तथैवात्रापि बुद्धिगताः सुखदुःखादयः पुरुषेऽवभासन्ते इति सामान्यादेवात्र प्रतिबिम्बव्यवहारः, यथा चान्यत्रान्यधर्मावभासः संयोगकृतस्तथा व्याख्यातमेव सर्वमिति कृतं बहुना प्रपञ्चेन।

अथ यया बुद्ध्या संयुक्तस्यास्य पुरुषस्य विविधधर्मयोग उपपन्नः सेयं प्रकृतिपरिणतिस्त्रिगुणात्मिका बुद्धिरनेकधेह व्याख्यायते। तत्र सक्षेपतस्तावदष्टरूपत्वमस्या व्यवहरन्ति। तेष्वष्टरूपेषु धर्मः, ज्ञानम्, वैराग्यम्, ऐश्वर्यमिति चत्वारीमानि बुद्धिगतसत्वांशाधिक्यात्सात्विकानीत्याख्यायन्ते, तद्विपरीतानि अधर्मः, अज्ञानम्, अवैराग्यम्, अनैश्वर्यमिति चत्वारि तु तमोंशाधिक्यात्तामसानीति व्यवहृतानि, रजोंशस्तु प्रवर्तकत्वादुभयविधानामप्येषां निर्वर्तकः, तदन्तरा प्रवृत्तेरेवानुदये कस्यापि परिणामस्यात्मलाभासंभवात्। तत्र धर्मः श्रुतिविहितयागयोगाद्यनुष्ठानजन्योऽभ्युदयस्य परम्परया निःश्रेयसस्य च यथायथं हेतुः। ज्ञानं प्रकृतिपुरुषविवेकख्यातिर्निश्रेयसस्य साक्षाद्धेतुभूतम्। रागादिकषायविरहो वैराग्यम् अणिमादिप्रादुर्भावश्चैश्वर्यम्। वैराग्यैश्वर्ययोरवान्तरास्तु भेदास्तत्त्वकौमुद्यादितोऽवगन्तव्याः। तामसानि रूपाणि वैपरीत्येनाख्येयानि—निषिद्धकर्मानुष्ठानजन्योऽधर्मः, प्रकृतिपुरुषयोरैक्यदर्शनमज्ञानम्, विषयाभिलाषो रागः, अणिमादिवैपरीत्येन सर्वथा पारतन्त्र्यं चानैश्वर्यमिति। अष्टस्वेषु ज्ञानवर्जं सप्तापि बुद्धिधर्माः संसारकारणत्वात् पुरुषस्य बन्धका इत्याख्यायन्ते, योगस्यापि ज्ञानमनु-

त्पादयत ऐश्वर्याद्यर्थत्वेन बन्धकत्वात् । ज्ञानमेवत्वेकं मुक्तिहेतुरिति विवेचनीयमेव यथावसरम् ।

अथ प्रकारान्तरेण प्रत्ययापरपर्यायाबुद्धिरियं चतुर्विधा व्याख्याता । विपर्ययः, अशक्तिः, तुष्टिः, सिद्धिरितिभेदात् । एत एव च सत्वादिगुणानामुद्भवाभिभवतारतम्यात्पञ्चाशद्विधत्वमुपयान्ति । प्रागुक्ता अप्यष्टौ भेदा एष्वेवान्तर्भवन्ति चेति ॥ तत्रायमाद्यो विपर्ययः समासतः पञ्चधा विभज्य व्याख्यातः—अविद्याऽस्मिता रागद्वेषाभिनिवेशभेदात् । एत एव क्रमेण तमः, मोहः, महामोहः, तामिस्रः, अन्धतामिस्रः—इति संज्ञान्तरेभ्योऽप्याख्यायन्ते । तत्र तावदनात्मन्यात्मबुद्धिरविद्या ॥ सा च विषयभेदादष्टधा विभक्ता, अव्यक्तमहदहंकारपञ्चतन्मात्रेष्वष्टस्वनात्मसु लौकिकादीनामात्मबुद्ध्युदयात् । बुद्ध्यादिना दृश्येन द्रष्टुः पुरुषस्यैक्यावगाहिन्यहंबुद्धिरस्मितेत्याख्याता, तस्या अपि पूर्वोक्तैरष्टविषयैरष्टविधत्वमुपपन्नमेव । प्रकृतिविशिष्ट आत्मन्यहंप्रत्ययः महदहङ्कारादिविष्टे चेति स्वरूपभेदात् । केचित्तु देवादीनामष्टविधेऽणिमाद्यैश्वर्ये शाश्वतिकमिदमस्मदीयमित्याद्यभिमान एवाष्टविधास्मितेति व्याचख्युः, रागो विषयाभिष्वङ्गः, स च विषयाणां शब्दादीनां पञ्चानां दिव्यादिव्यभेदेनदशत्वमुपगतानां भेदात् तत्र तत्र प्रवर्तमानो दशविध एव व्यवहृतः । दशानामेषां विषयाणामष्टविधस्याणिमाद्यैश्वर्यस्य च विघाते सत्युपजायमानो अष्टादशविधो द्वेषस्तामिस्रापरपर्यायः । अत्रापि केचन शब्दादिविषयाणां पूर्वोक्ताविद्यास्मितयोरष्टविषयाणां च विघातादष्टादशत्वमुपकल्पयन्ति । विषयेष्वाग्रहोऽभिनिवेशः, तद्विनाशभीतिरिति यावत् । सोऽयमपि पूर्वोक्तविषयैश्वर्यविषयकत्वादष्टादशविध एव समुन्नेयः । मतान्तरं च पूर्ववदेवात्राप्यनुसन्धेयमिति सोऽयं समासतः पञ्चविधो व्यासतश्च द्विषष्टिविधो विपर्यय

आख्यातः । अथ स्वव्यापारानुकूलशक्तिवैकल्यमशक्तिः, द्विविधश्च बुद्धेर्व्यापारः इन्द्रियव्यापारानुविधायी स्वतन्त्रश्च । तत्रेन्द्रियाणामेकादशत्वाद्बाधिर्यकुष्ठितादितद्वैकल्यवशाद्बुद्धेरपि तज्जन्यज्ञानोपघात एकादशविधाऽशक्तिः स्वतन्त्रबुद्धिव्यापारात्मिकानां वक्ष्यमाणानां तुष्टिसिद्धीनां सप्तदशानां व्याघातश्च सप्तदशविधाऽशक्तिरिति संभूयाशक्तेरष्टाविंशतिभेदाः ।

अनन्तरोद्दिष्टतुष्टिर्नवविधा, चतस्र आध्यात्मिकाः, पञ्चबाह्याश्चेति भेदात् । कश्चिद्धि पुरुषः प्रकृतिपुरुषभेदं प्रतिपन्नोऽपि प्रकृतिपरिणामविशेष एव कृत विवेकसाक्षात्कारः, प्रकृतिरेव यथाकाले तमपि संपादयति, नात्र पुरुषेण किमपि चेष्टितुं साम्प्रतम्, इत्याद्यसदुपदेशतुष्टो विवेकसाक्षात्कारसाधने निदिध्यासनादौ न प्रयतते । सेयं तस्य तुष्टिः प्रकृतिरित्यम्भ इति चाख्याता । कश्चित्तु नैवमेवप्रकृतिविवेकं साक्षात्कारयति, सर्वेषामपि तत्प्रसङ्गात्, तस्मात् प्रव्रजितो ध्यानाद्यनुष्ठानादुदास्ते तस्य सा तुष्टिरुपादानमिति सलिलमिति च परिभाष्यते, यस्तु कालपरिपाकात्सर्वं संपद्यत इत्याद्युपदिष्टः कालमेव प्रतीक्षमाणो न किञ्चिदनुतिष्ठति सा तस्य तुष्टिः काल इति ओघ इति च व्यपदिष्टा । एवं भाग्यमेव शरणीकृत्य यस्य विवेकख्यातिसाधनेषु समुपेक्षा, तस्य सा तुष्टिर्भाग्यशब्देन वृष्टिशब्देन च व्यवहृतेति । ता इमाश्चतस्र आध्यात्मिकास्तुष्टय इत्याख्याताः । पक्षेऽस्मिन् तुष्टयोऽपि सिद्धिप्रतिबन्धिका इत्यायातम् । तदेतदसहमानास्तुष्टीनां सिद्ध्यानुकूल्यं व्याचक्षाणाः केचन न निदिध्यासनादावुदासीनत्वं तुष्टिरपितु कृतविवेकसाक्षात्कारस्यात्मभावनाद्यः परितोषः स एव प्रकृतितुष्टिः, ततः प्रव्रज्योपादानादुपादानतुष्टिः, ततो बहुकालं समाध्यनुष्ठानेन कालाख्या तुष्टिस्ततश्च प्रतानपरमकाष्ठारूपे धर्ममेघसमाधौ भाग्यादन्यातुष्टिरिति साधिका इमास्तुष्टय

एकस्यैव पुरुषस्येति व्यवस्थापयन्ति । अन्यथा तुष्टीनां सिद्धिवैपरीत्ये तदभावस्येष्टत्वेन तुष्ट्यभावस्यापि नवविधस्याशक्तिषु परिगणनं पूर्वत्र नोपपद्येतेति । बलाबलमत्र [सुधीभिरेव विवेच्यम् । बाह्यास्तु पञ्चतुष्टयः शब्दादिषु विषयेषु–अर्जन-रक्षण-क्षय-भोग-हिंसेति दोषपञ्चकदर्शनात्तद्विनिवृत्तेः समुत्पद्यन्ते । तत्रार्जने सेवादिदुःखं विभाव्य विषयोपरमात्पारमित्याख्या तुष्टिः, रक्षणस्य च दुष्करत्वात्तत्र दुःखं विभाव्य विषयोपरमोऽस्तुपारम्, रक्षितस्यापि भोगादिना परिक्षयाद्दुःखं भावयतो निवृत्तस्यापारापारमिति । सत्यपि च भोगे भूयो भूयः प्रवर्धते कामः, अप्राप्तौ च दुःखाकरोति स इति भावनया व्युपरमादनुत्तमारम्भ इति, न च भूतहिंसामन्तरेण विषयसंपत्तिरिति विभाव्य तुष्टिरुत्तमाम्भ इति । ता इमा नव तुष्टयः ।

अथाष्टविधा सिद्धिरुच्यते । तत्राध्यात्मिकाधिभौतिकाधिदैविकभेदभिन्नस्य त्रिविधस्य दुःखस्य विघातात् त्रिविधेयं मुख्या सिद्धिः । ताश्च प्रमोद-मुदित-मोदमाना-इत्यप्याख्याताः । अन्यास्तु पञ्चतदुपायभूता गौण्यःसिद्धयः, ताश्च अध्ययनम्, तारतारम्, रम्यकः, सदामुदितमिति च परिभाष्यन्ते । तत्र विधिवद् गुरुमुखादध्यात्मविद्याशब्दमात्रग्रहणमध्ययनम् । तदर्थविज्ञानं शब्दः, आगमाविरोधिनीभिरूपपत्तिभिस्तत्परीक्षणमूहः, परीक्षणोपयुक्तवादायापेक्ष्यमाणां ब्रह्मचारिप्रभृतीनामुपलम्भः सुहृत्प्राप्ति–आदर–नैरन्तर्य–दीर्घकालसेवनात् सवासनसंशयविपर्ययादिपरिकरेण विवेकज्ञानस्य परिशुद्धिर्दानम्, दैप्-शोधने इति धातोः । अत्रापि केचिदुपायभूता पञ्चसिद्धीरन्यथा व्याचक्षते । प्राग्जन्माभ्यासवशादुपदेशादिकं विनैव तत्तस्य स्वयमूहनमूहाख्यासिद्धिः । अन्यदीयपाठमाकर्ण्य स्वयं वा शास्त्राण्यलोच्योपजाता सिद्धिः शब्दः,

शिष्टाचार्यभावेनाध्यात्मिकशास्त्राधिगमनमध्ययनम्, स्वयमुपदेशार्थं गृहागतात्सुहृदो ज्ञानलाभः सुहृत्प्राप्तिः । धनादिदानेन परितोषितात् ज्ञानलाभो दानमिति । तत्रापि पूर्वकल्पे पञ्चानां सामानाधिकरण्यमुत्तरत्र तु वैयधिकरण्यमेवावकल्पते इत्यालोचनीयं सुधीभिः । अत्र केचन सिद्धिप्रतिकूला विपर्ययाशक्तिसिद्धयो हेया इत्याकलयन्ति, परे तुष्टीनां सिद्धात्रानुकूल्यात्तासां हेयत्त्वमनिच्छन्तो द्वयस्यैव हेयतां ब्रुवत इति कृतं बहुना प्रपञ्चेन । अस्मात्किल बुद्धिपरिणतिविवरणान्नैयायिकादिभिरात्मधर्मत्वेनाभिमन्यमानाः सर्वेऽप्येते बुद्धिधर्माः, बुद्धिस्तु प्रकृतिपरिणतिरात्मनो भिन्नापि तत्संयुक्ता तप्तेनायःपिण्डेनाग्निरिवाभिन्नावभासत इति पुरुषेऽप्यभेदात्तद्धर्माणामभिमानः, अभिमानोऽपि त्वयं बुद्धिवृत्तिविशेषः, विवेकसाक्षात्कारश्चापि तथैव । पुरुषस्तु केवलं बुद्धिवृत्तीनां प्रकाशकः, स्वयं सर्वथा निर्लिप्त एव, बुद्धिविशिष्टे तस्मिन्नहंबुद्धिरेव प्रतिबिम्बरूपेण सुखदुःखादिकं तत्रावभासयतीति सुस्पष्टमिदं सर्वं संसिद्धम् । तदेवमुपदर्शितः संक्षेपतः पुरुषः । उपदर्शितं तस्य संसारेऽपवर्गे च बुद्धेरेव सर्वथा प्रभुत्त्वम् । आकारस्त्वस्यात्मनो विभुः पूर्वदर्शने प्रसिद्ध एवेहाप्यभिप्रेतः, अणुत्वे भागीरथीसलिलावगाहनादौ देहव्यापिनः सुखादेः प्रकाशानुपपत्तेः, मध्यमपरिमाणे चानित्यतापत्तेः, परिशिष्टस्य विभुत्वस्यैव न्याय्यत्वात् । विभुत्वेऽपि च पुरुषस्य यथा न सुखदुःखादिसंकरस्तथाव्यवस्थापितमेव तार्किकैः । स्वीयबुद्धेरेव सुखादीनां पुरुषे प्रतिबिम्ब इत्यस्माभिरपि तथैव वक्तुं शक्यत्वात्, स्वीयत्वं तु बुद्धेरुक्तपूर्वमेवेति । गुणास्त्वात्मनो नैव सम्भाव्यन्ते, बुद्धिधर्माणामेवात्मनिप्रतिबिम्बितानां तद्गुणत्वं व्यवह्रियते, प्रतिबिम्बश्चाप्येषु पुरुषस्य स्वस्वरूपानतिरिच्य इति व्याख्यातमेवैतत्सर्वम् । अनन्ताश्च परस्परविभिन्नाः पुरुषाः, एकत्वे जन्ममरणादिव्यवस्थानुपपत्तेः, यद्यपि जन्म नात्मन उत्पत्तिः, मरणं च

न विनाशः, तस्य नित्यत्वात्–अथापि त्वपूर्वैर्देहेन्द्रियादिभिः संबन्ध एव जन्म, पूर्णवियोग एव च मरणमित्याख्यायते । सर्वात्मनामेकत्वे त्वेकस्मिन् संयुक्ते सर्वेऽपि संयुक्ताः, वियुक्ते च वियुक्ताः, इति युगपत्सर्वेषां जन्ममरणे स्याताम् । न च कश्चित् सुखी, परो दुःखी, कश्चित् धार्मिकः, परस्त्वधार्मिक इत्यादि व्यवस्थापि लोकसिद्धोपपद्येत । वामदेवादयो मुक्ताः, अस्मदादयस्त्वमुक्ताः संसारिण इति तु व्यवस्थेयं सर्वथैव दत्तजलाञ्जलिः स्यात्, एकस्मिन्नेव पुरुषे कृतविवेकसाक्षात्कारे बन्धस्योपपादयितुमशक्यत्वादिति बहुत्वमेव न्याय्यम् । ईश्वराख्यस्तु कश्चित्सकलसंसारिपुरुषभिन्नो नित्यमुक्तः प्रकृतिप्रवर्तको नेहाभिमतः, मुक्तामुक्तादिविकल्पासहत्वादिति आकरग्रन्थेभ्योऽवसेयम् ।

तदित्थं सांख्यमतमनुसृत्य संक्षेपेणात्मतत्त्वं व्याख्यातम् ।

अथात्मतत्त्वे वेदान्तदर्शनम्

तदेवमुपदर्शितः कापिलं मतमनुसृत्यात्मविषयः । द्वैपायनीयं शारीरकं दर्शनमनुसृत्याथ विविच्यते । तच्चेदं दर्शनं यद्यप्यनेकप्रस्थानम्, बहूनामौपासनिकादीनामत्र बहुविधव्याख्यानदर्शनात्, अथापि शाङ्करमद्वैतमतमेवावलम्ब्य प्रथममात्मतत्त्वं विवेचयामहे । यत्तावदात्मनो निर्गुणत्वमकर्तृत्वं चिन्मात्ररूपत्वं चेत्यादि सांख्यैरुपदर्शितम्–तदेतद्युक्तमनुमन्यामहे । प्रकृतेरात्मनोऽत्यन्तं भिन्नाया महदादिसृष्टौ स्वतन्त्राया आत्मबन्धनसाधनीभूतायाः सद्भावमात्मनामनेकत्वं चेत्यादि तु तैः प्रतिपादितं न मृष्यामः । श्रुतिविरोधादुपपत्तिविरहाच्च ।

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' 'सर्वं खल्विदं ब्रह्म' 'नेह नानास्ति किञ्चन' 'तत्त्वमसि श्वेतकेतो' इत्याद्या हि भगवतीश्रुतिः सर्वथात्मैकत्वं प्रतिपादयति, न त्वात्मनां पारस्परिकं भेदम्, प्रकृतेर्वा ततो भेदमनुमन्तुमियं कथमप्युत्सहते । निरपेक्षं च भगवत्याः श्रुतेः स्वविषये प्रामाण्यं न शक्यं प्रमाणान्तरैः कथमप्युपमर्दयितुम् । यथा चैतदेव सुनिश्चलं श्रुतीनां सर्वासां तात्पर्यं तथा प्रदर्शितमन्यत्र ग्रन्थान्तरे । या चेयं प्रकृतिरात्मनो भिन्ना जगत्सृष्टौ स्वतन्त्राभिमन्यते तस्या जडायाः प्रतिनियतजगत्कारणत्वं सर्वथोपपत्तिविरुद्धम् । न हि चेतनेनाप्रेरितो जडः क्वापि स्वतो व्याप्रियमाणो दृष्टः, व्यापृतोऽपि वा कथंचिन्नैव प्रतिनियतावयवविन्यासमुपभोगयोग्यं सर्वथा समुचितमाध्यात्मिकं शरीरादिबाह्यं च भुवनादि निर्मातुमीष्टे, जडत्वादेवेति । न च सर्वथोदासीनश्चेतनः पुरुषस्तत्प्रेरको भवितुमर्हति, उदासीनत्वादेव । न चायस्कान्तादिवत्सन्निधिमात्रेण तस्य प्रवर्तकत्वमुपपद्यते, सन्निधिनित्यत्वेन प्रवृत्तेरपि नित्यत्वप्रसक्तावभ्युपगतप्रलयानुपपत्तेः । किंच साम्येनावस्थितानां सत्वादिगुणानां वैषम्ये महदाद्युत्पादकत्वे न हेतुमुत्पश्यामः, वैषम्ये कारणाभावात् । अन्यतमस्यो-

द्भावयितुरन्यतमस्य चाभिभावयितुः पदार्थान्तरस्याभावात् । स्वतश्च तथात्वे सततमेव वैषम्यप्रसङ्गात् । अथ जडस्यापि प्रधानस्य कथंचित्प्रवृत्त्यभ्युपगमेऽपि जडस्य प्रयोजनानुसन्धानासंभवात्स्वभावेनैव तेषामपि पुनर्बन्धापत्तिरभ्युपगमविरुद्धा प्रसज्जेत । न च यस्य पुरुषस्य विवेकेनोत्पन्नस्तं प्रत्येव प्रवृत्तिस्यादिति संभवति व्यवस्था, जडस्य तथानुसन्धाने उपपत्तिविरहात् । पुरुषस्तु न प्रवर्तक इति न तत्कृता व्यवस्था । येऽपि च पातञ्जला ईश्वरस्य निमित्तभूतस्य प्रवर्तकत्वमास्थिषत, तेषां स ईश्वरो जैनसांख्यादिभिरेव बहुधोपपत्तिभिः खण्डित इति कृतं तन्निराकरणायासेन । तथैव पुरुषबहुत्वमपीदं नोपपत्तिं सहते । बहवो हि पुरुषा व्यापकाः सांख्यैरुपगम्यन्ते, स्वसंबद्धान्तःकरणसंबन्धिसुखदुःखभोगश्च प्रतिबिम्बरूपेण तत्राभिमन्यते, तथा च सर्वेषामपि पुरुषाणां सर्वान्तःकरणसंयोगित्वाविशेषादेकस्मिन् सुखिनि दुःखिनि वा सर्वेऽपि सुखिनो दुःखिनश्च स्युः । नच स्वकीयान्तःकरणसम्बन्धिन एव सुखदुःखादिरुपभोगः, स्वकीयत्वं च स्वभुक्तवृत्तिवासनावत्त्वं व्याख्यातपूर्वम्, अदृष्टं च स्वीयतानियामकमिति संभवति व्यवस्थेति भ्रमितव्यम्, पूर्वमपि प्रतिनियतान्तःकरणवृत्तिभोगे नियामकानुपलब्धेः, सर्वदाप्यनुपपद्यमानस्यानादित्वसमाधेरन्धपरम्परान्यायपतितत्वात् । अदृष्टस्य च बुद्धिवृत्तित्वेन पुरुषसमवायित्वाभावात् कुतः स्वीयतानियामकत्वं सम्भवेदपि । किञ्चान्यदेकमेव प्रधानं प्रलये सांख्यैरुपगम्यते, तथा च तत्रैवैकस्मिन् सर्वा अपि वासना लीनाः स्युरिति कुतः स्वभुक्तवृत्तिवासनावत्त्वमपि स्वीयतानियामकं भवेत्, प्रत्युत प्रधानस्य सकलपुरुषसाधारण्यमिव तज्जन्यानामन्तःकरणानामपि साधारण्यमेव स्यादिति सर्वेषु पुरुषेषु सर्वान्तःकरणवृत्त्युपभोगः सर्वथा दुर्निवारः । किं च नैकप्रदेशसन्निविष्टानामेकलक्षणकानां पदार्थानां भेदे किंचिन्निदर्शनमनुपश्याम इति सर्वत्र समानप्रदेशेष्वास्थितानां विभूनां प्रकाशसाधर्म्यविशिष्टानां पुरुषाणामुपकल्पितो

भेदः सर्वथा अप्रामाणिक एव । न च समानदेशानामपि रूपरसादीनां भिन्नत्ववदेषां भिन्नत्वं शक्यमास्थातुम्, तेषां लक्षणभेदेन भेदादिह च लक्षणभेदाभावात् । न च रूपरसादयोऽपि परस्परं सर्वथा भिन्नाः, धर्म्यंशेनाभेदादिति व्याख्येयमन्यत्र । तस्मात्सजातीयविजातीयस्वगतसकलभेदशून्यं नित्यशुद्धबुद्धमुक्तस्वभावं सच्चिदानन्दरूपं सर्वज्ञं सर्वशक्ति निर्गुणं निष्क्रियं ब्रह्मैवैकं तत्त्वम्, श्रुतिषु तथाभूतस्यैव ब्रह्मण उक्तत्वात्तदेव चात्मपदवाच्यम् । अयमात्मा ब्रह्मेत्यादिश्रुतिशत प्रामाण्यात् । सच्चिदानन्दरूपता ह्यात्मनोऽस्य स्वानुभवसिद्धा न केनापि शक्यापलपितुम्, तथाहि सद्रूपत्वं तावदात्मनः सर्वबाधसाक्षिभूतस्य स्वतोऽबाध्यमानत्वात् । विषयाः खल्विमे स्वाप्निका जागरे जागरीयाश्चापि परस्परमेकेनान्ये, सति विनाशे, सुषुप्तौ च सर्वेऽपि बाध्यमाना अनुभूयन्ते । नास्त्यत्र रथो गजो मया दृष्टः, नेदं रजतम् शुक्तिरियम्, अनुत्पन्नो घटः निवृत्तो घटः, नास्ति घट इत्यादि बाधानामविकल्पमनुप्रसरणात् । स्वस्वरूपं तु न कदापि केनापि क्वचिदपि बाध्यमानमनुभूयते, नाहमस्मीति प्रतीतेः सर्वथानुदयात् । न चासाक्षिको बाधः सम्भवति, बाधोऽपि खलु केनाप्यनुभूयतैव अननुभूयमानस्य तस्याप्रथनात्, येन त्वनुभूयते बाधः, यश्च सर्वबाधसाक्षी स एवायमस्माकमात्मेति सद्रूपत्वमस्य निर्विवादम् । न चात्मतत्त्वे शून्यवादिभिन्नः कश्चिद्विवदते । इत्थमबाधिता स्वयं प्रकाशमानतैवास्य सत्तेति व्याख्यातम्, न तु सत्तायोगादयं सत्, निर्धर्मकत्वात् स्वयं सत्तारूपत्वाच्चेत्यन्यत्रविस्तरः, तथैव चिद्रूपताप्यात्मनः, सकलपदार्थविभासकत्वात् । तच्चेदमुपाधिसम्बन्धात्सर्वजगदुपादानत्वमीश्वरत्वं जीवत्वं चेत्यादिधर्मान् प्रतिपद्यमानं द्रष्टव्यम्, न तु स्वतः, निर्धर्मकत्वात् । उपाधिविषयमात्मनोऽस्मान् भेदेनाभेदेन वा न शक्यत एकान्ततो निर्वक्तुम्, भेदे सांख्यमतोक्तदूषणगणप्रङ्गात्, अभेदे चोपाधितया एवासंभवात् । तथैव किल नेयमेकान्ततोऽनित्या भवितुमर्हति

अनित्यत्व आदावुत्पादकाभावप्रसङ्गात् । न च नित्यैव, मुक्त्यनुपपत्तेः, अवान्तरैः स्वरूपैरुत्पादविनाशशालित्वाच्च । न च भेदाभेदौ नित्यत्वानित्यत्व चैकत्र साम्प्रतम् । तथा चास्यामनिर्वचनीयवाद एवैकः शरणम्, उक्तं चैतत्—

न सती सा नासती सा नोभयात्मा विरोधतः ।
अतो विलक्षणा काचित् मिथ्याभूता सनातनी । इति

अद्वैतविरोधात् न सती, निर्विकारस्य ब्रह्मणः स्रष्टृत्वोपपत्तिविरोधाच्च नासती, परस्पर व्याघातलक्षणविरोधाच्च नोभयात्मेति त्रिभ्योऽप्येतेभ्यः सत्वासत्वोभयात्मकत्वलक्षणेभ्यो विलक्षणा—अनिर्वचनीया मिथ्याभूतापि—अनादित्वेन सनातनी मायास्तीति तदर्थः । इदमत्राकूतम्, एकमेव द्रव्यन्तावदालोचयतु भवान्, देवदत्तस्य नाम कस्यचिद् व्यक्तिविशेषस्य या इमाः कौमारयौवनवार्धक्याद्या अवस्था अनुभूयन्ते ताः सत्यो वा भवेयुरसत्यो वा, आद्ये देवदत्ताद् भिन्ना वा, स्युरभिन्ना वा । न तावद् भिन्नाः, देवदत्ताद् व्यतिरिच्याप्यवश्यमुपलभ्येते एव । न चैता अवस्था अवस्थावतो भिन्नत्वेनोपलब्धा इति न भिन्नत्वेन शक्या निर्वक्तुम् । नाप्यभिन्नाः, देवदत्तत्वस्यानुवृत्तावप्यवस्थानामननुवर्तनात् । अस्ति हि बाल्ये यौवने वार्द्धक्ये च देवदत्त इति प्रत्यभिज्ञा, न तु यौवने बाल्ये वार्धक्ये वा यौवनं प्रत्यभिज्ञायत इत्यभेदोऽपि न युज्यते वक्तुम् । भेदाभेदाभ्यामन्यविधासंभवाच्च सत्वमपि नैव निरुच्यावस्थितम् । अथ चेदसत्वमेवाभिमन्येत—अनुभूयमानानामवस्थानां तत्तद्धपलापोऽयमेकान्ततोऽसमञ्जसः प्रसज्जेत । निर्विकारिता च तदभावे देवदत्तस्य स्यादिति संसारानुपपत्तिः । ततश्चावस्था इमाः सत्वासत्वाभ्यां भेदाभेदाभ्यां वा अनिर्वाच्या इत्येवायातम् । न चावस्थाविशिष्ट एक एव देवदत्तोऽस्तु—इत्यवस्थानां पृथङ् निर्वचनमेवासांप्रतमिति शक्यमभिधातुम्, एका-

वस्थाविनिवृत्तौ विशिष्टस्य विनाशे देवदत्तस्यापि प्रत्यभिज्ञानुपपत्तेः, क्षणिकवादप्रवेशप्रसंगाच्च । तस्मात्सर्वकालावस्थितः सत्वेन निरुच्यमानो देवदत्त एव सत्यं तत्त्वम्—अवस्थास्तु तदीयाः प्रागुत्पतेः परस्ताच्च विनश्यदसत्यः सत्वानुभवकाऽपि व्यतिरिच्यानुपलब्धा इति मायाकृता मिथ्याभूता इत्येवोचितमभ्युपगन्तुम् । मायिकत्वादेव च तत्रैन्द्रजालिकादिमायास्विवानिर्वचनीयत्वं न दोषाय । इत्थं च यदा मायिकेष्वपि पदार्थेषु नास्ति तत्वादिनिरुक्तेः प्रसरस्तदा कैव कथा तस्याः सर्वथा वाचामगोचरीभूतायाः सर्वस्यास्य कारणीभूताया भगवत्या मायाया इति विभावयन्तु सुसूक्ष्मं सुधियः । ननु च भोस्तथापि यथाभिरवस्थाभिर्देवदत्तो विक्रियते, तथा माययाऽपि ब्रह्म विक्रियेतेति निर्विकारश्रुतिविरोधापत्तिर्दुष्परिहरेति चेद् भूयोऽपि भ्राम्यन्ति भवन्तः । यदा तावदवस्थानां मिथ्याभूतत्वं मायिकत्वं चोपपत्तेः संसिद्धम्, तदा सर्वथाऽनिर्वाच्याभिस्ताभिः कोऽयं द्रव्यस्य विकारो नाम । नन्वनुभूतिसिद्धो विकार इति चेदामृशतु भवान्-बाल्यं यौवनं वार्द्धक्यमित्येतानि तावदवस्थाया एव रूपाणि, आसां चावस्थानां परिवर्तनमेव विकारशब्देनाभिदधति भवन्तः । यत्वाभिरवस्थाभिरुपहितं द्रव्यमासामाश्रयत्वेनानुभवसिद्धं वस्तु, न तस्मिन् कोऽपि विकारः कथमप्यनुभवसिद्धः । अवस्थाविशिष्टमेव तु द्रव्यं वयं वस्तुत्वेन व्यवहराम इति जायतेऽस्माकमवस्थापरिवृत्तौ विप्रतिपत्तिः । यद्वच-वस्थोपहितं द्रव्यमवस्थाभिन्नं तत्र विकारे नास्ति किमपि मानम् । तस्माद् बालोऽयं वृद्धोऽयमिति वाचारम्भणमात्रमेते विकाराः, देवदत्तरूपं त्वविकृतमेव त्रैकाल्येऽपि वस्तु । तथैव किल घटोऽयम् शरावोऽयम्, पिण्डोऽयमिति मृदि वाचारम्भणमेतेऽवस्थाभेदनिबन्धना विकाराः, मृद्रूपं त्वविकृतमेव त्रैकाल्येऽपि वस्तु । कटकोऽयम्, स्वस्तिकोऽयम्, कुण्डलमिदमिति सुवर्णे वाचारम्भणमात्रम् मायाकृताः सर्वेऽपि विकाराः, परमार्थतस्तु सर्वथाविकारशून्यं त्रैकाल्येऽपि ब्रह्म । इत्थं च यथैन्द्र-

जालिकः स्वकृतया मायया न मनागपि विक्रियते–यथा वा स्वाप्निकेन प्रपञ्चेन जीवोऽयं न कथमपि विक्रियते तथैव मायया स्वीयया नैव विक्रियते ब्रह्मेति किं चित्रम् । एतेन वेदान्तेषु सर्वजगदुपानत्वेन प्रतिश्रुतस्य ब्रह्मणो निर्विकारत्वं नैवोपपद्यत इत्याद्यनर्गलमापादयन्तो निरस्ताः । घटाद्युपादानानां मृदादीनामपि विकारस्य वाचारम्भणमात्रताया एवोपपादितत्वात् । अनुभूयते हि नाम्नि रूपेषु च विकारः, नाम च रूपं चेदं मायिकमित्युपगच्छामः, तत्त्वान्यत्वादिना निरुक्तेस्तत्रा-प्रसरणात् । यत्तु चिदानन्दलक्षणं ब्रह्मणो रूपं तदिदं सर्वकार्येष्वविकृतमेव, सर्ववस्तुस्वप्रतिहतमस्तीति भातीति–आनन्दयतीति च प्रतीतेः प्रसरणात् । मायाविशिष्टमेव च ब्रह्म जगदुपादानं प्रतिश्रृण्वन्ति वेदान्तानि, न तु शुद्धं ब्रह्म कस्याप्युपादानं भवितुमर्हति । उपादेयानामवस्थानां मायिकत्वात् । इहात्म-त्रयस्य प्रकृतत्वादित्यलम्, तदित्थं दिङ्मात्रेण निरूपितेयमुपाधिः, अस्या एव सांख्योक्तसत्वरजस्तमोरूपगुणत्रयवैशिष्टयमनुसन्धेयम् । न तु तदभ्युपगता स्वतन्त्रा प्रकृतिरिह काचिदाश्रीयत इति । तयानया विशिष्टं ब्रह्मेश्वरत्व-जीवत्वादिव्यहृती संसृतौ प्रतिपद्यते, शुद्धसत्वप्रधान मायोपाधिक ईश्वरः, मलिनसत्वप्रधानाविद्योपाधिकस्तु जीव इति । तत्र सर्वजगत्कारणीभूतेयमी-श्वरोपाधिर्माया व्याख्यातप्रायैव पुरः । तदंशभूता जीवोपाधिरज्ञानापरप-र्यायाऽविद्या तु त्रिगुणात्मिका ज्ञानविरोधिनी भावरूपैव, न तु ज्ञानाभावमात्रम्, अभावमात्रस्याहंकारादिकारणत्वानुपपत्तेः । अथास्यां भावरूपायामविद्यायां किं मानमिति चेद्, 'अज्ञोहम्, मामन्यं च न जानामि, त्वदुक्तमर्थं न जानामि', इत्याद्यनुभव एव तत्रमानमिति गृहाण । तथाहि–घटः सन्, पटः सन्नित्याद्यनुगतप्रत्ययान्यथानुपपत्त्या सत्ता नाम सामान्यं नैयायिकादि-भिरुपगम्यते, तथैव च निर्विशेषमज्ञानविषयेऽनुगता एवैते पूर्वोक्ताः प्रत्यया न

कंचिदनुगतं विषयमन्तरेणोपपन्ना भवितुमर्हन्ति । न च ज्ञानाभाव एवैषां विषयोऽ-स्त्विति शक्यतेभ्युपगन्तुम् । स किल ज्ञानसामान्याभावो वा भवेद्, ज्ञान विशेषा-भावो वा । न तावदाद्यः, आत्मनि ज्ञानसामान्याभावस्य वक्तुमशक्यत्वात्, 'न जानामी' ति ज्ञानकालेऽपि च ज्ञानसामान्याभावोक्तेर्व्यवहितत्वात् । नापि द्वितीयः ज्ञानविशेषाणां भिन्नतया तदभावस्य सर्वत्रानुगतत्वानुपपत्तेः । किं चाहमेतन्न जानामि, मां न जानामीत्याद्यनुभवेऽभावप्रतियोगिनो ज्ञानमस्ति न वा, अस्ति चेत्कथं ज्ञानाभावः प्रसरमाप्नुयात् । नास्ति चेत्प्रतियोगिज्ञानविरहितमभावज्ञानं कथमुदयमासादयेत् ? अभावज्ञाने प्रतियोगिज्ञानकारणत्वस्य सर्वैरभ्युपेतत्वात् । तस्मान्नैतेषु प्रत्ययेषु ज्ञानाभावमात्रस्य विषयत्वेन कथमपि निर्वाहः, ततश्च ज्ञानविरोधिज्ञाननिर्वर्त्यं भावरूपमज्ञानमेवैतेषु प्रत्ययेष्वनुवृत्तमित्यकामेनाप्यभ्युप-गन्तव्यम् । तदिदमीदृशमज्ञानमेव जीवस्योपाधेरिति कृतं बहुना विस्तरेण । ननु च भोः, किमाश्रितेयमविद्या स्यात्, ब्रह्माश्रितेति चेद् ब्रह्मण्यप्यज्ञानं कल्पयत अहो मतिवैभवम् । अथ तु जीवाश्रिता तदा तावदन्योन्याश्रयोऽयं दुरुद्धरः । अविद्योपाधिपरिकल्पित एव जीवः, जीवाश्रिता त्वविद्येति । मैवं वोचः । द्विविधस्तावदन्योन्याश्रयः, तत्किमत्रोत्पत्त्यन्योन्याश्रय आपाद्यते, उत ज्ञप्त्यन्यो-न्याश्रयः । न तावदाद्यः, जीवाविद्ययोरुभयोरप्यनादितयोत्पत्तेरेवाभावात् नापि द्वितीयः, अविद्याया उपाधितया तज्ज्ञप्तेर्जीवापे-क्षत्वेऽपि जीवस्य स्वतः प्रकाशत्वेन ज्ञप्तौ परानपेक्षणात् । तस्मादन्योन्याश्रय-पदार्थपरिज्ञानमूलक एवायमाक्षेपः । अनादित्वात्संसारस्य जीवाविद्ययोः सम्बन्धोऽप्ययमनादिरिति जीवाश्रितत्वेऽविद्यायाः क्षतिविरहात् । ब्रह्माणि तु नेयमविद्याऽश्रयतासम्बन्धेन, अपितु विषयतासम्बन्धेन । ब्रह्मविषयकाज्ञानस्यैव जीवानर्थोत्पादकत्वाभ्युपगमादिति भाव्यमेतत् । अथ तथापि किलोपाधिसम्ब-

न्धमात्रेण कथं निर्विकारस्य जीवस्य विकृतिरभ्युपगम्यताम्, को वा विकृतिमन्तरा जीवेऽनार्थसम्बन्ध इष्यतामिति चेत्सत्यम्, नास्त्येवोपहिते कूटस्थे कोऽप्यनर्थसम्बन्धः, उपाधिविशिष्ट एव त्वात्मनि मिथ्याज्ञानजन्येनाहं प्रत्ययोदयेन सर्वानर्थपरिप्रापणात्। इदमेव तावदविद्याया अविद्यात्वम्, यदियं किल स्वस्वरूपमप्यात्मन्यन्तर्भावयतीव। तदाविष्टश्चायमात्मा तद्विशिष्टमेव स्वस्वरूपमाकलयति। उपाधिश्चेयं विकृतिस्वभावेति तदभिन्नं स्वस्वरूपमभिमन्यमानोऽयं जीवोऽपि सुखदुःखादि विकारानवश्यमात्मन एवाभ्युपैति। सोऽयं मिथ्याज्ञानमूलक एव जीवस्यानर्थसम्बन्धः, मिथ्याज्ञानापनयमात्रापनेयश्चेति सर्वं समञ्जसम्। तथा च मायोपाध्यवच्छिन्नं चैतन्यमीश्वरः, अविद्योपाध्यवच्छिन्नं तु चैतन्यं जीवः, इति सोपाधिकस्यैवेश्वरत्वजीवत्वादिकं द्रष्टव्यम्। अपरे तु मतेऽस्मिन्नुपाधिमात्र एव विकारोदयादात्मनो विकारो नानुपपन्न एवेत्यत्राप्यपरितुष्यन्तः प्रतिबिम्बवादमास्थिषत। तथाहि यथा तावन्निर्विकारो निरवयवश्चाप्येक आकाश उपाधिसम्बन्धाच्चातुर्विध्यं प्रतिपद्यते, घटोपाध्यवछिन्नः घटाकाशः, घटाकाशावस्थितजलप्रतिबिम्बितं चान्यज्जलाकाशम् अथ च भुवनोपाध्यवच्छिन्नमिदं महाकाशम्, मेघस्थजलप्रतिविम्बिताकाशं त्वभ्राकाशमिति। तथैव किलेयं निर्विकारापि परमात्मभूता चिच्चातुर्विध्यमुपाधिसम्बन्धात्प्रतिपन्ना द्रष्टव्या। तत्र तावदविद्यावच्छिन्नं चैतन्यमुच्यते कूटस्थपदेन कूटवन्निर्विकारत्वात्। सत्वप्राधान्येन स्वच्छतयाऽविद्यायां प्रतिबिम्बितं तु चैतन्यमुच्यते जीवपदेन, तस्यैव प्राणधारणादिक्रियाक्षमत्वात्। अथ तथैवेदं मायोपाध्यवच्छिन्नं चैतन्यमुच्यते ब्रह्मपदेन, स्वकार्यभूतेषु सर्वपदार्थेषु व्यापनात्। मायाप्रतिबिम्बितन्तु चैतन्यं व्यवह्रियत ईश्वरपदेन, तत्रैव सर्वजगन्नियमनादि व्यापारोपपत्तेः। तथा च

यथैव तावन्मुख्यस्याकाशस्य क्रियाविरहितत्वेऽपि प्रतिबिम्बित आकाशे आश्रानुविधायिन्यः संभवन्त्येव सर्वा अपि क्रियाः, तथैव किल निर्विकारस्यापि ब्रह्मण उपाधिप्रतिबिम्बितस्योपाध्यनुविधायिन्य ईशन-प्राणधारणादिक्रिया आनीयन्ते व्यवहारपथम्। बिम्बस्याविकृतत्वेऽपि च प्रतिबिम्बस्य कम्पनच्छेदादिविकारदर्शनात्प्रतिबिम्बभूतस्य जीवस्य विक्रियायामभ्युपगम्यमानायां नास्ति कापि क्षतिर्नाम। ननु भो निर्गुणाया नीरूपाया अपि चितेः कथं प्रतिबिम्बमुपकल्पयसि? बिम्बाभावविशिष्ट एव च प्रदेशे प्रतिबिम्बो दृष्ट इति कथं व्यापकस्य ब्रह्मणः प्रतिबिम्ब उपपद्यताम्। किं चायं प्रतिबिम्बो विम्बात् भिद्यते न वा। आद्ये चिदभिन्नस्य तस्य चैतन्यापत्तिः, जीवब्रह्माभेदसिद्धान्तभङ्गापत्तिश्च। यदि तु न भिद्यते तर्हि बिम्बे विकारासम्बन्धे तदभिन्ने प्रतिबिम्बे कथं तत्सम्बन्धोऽभ्युपगम्यताम्। ततश्च कुशकाशावलम्बनमेवायं प्रतिबिम्बवाद इति चेदहो भ्रान्तिः। लौकिकेऽपि प्रतिबिम्बे सर्वेषामेवैषामाक्षेपाणां तुल्ययोगक्षेमत्वात्। दृश्यते हि नीरूपस्यापि रूपस्यादर्शादौ प्रतिबिम्बः, आकाशस्य च नीरूपस्य व्यापकस्यापि च स्वसत्ताप्रदेश एव जलादौ प्रतिबिम्बः। लौकिकेऽपि प्रतिबिम्बे नैव भेदाभेदौ निरुच्यावस्थापयितुं सुशकाविति कैव कथाऽत्र भेदाभेदनिर्वचनस्य। यदा हि किलाश्रयीभूता मायैवेयं तत्त्वान्यत्वाभ्यामनिर्वाच्या, तदा प्रतिबिम्बस्य तत्त्वान्यत्वाभ्यां निर्वचनप्रयासोऽयं गगनमुष्टिहननायैव इति विजानन्तु विज्ञाः। न खलु वयं प्रतिबिम्बवादमुपाधिवादं वा कमपि निरुच्यावस्थापयितुं बद्धपरिकराः, अनिर्वाच्यमपि त्वेतद् व्यवहार एवमेव भवतीत्येतावत् प्रदर्शनीयमस्माकम्, तत एव फलतः प्रसिद्धयत्यनिर्वचनीयवाद इति कृतं बहुना विस्तरेण। बहुशश्चोपपत्तिभिर्दृष्टान्तैश्च समर्थिता इम उपाधिसम्बन्धभेदाः प्रतिबिम्बादिवादाश्च पञ्चदश्यामिति संक्षेपेणैव समुपदर्श्य विरमामः। तदित्थ-

मुपाधिसम्बन्धमात्रेण मिथ्याप्रतीतो निर्गुण आत्मनि सुखदुःखादिसंसारसम्बन्धः, परेशनत्वरूपेश्वरत्वादिसम्बन्धश्च देवदत्तस्येव पुत्रपौत्रादिसम्बन्धितया विवक्षितस्य पितृत्वपितामहत्वादिसम्बन्धः । पुत्रपौत्रादिसम्बन्धित्वेनाविवक्षायान्तु नैव देवदत्तस्य पितृत्वादि, तथैव किलोपाधिविनिर्मोके नैवात्मन ईश्वरत्वं जीवत्वं वा, निर्धर्मकत्वान्निष्क्रियत्वाच्चेति दिङ्मात्रेणोपदर्शितम् ।

तत्र समष्टिरियमीश्वरोपाधिः, व्यष्टिस्तु जीवोपाधिरिति । समष्टयुपहितं चैतन्यमीश्वरः, व्यष्टयुपहितन्तु जीव इति यावत् । तथाचेश्वरजीवयोरपि वनवृक्षावच्छिन्नाकाशयोर्जलाशयजलगतप्रतिबिम्बाकाशयोरिव च वास्तविकोऽभेद एव, व्यावहारिकस्तु भेदोऽपीति सर्वं समञ्जसम् । केचित्तु व्यष्टिसमष्टयोर्नास्ति स्तोकोऽपि भेदः, विचार्यमाणस्य वृक्षवनभेदस्य सर्वथा विलयनात् । ततश्च समष्टयुपहितस्येश्वरत्वे व्यष्टयुपहितस्य च जीवत्वे व्यावहारिकोऽपि भेदोऽनयोर्न सिध्येत् । न चैतदिष्टम्, पारमार्थिकमेव किल जीवेश्वरादिभेदमपनिनीषन्ति वेदान्ता न तु व्यावहारिकमपि । व्यावहारिकेत्वीश्वराभावेऽभ्युपगते सर्वथैव श्रुतिस्मृतिपुराणादीनि दत्तजलाञ्जलीनि संपद्येरन्, न च नास्तिकशास्त्रेभ्यः स्तोकोऽपि विशेषोऽस्य शास्त्रस्योपपद्येत । तस्मादस्मदादिसर्वजीवोपाधिभूताज्ञानादिशरीराणामीश्वरज्ञानविषयत्वमात्रात्समष्टेरीश्वरोपाधित्वं पूर्वकल्प आख्यातम्, वस्तुतस्तु सर्वजीवगताज्ञानविषयतैवेश्वरस्योपाधिः । तदेतत्पूर्वमेवोक्तम् 'ईश्वरे त्वविद्याविषयतासम्बन्धेन नत्वाश्रयतासम्बन्धेनेति' सैव तु विषयताऽस्यकारणशरीरम्, सकलप्रपञ्चकारणीभूतत्वात्, सूक्ष्मशरीरन्तु व्यापकमीश्वरस्य, स्थूलशरीरमपि चतुर्मुखाद्याकारत्वेन वर्ण्यमानमनुसन्धेयमिति दिगेषा । तत्र कारणशरीरावच्छिन्न ईश्वरः सर्वज्ञः, जीवस्तु प्राज्ञः, सूक्ष्मशरीरावच्छिन्न ईश्वरः

हिरण्यगर्भः, जीवस्तु तैजसः, सर्वत्रानुस्यूतत्वात्, तेजोमयान्तःकरणप्रधानत्वात् । तथैव स्थूलशरीवच्छिन्न ईश्वरो विराड् वैश्वानरः, विविधं राजमानत्वात्, जीवस्तु विश्व इत्युक्तः । तत्र देहत्रयस्याप्यभिमाने व्यपदिश्यतेऽस्यात्मनो जाग्रदवस्था, तदानीं हि स्थूलदेह उपरतेषु च वाह्यविषयेष्विन्द्रियेषु यदायं मनसैव वासनामयान् विषयानुपभुङ्क्ते तदा सूक्ष्मशरीराभिमानिनोऽस्योच्यते स्वप्नावस्था, तदानीं ह्यसन्तोऽपि मायामात्रकृता विषयाः वासनयाऽस्यानुभासन्ते । मिथ्यात्वेऽपि तु तेषां विषयाणां तत्तच्छास्त्रोक्तशुभाशुभादिसूचकत्वमविरुद्धम्, तेषां ज्ञानस्य सत्यत्वात्, अत एव तु ज्ञानमात्रसाध्या भयकम्पहर्षधातुविसर्गादयो जागरेऽप्यनुवर्तमाना अनुभूयन्त एव । यथा च मिथ्याभूतविषयोपहितविज्ञानस्यापि तत्र तत्र कारणत्वमविरुद्धम्–तथैतद्दर्शनीयमन्यत्रेति कृतमिहाप्रकृतानुसरणेन । अथ स्थूलसूक्ष्मोभयविधशरीरभूतकोशचतुष्टयोपरमे केवलंसर्वकारणीभूताविद्यारूपेण सकलकार्यावस्थितौ बाह्यविषयज्ञानसामान्याभावस्य सुषुप्त्यवस्था व्यवह्रियते । तदानीं हि जीवोऽयमुपाध्यसंसृष्टः पर एव ब्रह्मणि लीयते । केवल मुपाधिकृतएव हि जीवब्रह्मणोर्भेद इति व्यवस्थापितमधस्तात् । तथा चोपाधिविनिर्मोके कोऽयं भेदो भवतु जीवब्रह्मणोः ।

उपाधिस्तु तदानीं व्युपरत इत्यनुभवसिद्धोऽयमर्थो नैव निर्बन्धमपेक्षते नाम । ननु सर्वोपाधिव्युपरमे प्राणनक्रियापि नानुवर्ततेति चेत्सत्यम्, ज्ञानशक्तिप्रधानस्यैव किलान्तःकरणस्य तदानीमात्यन्तिकमुपरमं ब्रूमहे । या तु तस्येयमपरा क्रियाशक्तिः सैषानुवर्तत एवाशरीरपातम् । न हि तदानीमुपाधिर्नाम विनष्ट इत्याचक्ष्महे अविद्यारूपायास्तस्या विद्यामन्तरेण विनाशस्य सर्वथानुपपद्यमानत्वात । आत्मा त्वयं तदानीमुपाधिसंपर्काभिमानशून्यो निरञ्जनः स्वरूपप्रतिष्ठ इत्येव तावद्वक्त-

व्यम् । अथात्मनोऽसङ्गतादशायां जड़े प्राणे स्वत इयं क्रिया नोपपद्येत, चेतनप्रेरितस्यैव जडस्यप्रवृत्तिदर्शनादिति चेन्मैवम्, पूर्वारब्धेनैव प्रयत्नेन चक्रभ्रमिवदासुषुप्ति प्राणनक्रियोपपत्तेः । अथायमुपाधिविनिर्मुक्तः परे ब्रह्मणि लीन आत्मा केन पुनः संसृज्येत ? आप्नुवन् वापि संसर्गं स एव स्वकीयेनोपाधिना संसृजतीति दुर्विवेच्यम्। यथा हि जलाशये निमग्नस्य जलबिन्दोस्तस्यैव पुनरुन्मज्जननियमो दुःशकस्तथैव किल परे ब्रह्मणि लीनस्य जीवस्य तस्यैव पुनरुपाधिसंपर्कनियमो नैव शक्य इति चेत्तदेतदबोधजृम्भितम् । अविद्याबीजसद्भावेनैव प्रलयादिव सुषुप्तितोऽपि पुनरुत्थानापरपर्यायस्योपाधिसंबन्धस्याभ्युपगमेऽनुपपत्तिविरहात् । तदैव खल्वयमुपाधिना पुनर्न संसृज्येत-यदाविद्याबीजमस्य समूलमुन्मूलितं स्यात्, न चैतत्तत्त्वज्ञानादृते सम्भवति । विद्यमानं तु तदविद्याबीजं पुनरप्येनं बलात्प्रवर्तयत्येव संसृतिव्यवहृतौ । सैव चेयमविद्यात्मीयत्वेनाभिमतेष्वेव शरीरादिषु पुनरेनं प्रवर्तयतीति तस्यैव पुनरुत्थानमपि नानुपपन्नम् । किं च सजातीयविजातीयस्वगतसकलभेदशून्ये ब्रह्मणि स एवायमुत्तिष्ठतेऽन्यो वेति तत्त्वान्यत्वकथैव ननु कथमाप्नुयात्प्रसारम् ? न हि जीवो नाम ततोत्यन्तं भिन्नस्तत्र प्रलीन इति सोऽयमुत्तिष्ठेत न वेति संशयः प्रसरेत, परब्रह्मण एव तूपाधिसंबन्धमात्रकृतो जीवभावः, न च तच्चान्यच्चेति बहुभेदभिन्नं ब्रह्म । तस्मान्नास्ति तत्र तत्त्वान्यत्वादिशङ्कावसरः कोऽपि । जलाशयदृष्टन्तोऽपि नैवात्रोपपद्यते, जलाशये स्वगतभेदस्य सत्वात्, ब्रह्मणश्च निरस्तसमस्तभेदस्य सर्वथैक्यादिति भाव्यतां सूसुक्ष्मम् ।

न खलु बुद्ध्यादय इमे सततमनुभूयमानाः स्वयं प्रकाशा भवितुमर्हन्ति परिणम्यमानतया चिद्विरुद्धत्वात् । ततश्चात्मनैव प्रकाशरूपेणैतेऽपि प्रकाशन्त इति कथं तदभावेऽपि प्रकाशेरन् । यस्त्वेषां सर्वेषामनुभवितात्मा तस्य नास्त्यन्योऽनुभवितेति केन सोऽनुभूयताम् स्वात्मनि क्रियाविरोधेन कर्तृत्वकर्मत्वयोरेकत्रासंभवात् । न तु तावता तदभाव एव । स्वाभावस्य सर्वथा दुर्वचत्वादित्यस्त्येभ्योऽन्य आत्मा ।

अस्यात्मन आनन्दमय कोशोऽयं कारणशरीरमिति व्यपदिश्यते । विज्ञानमयमनोमय–प्राणमयास्तु त्रयः कोशाः सूक्ष्मशरीरमिति अन्नमयश्च कोशः स्थूलशरीरमिति व्यवहृतो द्रष्टव्यः । तत्रापि च सूक्ष्मशरीरे विज्ञानमयः कोशो ज्ञानशक्तिमान् कर्तृरूपः, उपाधि सम्बन्धकृत एव तु पञ्चकोशाभिमानो जाग्रत्स्वप्न–सुषुप्तितुरीयमूर्छाद्यभिमानश्च जीवस्येत्यथ दर्शनीयं दिङ्मात्रेणैव । तथाहि अविद्योपाध्यवच्छिन्नाद् ब्रह्मण एव किलाकाशादिसूक्ष्मभूतपञ्चकं ततश्चेन्द्रियादीनि महाभूतानि चोपजायन्ते इति । तान्येवात्मनोऽस्य पञ्चकोशत्वमुपयान्ति । महाभूतपञ्चकारब्धं स्थूलशरीरमिदमन्नयकोशः, वाक्पाणिपादपायूपस्थाख्य-कर्मेन्द्रियपञ्चकविशिष्टं मनस्तु मनोमयः कोश । ज्ञानेन्द्रियविशिष्टाबुद्धिर्विज्ञानमयः कोशः । आत्मनः कोशवदाच्छादकत्वादेषु कोशव्यपदेशः । एषु पञ्चस्वपि कोशेषु प्राकृतानामात्माभिमानप्रयोज्याऽहन्त्वबुद्धिः, ज्ञानमात्रया तु क्रमशः प्रदीप्तया दार्शनिकानामन्नमयादिषु पूर्वपूर्वमारभ्य शैथिल्यमापद्यते सोऽभिमानः । क्रमशश्च षड्दर्शनैरेकैकस्मिन् कोश आत्माभिमानं शिथिलयितुं प्रयत्यत वस्तुतस्तु पञ्चाप्येते कोशा आत्मनः शरीरभूताः, आत्मा तु सर्वेभ्योप्येभ्योतिरिक्तः सर्वसाक्षी नित्यो निर्विकार इत्यसकृदवोचाम ।

अन्वयव्यतिरेकाभ्यामपि च सिद्ध्यति सोऽयमर्थः । स्वप्नेऽन्नमयकोश प्रतिभासनव्यतिरेकेण सुषुप्तौ प्राणमयादिकोशस्यापि प्रतिभासव्यतिरेकेण समाधौ चानन्दमयस्यापि प्रतिभासव्यतिरेकेणात्मनः प्रतिभान्वयदर्शनेनाऽत्मनोऽतिरेकस्य सुप्रसिद्धत्वात् । न च सुषुप्तिसमाध्योरात्मप्रतिभासे प्रमाणाभाव इति शक्यमभिधा-

तुम् सुखमहमस्वाप्समित्यादिस्मरणानुपपत्तेस्तदावश्यकत्वात् । समाधावपि च तद्विदामनुभवस्य स्फुटत्वात् । किं च तदानीमात्मस्फुरणे सुषुप्तिसमाध्योः कस्यापि प्रवृत्तिरेव नोदियात् स्वस्याभावाय जडस्याप्यप्रवृत्तिदर्शनात् । प्रवर्तन्ते तु सविशेषं तत्र लोका इत्यविद्यावृत्यात्मानन्दानुभवः प्रवृत्तिप्रयोजकस्तत्रावश्यमभ्युपेय इत्यलं बहुना । ननूपदर्शितपञ्चकोशातिरिक्तो न कश्चिदनुभूयत इति सर्वथानुभवागोचरस्य तस्य सत्त्वेऽपि नास्ति प्रमाणमिति चेन्मैवं वोचः । येनैव सर्वेऽप्येतेऽनुभूयन्ते तदभावोक्तौ वदतो व्याघातत्वात् ।

तदेवं श्री शंकराचार्यमतेन वेदान्तदर्शनस्य तात्पर्यं व्याख्यातम् ।

अथ साम्प्रदायिका श्रीरामानुजप्रभृतयोऽन्यथान्यथा वेदान्तदर्शनं व्याकुर्वते इति तेषां मपि मतं संक्षेपेण सर्वदर्शनसंग्रहाधारेण विलिख्यते । तत्र श्री रामानुजः ईश्वर, चिदचिच्चेति पदार्थत्रयं सत्यमेव मन्यते । तत्र, ईश्वरः सर्व नियामकः । चित् पदवाच्या, जीवा, अणवः अचित् पदवाच्या च प्रकृतिः इति । त्रयमप्येतत् सत्यमेव । मायापदेन च असुरादिकृतः प्रपञ्चोऽभिधीयते । जीवस्य ईश्वर भक्त्यैव कल्याणं सिद्ध्यति । मुक्तानामपीश्वरे विलयमं न जायते, अपितु ते सदा तिष्ठन्ति । अतएव भगवद्गीतायां जीवस्यापि नित्यत्वं प्रतिपादितम् । भक्तेरुपासनाया वा प्रकारश्च पंचधा विहितः । अर्चाविभवव्यूहसूक्ष्मान्तर्यामिभेदात् । एतस्मिन् पूर्वस्मिन् सिद्धे उत्तरोत्तराधिकारो भवति । तत्र अर्चना उपासनायै प्रतिष्ठापिता मूर्तिः । रामादयः श्री विष्णोरवताराश्च विभवपदवाच्याः । व्यूहः वासुदेवसंकर्षणप्रद्युम्नानिरुद्धभेदात् चतुर्विधः । वासुदेवः नियामकः, संकर्षणस्तु जीव इत्यादि व्याख्यातम् । अनेन क्रमेण अन्तर्यामि पर्यन्तमुपासनेन परमस्थितिलाभो भवति । परं ब्रह्म वासुदेवश्च न निर्गुणो निर्विशेषो वा, अपितु सर्वकल्याणगुणगणसम्पन्नः । निषेधवादा

यत्र-यत्र श्रुतौ समुपलभ्यन्ते ते दुःखित्वादिनिषेधपरा इति व्याख्येयम् । इत्थं सर्वश्रुतिसमन्वयाः श्रीरामानुजेन दर्शिता । एतस्य सिद्धान्तस्य आधारः पाञ्चरात्रनामा आगम इति विस्तरजिज्ञासुभिस्तत्रैवालोच्यम् ।

अथ मध्वाचार्यपरपर्यायपूर्णप्रज्ञमतं प्रदर्श्यते । तन्मते हि द्विविधं तत्त्वम्, स्वतन्त्रास्वतन्त्रभेदात् । तत्र स्वतन्त्रो भगवान् विष्णुः, अस्वतंत्रास्तु ब्रह्माद्याः सर्वेऽपि देवाः । विष्णोर्देवादीनां च परस्परं भेद एव सत्यः । सत्यं विधा इति श्रुतिप्रामाण्यात् । तत्वमसि, इत्यादि वाक्यं तु आदित्यो यूपइत्यादिवत् लाक्षणिकमेव । स आत्मा तत्त्वमसीति वाक्य अतत इति वाक्येच्छेद उह्य इति देवानां परमेश्वरेणैक्यं सर्वत्रैव निराकृतम् । भगवद्गीतासु च स्पष्ट मेवोक्तम्—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः ॥

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मिलोके वेदे च प्रथितः पुरुषोत्तमः ॥
यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मां सर्वभावेन भारतः ॥

अत्र हि वक्तुर्भगवतो नारायणावतारस्य श्रीकृष्णस्य सर्वसेव्यत्वं जीवस्य च अक्षरपदवाच्यस्य सेवकत्वं कूटस्थपदेन सेव्यत्वं स्पष्टमुद्घुष्टम् । मायापदेन च भगवत इच्छैवोच्यते, तयैव भेदप्रतीतिर्जायत इति न भेदप्रतीतिर्मिथ्या । परमेश्वरो जीवाद् भिन्न इत्यनुमानेनापि सिद्धचति । यो हि यं प्रति सेव्यः सः तस्माद् भिन्नः इति व्याप्तिः । विष्णोःशंखचक्रादिचिह्नानां शरीरे धारणञ्च

हिताय भवति। स च विधिः पुराणादौ स्पष्टः। एक विज्ञानेन सर्वविज्ञानं यच्छ्रुतिषु समुपदिष्टं तत् प्रधानेन ज्ञातेन सर्वमप्रधानं ज्ञातं भवतीति नेयम्।

'सर्वदर्शनसंग्रहे' इदं वैष्णवसम्बन्धेन मतद्वयमेवोक्तम्। अन्यं मतद्वयं न तत्र लिखितम्, इदमेव कारणं तत्र स्यात् यत् 'सर्वदर्शनसंग्रह' काले अन्यन्न मतद्वयम् प्रादुर्भूतम् इति। निम्बार्काचार्यानुयायिनस्तु स्वमतं प्राचीनं मन्यन्ते इत्यास्तां तावत्। इदं हि तेषां संक्षेपतो मतं यत् कुण्डलीकृतः सर्पो यथा सुसूक्ष्मं प्रतीयते, न च सूक्ष्मे महति च सर्पभेदो भवति, तद्वदेव नारायणः स्वरूपे तिष्ठन् चिदचितोर्भेदं नाविष्कुरुते। यदा च चिदचितोर्भेदं व्यवस्थाप्य जगद्रूपेण प्रकाशते तदा नारायणोऽपि एक एव संधातव्यः। अत्र कस्यापि मिथ्यात्वं-नाङ्गीकर्त्तव्यम्। जगद्रूपमपि नारायणस्य सत्यमेव। नारायणः स्वस्वरूपेण सत्य इति तु किमु वक्तव्यम्। यथा श्रीशंकराचार्या जगतो मिथ्यात्वमाचक्षते, तथा नानुसन्धेयम्, अपितु चिदचिद्विलक्षणः चिदचिद्रूपश्च भगवान् नारायणः श्रीकृष्णादिपदवाच्यः। उभयथापि सत्य एवानुसंधेयः। स च वासुदेवाख्यो भगवान् न निर्विशेषः, अपितु रामानुजमतवदेव प्रत्यनीक सकलकल्याण-गुणगणसंपन्न इत्येव उपनिषत्सु प्रतिपादितः। उपनिषद्वेद्यं भगवतो वासुदेवस्य स्वरूपं विज्ञेयम्, न तु अनुमानादिभिः त्रिभिर्लौकिकैः प्रमाणैरिति। यथोपनिषदः प्रतिपादयन्ति, तथैव भगवतो वासुदेवस्य स्वरूपमनुसंधेयम्। इत्थं भेदाभेदवादः निम्बार्कस्यानुसंधेयः। भाष्कराचार्यस्तु अत्र किञ्चिद् विशेषमविदधान औपाधिकं भेदाभेदमुपकल्पयतीति न विस्तरभियात्र प्रपञ्च्यते।

अथ श्रीवाल्लभसिद्धान्तसारः संक्षेपेण प्रदर्श्यते। तत्र हि एक एव भगवत्पदवाच्यः परब्रह्मपदवाच्यो वा मुख्यं तत्त्वम्। मायाप्रकृत्यादयस्तु परब्रह्मण एव उत्पद्यन्ते। अतएवायं संप्रदायः शुद्धाद्वैतपदेनोच्यते। अत्र च

स्वस्वरूपेण भगवानेव वासुदेवः सत्यम्। जगत् तु भगवद्रूपेण सत्यभूतः, अर्थात् पृथक्-पृथक् रूपेण कल्प्यमानो मिथ्याभूत एव। ब्रह्मविषयकाज्ञानेनैव जगद् भिन्न-रूपेण भासते इतीयं विषयतैव मिथ्याभूता न तु जगत् श्रीशंकराचार्यवत् मिथ्याभूतमुच्यते। जगति अहंता, ममता या भासते सैव मिथ्याभूता (ईदृशमेव मिथ्याभूतत्वं पञ्चदश्यामपि व्याख्यातम्) तुच्छेनाभ्वपिहितं यदासीत् इति सृष्टि-प्रतिपादकश्रुतौ तुच्छशब्दस्य इदमेव तात्पर्यमस्मिन् सम्प्रदाये बोद्धव्यम्। यथा पटो विस्तृतः संक्षिप्तश्च अहिर्वा कुण्डलीकृतः व्याप्य स्थितश्च एक एव भवति, तथैव भगवानपि एक एव भवति इति अत्रापि द्वैताद्वैतसम्प्रदायमत इव निरूपितम्। इयं विषयतासृष्टिरेव मायापदेन अविद्यापदेन च श्रुतिषु अभिहिता। एवं भगवदज्ञानेनैव मोक्षः सिद्ध्यतीति श्रीभागवते स्पष्टमुक्तम्—

येषां स एव दययेद् भगवाननन्तः।
सर्वात्मनाश्रितपदो यदि निर्व्यलीकम्।
ते दुस्तरामतितरन्ति च देवमायां
नैषाममाहमिति धीश्वसृगालभक्ष्ये॥

तथा च मुख्यं सत्वं भगवत्येव, जगत्तु तत् सत्तयैव सत्त्ववत् भवतीति। भगवाँश्च स्वकीयमैश्वर्यं वीर्यञ्च तिरोधाय जगद्रूपेण आविर्भवतीति मुख्योऽत्र सिद्धान्तः। ''बहुस्यां प्रजायेय'' इत्यादिश्रुतिष्वपि भगवत एव नाना रूपत्वं प्रतिपादितम्। शक्तिशक्तिमतोश्च अपृथक् सिद्धत्वमत्रशास्त्रे मन्यते। तदिदमागमशास्त्रपद्धतिमेवानुसरतीति प्रायेण आगमशास्त्रानुसारमेवेदं शुद्धाद्वैत-दर्शनं विज्ञेयम्। इतः परं चैतन्य सम्प्रदायोऽपि वंगदेशेषु प्रचलति। यस्यायं सिद्धान्तश्लोकः—

आराध्यो भगवान् व्रजेशतनयस्तद्धाम वृन्दावनम् ।
रम्या काचिदुपासना व्रजवधूभाग्येन या कल्पिता ।।
श्री मद्भागवतं प्रमाणमखिलं श्रीकृष्णलीलापरम् ।
श्री चैतन्यमहाप्रभोर्मतमिदं तत्राग्रहो नः परः ।। इति

अयं च सम्प्रदायः माध्वसम्प्रदायशाखारूपएवेति बहवो विद्वांसो मन्यन्ते । एवमेव अन्यान्यसम्प्रदाया अपि ब्रह्मसूत्रभाष्य अभिहिता इति नात्र विस्तर भिया प्रपञ्च्यन्ते ।

तदित्थं सर्वतन्त्रस्वतन्त्रैः महोमहोपाध्यायमहामहोपदेशकवाचस्पतिविद्यावाचस्पत्याद्यनेकविरुदभाग्भिः, अखिलभारतीयसंस्कृतसाहित्यसम्मेलनवर्णाश्रमस्वराज्यसंघादिविविधसंस्थासंस्थापकैः हरिद्वारीयऋषिकुलब्रह्मचर्याश्रमलवपुरीयसनातनधर्मकोलेज–जयपुरीयसंस्कृतकोलेज–अलवरीयसंस्कृतकोलेजादिसंस्थासु स्वीकृताऽध्यक्षपदैः, लवपुरीयमूलचन्द्रखैरातीरामसनातधर्मसंस्कृत विद्यापीठस्य स्वीकृतसंचालकपदैरधिगतकाशीहिन्दूविश्वविद्यालयसंस्कृतसंचालकपदैः, वाराणसेयसंस्कृतविश्वविद्यालयस्य संमानितप्राध्यापकैः भारतराष्ट्रपतिद्वारा सर्वतः प्रथमं प्राप्तसंम्मानैः सर्वदर्शनकान्तारकेसरिभिः सुरगिरायां राष्ट्रभाषायां चार्धशतग्रन्थप्रणेतृभिः **श्री गिरिधर शर्म चतुर्वेदै** विरचितस्य प्रमेयपारिजातनाम्नोग्रन्थस्यायमात्मनिरूपणाख्यो भागः समाप्त इति–संपादकः ।